Fabruary 1929.

THE

CHOWKHAMBÁ SANSKRIT SERIES,

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 374

वैशेषिकदर्शने

महर्षिकल्पप्रशस्तदेवविरचितम्

प्रशस्तपादभाष्यम् ।

पण्डितप्रवर जगदीशतर्कालङ्कारविरचितया सूक्तिटीकया

महामहोपाध्यायपद्मनाभमिश्रकृतया सेतुव्याख्यया

विद्वच्चूडामणि व्योमशिवाचार्यनिर्मितया व्योमवत्या च समन्वितम् ।

वाराणसीस्थराजकीयसंस्कृतपुस्तकालयाध्यक्षेण पं० गोपी-

नाथकविराजेन न्यायोपाध्याय पं० दुण्ढिराजशास्त्रिणा च संस्कृतम् ।

THE

PRASHASTAPADABHASHYAM

BY Prashastadevacharya

WITH COMMENTARIES

Sūkti BY JAGADISA TARKALANKÂRA,

Setu, BY PADMANABHA MISHRA, &

Vyomavati BY VYOMASHIVACHARYA

Edited by

GOPINATH KAVIRAJ, M. A.

PRINCIPAL GOVERNMENT SANSKRIT COLLEGE

SARASVATI BHAVAN BENÂRES.

and

DHUNDHIRAJ SHASTRI Nyâyopâdhyaya

FASCICULUS IV-6.

PRINTED-PUBLISHED & SOLD BY THE SECRETARY,

CHOWKHAMBA SANSKRIT SERIES OFFICE,

Vidya Vilas Press, North of Gopal Mandir, Benares

1927

श्रीः

आनन्दवनविद्योतिसुमनोभि सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः—३७४

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares

Agents

1 Luzac & Co Booksellers,
LONDON

2 Otto Harrassowitz, Leipzig
GERMANY.

3 The Oriental Book-supplying Agency,
POONA

विरोधपरिहारार्थं तस्मिन्नेव महोदधाविति वाक्यं पृथिव्यां सम्बन्धयन्ति। तदनन्तरं तस्मिन् पृथिव्युत्पादे सति तैजसेभ्यः परमाणुभ्यः द्व्यणुकादिप्रक्रमेण महांस्तेजोराशिरिति। पूर्वमनेनैवमुक्तप्रकारेण समुत्पन्नेषु चतुर्षु महाभूतेषु सत्सु महेश्वरस्याभिध्यानमात्रादिच्छामात्राच्च शरीरादिव्यापारादिति। तथा तत एव निमित्तात्तैजसेभ्यः परमाणुभ्यः पृथिवीपरमाणुसहितेभ्यो महदण्डमारभ्यते। किंविशिष्टं महदिति। अत्र हि तैजसाः परमाणवः समवायिकारणम् पार्थिवावयवाश्च निमित्तकारणं महेश्वराभिध्यानञ्चेति। द्व्यणुकाद्युत्पन्नानि त्र्यणुकादिप्रक्रमेण महदण्डमारभन्त इति। तस्मिंश्चाण्डान्तर्देशे ब्रह्माणमुत्पादयति। किंविशिष्टमित्याह—चतुर्वदनकमलमिति। चत्वारि कमलानीव वदनानि यस्यासौ तथोक्तस्तमिति। सर्वेषाञ्च लोकानां भूरादिसत्यान्तानां पितामह स्वामिनम्। तथा सकलभुवनैः सहितञ्चेति। समुत्पाद्य महेश्वरः प्रजासर्गे विनियुङ्क्ते—ब्रह्मन् प्रजासर्गं कुर्विति। स च महेश्वरेण विनियुक्तो ब्रह्मातिशयेन ज्ञानं च वैराग्यं चैश्वर्यं चेति तथोक्तानि तैः सम्पन्नो युक्तः, अत एव प्राणिनां कर्मविपाकं विदित्वा सुतान् सृजति। किं विशिष्टान्? प्रजापतीन् प्रजायाः स्वामिनः, कर्मानुरूपं ज्ञानं च भोगश्चायुश्च येषां ते तथोक्तान् कर्मानुरूपज्ञानभोगायुष इति। तथा मनसि भवान्मानसान्मनोव्यापारेण सङ्कल्पमात्रेण सम्पादितान्न कायिकव्यापारेणोत्पत्तस्तानिति। तथा मनवश्च देवाश्च ऋषयश्च पितरश्चेति तथोक्तास्तेषां गणाः समूहास्तांश्च सृजति। तथाहि—चतुरो वर्णान् ब्राह्मणक्षत्रियविट्शूद्रान् कर्मानुरूपभोगज्ञानायुषः सृजति। केभ्य इत्याह—मुखबाहूरुपादतो यथासंख्यमिति। तथान्यानि चोच्चावचान्युत्तमाधमभावेनावस्थितानि भूतानि सृजति। एतांश्च पूर्वोक्तान् स्वाशयानुरूपैर्धर्मज्ञानवैराग्यैश्वर्यैः संयोजयति। यस्य हि यादृशं कर्म तस्य तादृशानि धर्मज्ञानवैराग्यैश्वर्याणि सम्पादयतीति।

ननु सर्वमेतदसम्बद्धम् ईश्वरसद्भावे प्रमाणासम्भवात्। तथा। अनुमानागमाभ्यां तत्सद्भावासिद्धेः। तथा चानुमानम्—क्षित्यादिषु सृष्टिसंहारौ कर्तृपूर्वकाविति। अथ सृष्टिसंहारयोर्भूतेष्वप्रसिद्धेरनुमानाभाव इति चेत्। रचनावत्त्वेन तत्सिद्धेः। तथाहि—क्षित्यादीनि कार्याणि रचनावत्त्वात्। यद् यद् रचनावत्तत् कार्यं यथा घटा-

दीति। तथा रचनावत् क्षित्यादि तस्मात् कार्यमिति। न च रचनावत्त्वमन्तरेणापि कार्यत्वमुपलभ्यत इत्यप्रयोजकत्वं वाच्यम्। सर्वस्यापि सपक्षैकदेशवर्तमानस्यागमकत्वप्रसङ्गात्। तथाहि–धूमस्याप्यप्रयोजकत्वं तदन्तरेणाप्यग्निमत्त्वोपलब्धेः। अथ यत्र धूमस्तत्राग्निरिति व्याप्तिः? एवं तर्हि यत्र रचनावत्त्वं तत्र कार्यत्वमिति समानम्। तथाच घटादावभूत्वा भावित्वं प्रत्यक्षेणानुपलब्ध रचनावत्त्वेनैव साध्यते। तथेदं संहारे समानमिति। सिद्धे च कार्यत्वे कर्तृपूर्वकत्वं साध्यते। तथाच विवादास्पदं बोधाधारकारणं कार्यत्वाद् यद् यद् कार्यं तत्तद् बोधाधारकारणम् यथा घटादि, तथा चेदं कार्यं तस्मात् बोधाधारकारणमिति। अस्य च पक्षधर्मत्वे सति सपक्षे वर्तमानस्य विपक्षादत्यन्तव्यावृत्तेरबाधितविषयत्वादसत्प्रतिपक्षत्वेन गमकत्वम्। नन्वेवमशेषज्ञेयज्ञानाधारविधातृपूर्वकत्वे साध्ये साध्यविकलो दृष्टान्तः कुम्भादावसर्वज्ञपूर्वकत्वेन व्याप्तस्य कार्यत्वस्योपलब्धेः। तथा विरुद्धश्च हेतुः–न विवादास्पदं सर्वज्ञपूर्वकं कार्यत्वात् घटवत्। असर्वज्ञपूर्वकत्वे च साध्येऽभिप्रेतस्यासिद्धिरिति। नैतदेवम्। बोधाधारेऽधिष्ठातरि साध्ये न साध्यविकलत्वम्। नापि विरुद्धत्वम्। न च कार्यत्वं बुद्धिमन्तमधिष्ठातारं व्यभिचरतीत्यव्यभिचारोपलम्भसामर्थ्यादुपलभ्यमान पक्षे क्षित्यादिसम्पादनसमर्थमेवाधिष्ठातारं साधयतीति। न च क्षित्याद्युपादानोपकरणानभिज्ञः क्षित्यादिसम्पादनसमर्थ इति परमाण्वादिविषयज्ञानं तत्कर्तुर्लभ्यते। पक्षधर्मताप्रसादात्सर्वं चानुमानं सामान्येन व्याप्तिग्रहणबलात् प्रवर्तमानं पक्षधर्मताबलात्साध्यविशेषं साधयतीति दृष्टम्। न च विस्फूर्जतापि परेणाऽत्र बोधाधारकारणत्वकार्यत्वयोः सामान्यव्याप्तेर्व्याघातः शक्यसाधनः। विशेषेण तु व्याप्तिविरहादसाधनत्वे धूमस्याप्यसाधनत्वप्रसङ्गः। तत्राप्यपास्ताशेषविशेषेणाग्निमात्रेण धूममात्रव्याप्तेरुपलम्भादिति। तथा चात्राऽपि विशेषविरोधः संभवत्येव–अयं पर्वतः पर्वतावलम्ब्यग्निमान् न भवति धूमवत्त्वात्। योयो धूमवान् स स विशिष्टाग्निमान्न भवति यथा रसवतीप्रदेशः, तथा चायं तस्माद्यथोक्तसाध्य इति। अथ धूमस्याग्निमात्रेण व्याप्तेरुपलंभाद्यत्रोपलम्भस्तत्रैवाग्निस्तत्रैवाग्निप्रसाधकत्वाद्विरुद्धतानवकाश इति चेत्, इहापि समानम्—कार्यत्वस्य बुद्धिमता व्याप्ते·

रुपलम्भात्पक्षे तत्साधकत्वमिति । अथ धूमप्रदेशोऽग्निना व्याप्तो दृष्ट इति प्रदेशान्तरेऽप्यग्निमस्य प्रसाधयतीति युक्तम् । नन्वेवं तर्हि कार्यत्वमपि यत्रोपलब्ध तत्रोत्पादनसमर्थेनैव कर्त्रा व्याप्तमिति पक्षेपि क्षित्यादिसम्पादनसमर्थं कर्तारं गमयेत् । यच्चेदमनुमानं न विवादास्पदं सर्वज्ञपूर्वकमिति । तत्र विशेषप्रतिषेधस्य शेषाभ्युपगमे सामर्थ्योपलब्धेरसर्वज्ञपूर्वकत्वं स्यात् । कार्यत्वस्य कर्त्रव्यभिचारादिति । यश्चासावसर्वज्ञः स यदि क्षित्युत्पादनसमर्थः संज्ञामात्रं भिद्यतेति । अथासमर्थः कथं क्षित्यादेः कर्ता । अथ परस्य सर्वज्ञत्वविशेषः कार्यत्वेन हेतुनाऽभिप्रेतस्तत्प्रतिषेधार्थं विधेरसज्ञपूर्वकमिति, तत्र विशेषप्रतिषेधस्य शेषाभ्युपगमे सामर्थ्योपलब्धेर्विरुद्धानुमानं न कर्तृमात्रस्येति चेत् । न । कथमत्र क्षित्यादिसम्पादनसामर्थ्ये सज्ञाभेदमात्रमसामर्थ्ये तु कार्यानुत्पत्तिरिति । दृष्ट च कार्ये तथा समस्तविशेषप्रतिषेधे निराधारस्य सामान्यस्याप्रसिद्धेः निर्विषयत्वेनाप्रमाणताप्रसङ्गः । न चेदमप्रमाणं सामान्यव्याप्तेः प्रतिषेद्धुमशक्यत्वात् । अथ विशिष्टविशेषप्रतिषेधः,तथा विशेषाभ्यनुज्ञायां विशेषान्तरोपगमप्राप्तिः । वामेनाक्ष्णा न पश्यतीति यथा । अथाग्निधूमयो प्रत्यक्षेण सम्बन्धसिद्धेरनुमानप्रवृत्तिर्युक्ता नैवमत्रेति चेत् । न, इहापि कार्यत्वस्याधिष्ठानपूर्वकत्वेन सम्बन्धसिद्धेरप्यनुमानं वर्तत एव । अथाग्निरनुमानादूर्ध्वमपि प्रत्यक्षो नैवमीश्वर इत्यनुमानं कथमिति चेत् । न । अत्यन्तपरोक्षस्यापि चक्षुरादेरुपलब्ध्यनुमेयत्वात्तथात्र सामान्येन क्रियायाः कारणकार्यत्वोपलब्धेः अनुमानमिति । अभ्युपपन्नश्च कार्यत्वस्य शरीरादिमता कर्त्रा व्याप्तत्वात् । घटादौ तथा भूतस्यैवात्र सिद्धिरिति वाच्यम् । दृष्टान्तदार्ष्टान्तिकयोरुत्कर्षापकर्षेण प्रत्यवस्थानस्य सर्वानुमानोच्छेदकत्वात् तथाह्यविद्यमानस्य शरीरादेरापादनमुत्कर्ष विद्यमानस्य च सर्वज्ञत्वादेरपकर्षणमपकर्षः न च सर्वे दृष्टान्तधर्मा दार्ष्टान्तिकेऽपि भवन्ति । अभेदे दृष्टान्तदार्ष्टान्तिकव्यवहारोच्छेदप्रसङ्गात् । न हि छिदिक्रियायाः करणं कुठारादि दृष्टमिति रूपोपलब्धिक्रियायामपि तथा भवति । यथा चात्रापास्तविशेषेण कारणेन क्रियायाः व्याप्तत्वादनुमानम्, एवमीश्वरानुमानेऽपीत्यनुत्थानं जातिप्रयोगस्य ।

एतेन यदाह–कस्यचिद्धेतुमात्रत्वस्य यद्यधिष्ठातृतोच्यते कर्मभिः

सर्वजीवानां तत्सिद्धेः सिद्धसाधनमिति। तदपास्तं भवति। तथाहि बुद्धिमत्यधिष्ठातरि साध्ये कथमचेतनेन कर्मणा सिद्धसाधनम्। तस्याप्यचेतनतया अधिष्ठात्रपेक्षत्वात्, तथाहि-सर्वमचेतनं चेतनाधिष्ठितं प्रवर्तमानं दृष्टम्। यथा तन्त्वादि। तथाच कर्मादि। न चास्मदाद्यात्मैवाधिष्ठायकः तस्य, तद्विषयज्ञानाभावात्। तथा चास्मदाद्यात्मनो न कर्मविषयं ज्ञानमिन्द्रियजम्। नापि परमाण्वादिविषयम्। न च तदभावे तस्य प्रेरक दृष्टम्। न चाचेतनस्याकस्मात्प्रवृत्तिरुपलब्धा। प्रवृत्तौ वा परिनिष्पन्नेऽपि कार्ये प्रवर्तेत-विवेकशून्यत्वात्। अथाचेतनात्मनाऽधिष्ठित च क्षीर प्रवर्तते। तन्न। गोवत्सप्रयत्नाभावे मृतावस्थायामप्रवृत्तेः। सर्व चास्मदाद्यनधिष्ठितं पक्षेऽन्तर्भूतमिति न साध्येनैव साधनस्य व्यभिचारः सर्वानुमानोच्छेदप्रसङ्गात्। तथा चाचेतनान्यस्मदन्येनानधिष्ठितानि कार्योत्पत्तौ बुद्धिमदधिष्ठितानि अचेतनत्वाद्यद्यदचेतनं तत्तद् बुद्धिमताधिष्ठितम् प्रवर्तमान दृष्टं, यथा तन्त्वादि तथा चैतानि। तस्माद्यथोक्तसाध्यानि। अथ कर्तुः शरीरादिमत्त्वोपलब्धेरीश्वरेऽपि तथाभावः किमत्र साध्यते, यदि शरीरादिमत्त्वेपि क्षित्यादिकर्तृत्वमभ्युपगम्यते। अथ शरीरादिमत्त्वादसर्वज्ञस्य न क्षित्यादिकर्तृत्वं तर्हि कार्यस्य कर्तृव्यभिचारादशरीरस्यैव कर्तृत्वमभ्युपेयम्। न च शरीरादिमत्त्वे प्रमाणमस्ति। अथ कर्तृत्वमेव प्रमाणम्। तद्याहतमेव। कर्तृत्वेन शरीरादिमत्त्वं शरीरादिमत्त्वाच्च क्षित्याद्यकर्तृत्वमिति। नचेद् स्वतन्त्रसाधनम् आश्रयासिद्धत्वात्। तथाहि-सिद्ध कर्तृसद्भावे कर्तृत्वस्य शरीरादिमत्त्वस्य च पक्षधर्मत्व स्यान्न चैतदभ्युपगतम्। अथ परेण क्षित्यादिकर्ताभ्युपगत इत्यनिष्टापादनमेतत्। तत्र यदि प्रमाणाद्यातस्तदुपगमस्तेनैव बाध्यमानत्वादनुत्थान विपरीतानुमानस्य। न चैतस्यानेनैव बाधः। अस्य तन्मूलत्वात्। अथ प्रमाणं विनैवाभ्युपगतः परेण, तर्हि प्रमाण विना प्रमेयस्यासिद्धेः किं विपरीतानुमानेन। तस्याश्रयासिद्धताप्रसङ्गात्। समान चैतदन्येष्वपीश्वरप्रतिषेधहेतुष्विति। तथा शरीरसम्बन्धे सति नियतदेशतया युगपदनियतदेश कार्यं न स्यात्। तत्तु दृष्टम्। अथैकमनियतदेशस्य कार्यस्योत्पत्त्या व्यापि शरीरमस्पृश्यमतीन्द्रियं चेष्यते। तन्न, दृष्टविपरीतत्वात्। परं चाशरीरस्यैव कर्तृत्वमभ्युपेयामिति। तथाहि-नि-

स्यशरीरासंभवात् तच्छरीरं तत्संपाद्यमेवेति किं शरीरान्तरेण विना चारभ्यते शरीरान्तराभ्युपगमे तदन्यशरीरयुक्तेन संपाद्यत इति । शरीरपरम्परायामुपक्षीणत्वात् । भगवता नान्यत्कार्यं प्रादुर्भवेदिति। अथाशरीरस्यैव शरीरकर्तृत्वं तत्कार्यावसरेऽपि न बाध्यत इति । तथा संहारावस्थायां शरीरस्य विनाशे पुनः सर्गादावशरीरस्याकर्तृत्वे कार्योत्पत्तिर्न स्यात् इत्यशरीरस्यैव कर्तृत्वमभ्युपगतम् । अथ प्रयोजनापेक्षितया कर्तॄणां प्रवृत्तेरुपलम्भात्तदभावाच्चेश्वरप्रवृत्त्यभाव इति चेत् । तदसत् । कार्यसद्भावेन कर्तृसद्भावसिद्धेस्तस्य च स्वयं परिपूर्णत्वात्परार्था प्रवृत्तिर्गम्यते । यदि वा प्रवृत्तिशीलत्वाद्भगवतो नायं पर्यनुयोग इति । यथाहि-भास्वान् प्रकाशनशीलत्वात् पदार्थान् प्रकाशयति एवमितरोऽपि कार्यकारणरूपत्वात् कार्यं करोतीति । अथाशरीरस्येच्छामात्रेण कथं प्रेरकत्वम् ? यथाऽस्मदाद्यात्मनः शरीरादिप्रेरकत्वमिति । अथ सत्येव शरीरे प्रेर्यप्रेरकत्वम्, इहापि सत्यं च परमाणौ प्रेर्यप्रेरकत्वमिति समानम् ।

अथ सिसृक्षा संजिहीर्षा वा महेश्वरस्य यदि नित्या सततं कार्योत्पत्तिः, अथानित्या साऽपि ईश्वरेच्छां विना न भवतीत्यपरामिच्छान्तरं तदप्यनित्यत्वादीश्वरेच्छाधीनमित्यनवस्थायां तत्सम्पादन एवोपक्षीणत्वात् भगवतो न कार्यान्तरे व्यापारः स्यात् । अथेश्वरेच्छा विनापि ईश्वरेच्छा सम्पाद्यते । तर्हि कार्यान्तरेऽप्येवमस्तु । अथ नित्याऽपि सहकारिप्राप्ता कार्यं करोति । सहकारिणामपि नित्यत्वे सततं कार्योत्पत्तिरनित्यत्वे वा तानपि सहकारिणः संपादयन्ती सहकार्यन्तरमपेक्षते । तेषामप्यनित्यत्वे पुनः सहकार्यन्तरमित्यनवस्थायां पूर्वदोषानुषङ्गः ।

नैष दोषः । चेतनोत्पन्नादृष्टसद्भावे सतीच्छायाः कार्यकरणात् । तथाहि सहकारिसंपादनेऽप्यन्यं सहकारिणमपेक्षते तत्राप्यन्यमित्यनादित्वं परिहारः । उक्तं चेच्छायाः सृष्टौ संहारे च सहकारीति । तथा—

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन् देव एकः ॥

इत्यागमेन प्रसिद्धः । न च स्वरूपप्रतिपादकानामप्रामाण्यम् । प्रमाजनकत्वस्य सद्भावात् । तथाहि-प्रमाजनकत्वेन प्रमाणस्य प्रामाण्यं न प्रवृत्तिजनकत्वेन तच्चेहाप्यस्त्येव । प्रवृत्तिनिवृत्ती तु पुरु-

वस्य सुखदुःखसाधनत्वाध्यवसाये समर्थस्यार्थित्वात् भवत इति । अथ विध्यङ्गत्वादमीषां प्राधान्यं न स्वरूपत्वादिति चेत् । तदसत् । स्वार्थप्रतिपादकत्वेन विध्यङ्गत्वात् । तथाहि—स्तुतेः स्वार्थप्रतिपादकत्वेन प्रवर्तकत्वम्, निन्दायाश्च निवर्तकम् । अन्यथा हि तदर्थापरिज्ञाने विहितप्रतिषिद्धयोरविशेषेण प्रवृत्तिनिवृत्ती स्याताम् । तथाविधवाक्यस्यापि स्वार्थप्रतिपादनद्वारेणैव पुरुषप्रेरकत्वं दृष्टम् । एवं स्वरूपपरेष्वपि वाक्येषु स्यात्, वाक्यरूपताया अविशेषाद्विशेषहेतोश्चाभावादिति । तथा स्वरूपार्थानामप्रामाण्ये "मध्या आपो दर्भाः पवित्रममेध्यममशुचि" इत्येवरूपापरिज्ञाने विध्यङ्गतायामविशेषेण प्रवृत्तिनिवृत्तिप्रसङ्गः । न चैतदस्ति, मेध्येष्वेव प्रवर्तन्ते अमेध्येषु च निवर्तन्त इत्युपलम्भात् । तदेवं स्वरूपार्थेभ्यो वाक्येभ्योऽर्थस्वरूपावबोधे सतीष्टे प्रवृत्तिनिदर्शनादनिष्टे च निवृत्तिरिति ज्ञायते—स्वरूपार्थानां प्रमाजनकत्वेन प्रवृत्तौ निवृत्तौ वा विधिसहकारित्वमिति । अपरिज्ञाने तु प्रवृत्तावतिप्रसङ्गः ।

अथ स्वरूपार्थानां प्रामाण्ये ग्रावाणः प्लवन्त इत्यादीनामपि यथार्थता स्यात् । न । मुख्ये बाधकोपपत्तेः । यत्र हि मुख्ये बाधकं प्रमाणमस्ति तत्रोपचारः कल्प्यते, तदभावे तु प्रामाण्यमेव । न चेश्वरसद्भावप्रतिपादकेष्वस्ति किञ्चिद्बाधकमिति । तदेवं सृष्टिसंहारप्रतिपादकानामपि वाक्यानां स्वरूपेऽर्थप्रामाण्याद्विवक्षितार्थकल्पनाऽन्याय्येति ।

एतेन शाक्यपक्षोऽपि प्रतिषिद्ध एव । तथाहि—शाक्या अपि दृष्टान्तदार्ष्टान्तिकयोरुत्कर्षापकर्षेण प्रत्यवतिष्ठन्ते । तत्र चोक्तमेव प्रति साधनमिति । तच्च जात्युत्तरम् । यत्कार्यं यादृशा कर्त्रा व्याप्तमुपलब्धं यदुपलब्धेरतत्क्रियादर्शिनः केनाप्येतत्सम्पादितमिति बुद्धिर्भवति तदेवोपलभ्यमानं तादृशमेव कर्तारं गमयेत्, तदुक्तम्—

सिद्धं यादृगधिष्ठातृभावाभावानुवृत्तिमत् ।
सन्निवेशादि तद्युक्तम् तस्मात्तदनुमीयते ॥

न च क्षित्यादिकार्यं कर्त्राविनाभूतं दृष्टमिति कथं कर्तारं गमयेत् । अथ सत्यपि भेदे कार्यशब्दसाम्यादनुमानम्, एवन्तर्हि धूमे पाण्डुत्वमग्निना व्याप्तमुपलब्धमिति प्रासाददशायामप्युपलभ्यमानमग्निं गमयेत् । तदुक्तम्—

वस्तुभेदे प्रसिद्धस्य वस्तुसाम्यादभेदिनः ।
न युक्तानुमितिः पाण्डुद्रव्यादिति हुताशने ॥

यदि किञ्चित् कार्यं कर्तृविनाभूतं दृष्टमिति अपरिदृष्टया विना भावस्यापि तत्पूर्वकत्वं स्यात्। तथा सति घटादेर्मृद्विकारस्य कुलालपूर्वकत्वोपलम्भात् वल्मीकादीनामपि तत्पूर्वकत्वं स्यात्, तदुक्तम्–

अन्यथा कुम्भकारेण मृद्विकारस्य कस्यचित् ।
घटादेः कारणासिद्धा वल्मीकस्यापि तत्कृतिः ॥

कथन्तर्हि इदं क्षित्यादि कार्यं कर्मजमिति कथं हि कर्मजं जगतां वैचित्र्यमित्युक्तम्। तच्च चेतना मानसं कर्मेति न विज्ञानार्थान्तरमिति। सर्वमेतदसम्बद्धम्। सामान्येन कार्यत्वस्य व्याप्तबुद्धिमता व्याप्त्युपलम्भात् क्षितावपि तत्सिद्धेः। सर्वं चानुमानमन्यत् सामान्येन व्याप्तिग्रहणापेक्षं प्रवर्तत इत्युक्तम्। न किञ्चिदप्यनुमानं पक्षे व्याप्तिग्रहणापेक्षं संभवतीत्यदूषणमेतत्। क्षित्यादि कार्यं न कर्तृव्याप्तमुपलब्धमिति। न चेत्थंभूतं कार्यं कर्तृविनाभूतं नोपलब्धमित्यनुमानाभाव इति वाच्यम्। सर्वानुमानोच्छेदप्रसङ्गात्। तथाहि–कृतकत्वादनित्यत्वं शब्देऽभ्युपगतम् अत्रापि शक्यते वक्तुं यच्छब्दे कृतकत्वं तस्यान्यत्रानित्यत्वाविनाभावित्वेनोपलब्धमित्यनुमानाभावः। अथ सामान्येन कृतकत्वानित्यत्वयोरन्यत्र व्याप्तिग्रहणे सत्यनुमानं न पक्ष इति चेत्। समानमीश्वरानुमानेऽपीति। न चात्र शब्दसामान्यमेव कार्यत्वस्योभयत्राव्यभिचारेण सद्भावात्। न चैव पाण्डुत्वमग्निगमकम् तस्याग्निमन्तरेण सद्भावेन व्यभिचारित्वादिति। एवं च वल्मीकादावपि मृद्विकारत्वं कुलालपूर्वकत्वे लिङ्गं व्यभिचारात्। तस्य हि प्राकारेष्टकादिष्वकुलालपूर्वकेष्वपि सद्भावात्। यच्चेदं कर्मजं जगतां वैचित्र्यमिति तदिष्यत एव। यदि नामाचेतनत्वात् कर्म चेतनाधिष्ठितं कार्यकरणे प्रवर्तत इतीश्वरस्यापि सद्भावः परस्यापि सद्भावः। यद्यपि चेतनैव कर्म तथापि नापि तस्य चिदाधारत्वं चेतनत्वमेव। न च तस्य बोधेन तादात्म्यम्। आत्मगुणत्वस्य वक्ष्यमाणत्वात्। नापीदमेकशाखाप्रभवत्वानुमानेन तुल्यम्। तत्र ह्येकशाखाप्रभवत्वेन हेतुना फलान्तराणां पाके साध्ये प्रत्यक्षेण बाधादप्रामाण्यं युक्तम्। न चैवमीश्वरानुमान इति। न च शरीरादिमत्त्वेन क-

र्तृत्वं व्याप्तमिति तदभावात्तस्याप्यभाव इति वाच्यम् । कार्यानुमानस्य चाव्यभिचारित्वे कर्तृसद्भावसिद्धेः । न चात्र व्यापकानुपलब्धेर्बाधकत्वम् । अनुमानस्यानुमानान्तरेण बाधायोगात् । पूर्वानुमानेन च धर्मिसद्भावासिद्धावुपकृतविषयत्वमसिद्धौ वा न पक्षधर्मत्वमिति । अथ नित्यस्याव्यतिरेकित्वात्सामर्थ्यञ्च दुरन्वयमित्यकर्तृकत्वमेवेश्वरस्य । तन्न । क्षणिकत्वप्रतिषेधस्य वक्ष्यमाणत्वात् । अय चेश्वरवादोऽस्मत्गुरुभिर्विस्तरेणोक्त इति नेह प्रतन्यते ॥

(भा०) आकाशकालदिशामेकैकत्वादपरजात्यभावे सति पारिभाषिक्यस्तिस्रः संज्ञा भवन्ति–आकाशं कालो दिगिति । तत्राकाशगुणाः शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागाः । तत्र शब्दः प्रत्यक्षत्वे सत्यकारणगुणपूर्वकत्वादयावद्द्रव्यभावित्वादन्यत्रोपलब्धेश्च न स्पर्शवद्विशेषगुणः । बाह्येन्द्रियप्रत्यक्षत्वादात्मान्तरग्राह्यत्वादात्मन्यसमवायादहङ्कारेण विभक्तग्रहणाच्च नात्मगुणः । श्रोत्रग्राह्यत्वाद्विशेषगुणभावाच्च न दिक्कालमनसाम् । पारिशेष्याद् गुणो भूत्वा आकाशस्याधिगमे लिङ्गम् । शब्दलिङ्गाविशेषादेकत्वं सिद्धम् । तदनुविधानात्पृथक्त्वम् । विभववचनात्परममहत्परिमाणम् । शब्दकारणत्ववचनात् संयोगविभागाविति । अतो गुणवत्त्वादनाश्रितत्वाच्च द्रव्यम् । समानासमानजातीयकारणाभावाच्च नित्यम् । सर्वप्राणिनां च शब्दोपलब्धौ निमित्तम् । श्रोत्रं पुनः श्रवणविवरसंज्ञको नभोदेशः । शब्दनिमित्तोपभोगप्रापकधर्माधर्मोपनिबद्धस्तस्य च नित्यत्वे सत्युपनिबन्धकवैकल्याद्बाधिर्यमिति ॥

(सू०) गर्गरीगर्तादिभेदेनाकाशस्य दण्डलवमुहूर्तादिभे-

देन कालस्य पूर्वपश्चिमादिभेदेन दिशश्च नानात्वात् आकाशत्वादिजातिसत्त्वेन पृथिव्यादिसंज्ञावाऽऽकाशादिसंज्ञापि द्रव्यत्वावान्तरजातिनिमित्तकैवेति मतं निरस्यन्नाहाऽऽकाशेत्यादि। एकैकत्वं प्रत्येकनिष्ठभेदाप्रतियोगित्वं ततोऽपरजातेर्द्रव्यत्वावान्तरजातेरभावेऽभावत्त्वे प्रतीत्यर्थः, तथा चाकाशं न द्रव्यत्वव्याप्यजातिमत् आकाशनिष्ठभेदाप्रतियोगित्वात् , यन्नैव तन्नैवं यथा घट इत्याद्यनुमानात् द्रव्यत्वावान्तरजातिनिरासात् न तन्निमित्तकाकाशादिसंज्ञाः । न च हेतोः स्वरूपासिद्धिः, अग्रे प्रतिकर्तव्यत्वादिति भावः । पारिभाषिक्य इति । यद्यप्याधुनिकसङ्केतशालिन्येव संज्ञा पारिभाषिकी प्रकृते च शब्दवत्त्वाद्युपाधिप्रवृत्तिनिमित्तकत्वादौपाधिक्यत्र संज्ञा वक्तुमुचिता, तथाप्युभयावृत्तिधर्मावच्छिन्नसङ्केतवत्त्वमेव पारिभाषिकसंज्ञात्वमित्यभिप्रायेणेदम् । अनुगतोपाध्यवच्छिन्नसंज्ञाया एवौपाधिकत्वोपगमात् । यत्तु—निरवच्छिन्नसङ्केतशालित्वमेव पारिभाषिकत्वम्, आकाशपदाद्धर्मान्तरानवच्छिन्नस्यैव केवलस्य गगनस्योपस्थितेः, अन्यथाऽऽकाशं शब्दवत् इत्यादेः पौनरुक्त्यापत्तेः । न चैवमाकाशत्वमित्यादिप्रयोगो न स्यात् प्रकृत्यर्थतावच्छेदकधर्मस्यैव त्वतलाद्यर्थत्वादिति वाच्यम् । व्यावर्तकधर्मस्यैव त्वतलादिना भावप्रत्ययेनाभिधानात्—इत्याचार्यमतम् । तन्न साधीयः—आकाशादिपदात् स्वरूपतो गगनादेर्भानेऽनुभवविरोधात् कारणबाधाच्च । न च शब्दवत्त्वाद्युपलक्षित एव धर्मिण्याऽऽकाशादिपदस्य शक्तिग्रहात्ताद्रूप्येणान्वयबोधो न तु तदपि शक्यतावच्छेदकमिति वाच्यम् । घटत्वादेरप्युक्तरीत्या शक्यतावच्छेदकत्वहान्यापत्तेः । सहप्रयोगस्याकाशपदवाच्यः शब्दवानित्यर्थकत्वेनाप्युपपत्तेरिति संक्षेपः ।

तत्र-आकाशादित्रिकमध्ये । अत्र शब्दः स्वत एव, संख्यादिस्तु विशेषणान्तरावच्छिन्न एवाऽऽकाशस्य वैधर्म्यमित्यग्रे प्रतिपादयिष्यते ।

अथाऽऽकाशे धर्मिणि प्रत्यक्षं न मानम् तदसत्त्वात् । आरक्तमाकाशं धवलमाकाशमित्यादिचाक्षुषेण प्रभामण्डलस्यावगाहनात् , अन्यथा रूपस्यापि तत्रोपेयत्वे षड्गुणत्वव्याघातापत्तेः । किन्तु शब्दो द्रव्याश्रितो गुणत्वादित्यनुमानमेव तत्र मानमुपेयम् , तच्च पृथिव्यादिद्रव्यवृत्तित्वेनाप्युपपन्नम् नातिरिक्तस्य साधकमतः पृथिव्यादिगुणत्वे क्रमेण बाधकमाह शब्द इत्यादिना । शब्दो न स्पर्शवद्विशेषाणां पृथिव्यादिचतुर्णां गुण इति साध्यार्थः । अत्र हेतुः प्रत्यक्षत्वे सत्यकारणगुणपूर्वकत्वादिति । परत्वापरत्वयोर्व्यभिचारस्य वारणाय सत्यन्तम् , प्रतिनियतेन्द्रियग्राह्यत्वे सतीत्यर्थकम् । तन्मात्रत्वञ्च रूपादौ व्यभिचारितो विशेष्यदलम् । आश्रयसमवायिकारणवृत्तिसजातीयगुणपूर्वकजातीयान्यत्वादिति तदर्थः । हेत्वन्तरमाह अयावदिति । आश्रयनिष्ठध्वंसाऽप्रतियोगिवृत्तिगुणत्वावान्तरजातिशून्यत्वादित्यर्थः । हेत्वन्तरमाह आश्रयादिति । आश्रयाविषयकसाक्षात्कारविषयत्वात् आश्रयाविषयकसाक्षात्कारविषयान्यगुणत्वादिति वार्थः । अथ शब्दो यदि न पृथिव्यादिगुणः कथं तर्हि वीणायां ध्वनिरित्यादिको व्यवहारः ? सत्यम् , शरीरे सुखमित्यादाविव वीणादेरवच्छेदकतामात्रेण तथा प्रत्ययात् ।

उत्तानास्तु कथितहेतूनामप्रयोजकत्वाद्वीणादिगुण एव शब्दः, शब्दविशेषं प्रति वीणात्वादिना हेतुत्वस्यावश्यकत्वे समवायिकारणतायामेव तत्पर्यवसानस्य लाघवेनौचित्यात् । न च वीणागुणस्य कर्णासंनिकृष्टत्वेन श्रावणप्रत्यक्षानुपपत्तिः, वी-

णावच्छेद्यशब्दव्यक्तेरपि तथात्वेन तन्मतेऽप्येतद्दोषस्य तुल्यत्वा-त् । वीचीतरङ्गन्यायेन वीणानवच्छेद्यशब्दस्यैव कर्णावच्छेद्यता-याः सिद्धान्तसिद्धत्वात् । वीणाद्यवच्छेद्यशब्दस्यैव तत्तत्कर्णप-र्यन्तव्यापित्वोपगमे तु वीणासमवेतशब्दस्यैव तत्कर्णाव-च्छेद्यत्वस्वीकारस्याप्यदृष्टस्य संभवात्, तत्तत्कर्णावच्छिन्नश-ब्दस्य ग्रहं प्रति तत्तत्कर्णत्वेन हेतुत्वकल्पनयैवातिप्रसङ्गभङ्गे शब्दप्रत्यक्षं प्रति श्रवणसमवायस्य हेतुतायां मानाभावादि-ति आहुः ।

अथ माऽस्तु पृथिव्यादिचतुर्णां गुणः शब्दः किन्त्वात्मगुण एव भविष्यति तथाऽप्यतिरिक्तमाकाशं नागतमेवेत्यत आह बाह्येति । मानसान्यसाक्षात्कारविषयत्वादित्यर्थः । नात्मगुण इत्यग्रेऽन्वयः । शब्दो न बुद्धिमद्गुण इति तदर्थः, तेनात्मत्वजातिशून्येश्वरीय-गुणत्वेनादीनां न सिद्धसाधनस्यावकाशः । हेत्वन्तरमाह आ-त्मान्तरेति । आत्मानमन्तराकृत्य ग्राह्यत्वात् आत्माविषयकप्रत्य-क्षविषयत्वादिति यावत् । आत्मद्वयग्राह्यत्वादित्यर्थस्तु न युक्तः शब्दमात्रस्य पुरुषद्वयावच्छेद्यत्वेन स्वरूपासिद्धत्वादिति ध्ये-यम् । अत्मन्यसमवायात्--आत्मसमवेतान्यत्वात्, आत्मगुणा-न्यत्वस्यैव साध्यत्वान्नात्र साध्याविशेषः । अहङ्कारेणे-ति । आत्मधर्मिकाश्रयान्यत्वप्रमाविषयत्वादित्यर्थः । अहं न शब्दवान् इति प्रतीतेः प्रमात्वस्य सर्वसिद्धत्वादिति भावः ।

माऽऽस्तामात्मगुणः शब्दस्तथापि दिगादिगुण एव स्यादत आह श्रोत्रेति । शब्दो न दिक्कालमनसां प्रत्येकस्य गुणः श्रो-त्रग्राह्यत्वादिति गुणपदस्यानुषङ्गेण प्रयोगार्थः श्रोत्रपदग्रह-णस्य लौकिकत्वलाभार्थम् । विशेषगुणत्वाच्चेति । चक्षुर्ग्राह्यगुण-त्वव्याप्यजातिशून्यगुणत्वादित्यर्थः । पारिशेष्यात्–पृथिव्याद्य-

ष्टद्रव्यगुणत्वबाधात् । गुणो भूत्वेति । शब्दो द्रव्यस्य गुणो गुणत्वादित्यनुमानमेव पृथिव्याद्यष्टद्रव्यगुणत्वबाधात्तदन्यद्रव्यगुणत्वं साधयदतिरिक्तस्याकाशस्य साधकमित्यर्थः । ननु संख्या पृथिव्यादावपि सत्त्वात्कथमाकाशस्य वैधर्म्यमत आह शब्दलिङ्गादिति । शब्दस्य यल्लिङ्गत्वं व्याप्यत्वं तदविशेषादेकत्वं सिद्धं वैधर्म्यत्वेन, तथा च शब्दव्याप्यसंख्यावत्त्वमेव वैधर्म्यं तच्च न पृथिव्यादाविति भावः । यद्यपि शब्दलिङ्गत्वादित्येव वक्तुमुचितम्, तथापि पृथक्त्ववत् संख्यायामपि कुत्रचित् शब्दव्याप्यत्वमित्यर्थलाभार्थं शब्दलिङ्गत्वाविशेषादित्युक्तम् । अत एव शब्दानुविधाय्येव पृथक्त्वं वैधर्म्यमाह तदनुविधानादिति । तस्य शब्दस्यानुविधानात् व्याप्यत्वात् पृथक्त्वं वैधर्म्यत्वेन सिद्धमित्यर्थः । ननु परिमाण द्रव्यमात्रेऽतिप्रसक्तमतः शब्दसमवायिनिष्ठपरिमाणमेवाकाशस्य वैधर्म्यं वाच्यं तच्चाप्रसिद्धम् गगनस्य परिमाणवत्त्वे मानाभावादत आह विभववचनादिति । महानाकाशस्तथा चात्मेति (७अ० १आ०-२२) सूत्रेण गगनस्य विभुत्ववचनादित्यर्थः । परममहत्त्वं परिमाणं सिद्धमिति पूर्वेणान्वयः। संयोगविभागयोरपि द्रव्यमात्रेऽतिप्रसक्तत्वादाह शब्देति । संयोगविभागपदाभ्यां शब्दासमवायिकारणयोः संयोगविभागयोरभिधानात् संयोगविभागौ वैधर्म्यम् शब्दासमवायिकारणस्य मूर्तेन सह संयोगस्य विभागस्य वा गगनादन्यत्रासत्त्वादिति भावः । यद्यपि प्रागुक्तधर्मिग्राहकमानादेवास्य द्रव्यत्वं सिद्धम् तथापि संयोगादिसत्त्वादपि तत् साधयितुं शक्यत इति तदप्याह अत इति । संयोगादिसत्त्वादित्यर्थः । अत्र हेत्वन्तरमाह गुणवत्त्वादिति । अग्रिमचकारयोजनया गुणवत्त्वाच्चेत्यर्थः । द्रव्यं-द्रव्यत्ववत् । नित्यत्वे प्रमाणमाह अनाश्रितत्वादिति ।

असमवेतभावत्वादित्यर्थः । नित्यमित्यग्रेऽन्वयः । अनाश्रितत्वादित्यस्य विभुत्वादित्यर्थस्तथा च द्रव्यत्वस्यैव साधकोऽयं हेतुरिति यथाश्रुतमेव श्रेय इत्यपि वदन्ति । नित्यत्वे हेत्वन्तरमाह समानेति । कारणमत्र समवायिकारणं तच्चाकाशस्य सजातीयं विजातीयं च नास्ति, न ह्याकाशसजातीयमाकाशान्तरमस्ति नापि तद्विजातीयं पृथिव्यादिकं समवायिकारणम् । तस्येन्द्रियप्रकृतित्वं दर्शयति सर्वप्राणिनामिति । विभुनस्तस्य सर्वप्राणिशब्दोपलब्धिनिमित्तत्वे सर्वेषामेव सर्वशब्दोपलब्धिप्रसङ्ग इत्यत आह श्रोत्रभावेनेति । ननु तथापि स दोषस्तस्य विभुन एव श्रोत्रभावादित्यत आह श्रोत्रं पुनरिति । ननु श्रवणविवरसत्त्वेपि कथं कश्चिद्बधिर इत्यत आह शब्दनिमित्तेति । उपभोग्यवीणादिशब्दा विषयतया निमित्तानि यस्य तादृशोऽयमुपभोगस्तत्साधकाभ्यां धर्माधर्माभ्यामुपनिबद्ध इत्यर्थः । तथा च तादृशधर्मरहितस्य तादृशविवरसत्त्वेपि बाधिर्यमित्याह तस्य चेति ॥

इत्याकाशम् ॥

(से०) क्रमप्राप्तमाकाशमाहाकाशेति । अत्र प्रतिप्रकरणं त्रिषु पारिभाषिकसञ्ज्ञाकथने ग्रन्थगौरव भवतीत्याकाशप्रकरण एव तदुक्तम् । पारिभाषिकत्वं च जातिरूपप्रवृत्तिनिमित्तरहितसंज्ञात्वम् । अत एव भगवता भाष्यकृतापि तत्र हेतुत्वेन जातितोऽपरजात्यभावः इति एकव्यक्तिकसामान्यानङ्गीकारेण तत्र द्रव्यत्वव्याप्यजातेरभावेन न जातिप्रवृत्तिनिमित्तमित्यर्थस्य भाष्ये स्फुटत्वात् । न चैवं सामान्यादावपि पारिभाषिकी सञ्ज्ञा स्यात् । यत्तु प्रवृत्तिनिमित्त विना सञ्ज्ञा पारिभाषिकी सम्प्रत्याचार्यैरुक्तम् तदेकदेशिमतम्, तथाहि आकाशपदस्य धर्मिमात्रशक्तत्वे ततस्तन्मात्रस्मृतिः निर्विकल्पकरूपा स्यात् । न च निर्विल्पकरूपा स्मृतिर्भवत्यविकल्पकाच्चाकाशपदाद् धर्मिमात्रोपस्थितौ तदनन्तरमाकाशपदप्र-

योगानुपपत्तेः निर्विकल्पस्य व्यवहाराजनकत्वात् । न चाप्रवृत्तिनिमित्तस्यापि शब्दाश्रयत्वस्योपस्थितिः, तेन रूपेणोपस्थिते शक्तिग्रहादिति वाच्यम् । सम्बन्धितया स्मारकस्य पदस्यासम्बन्धिनः शब्दाश्रयत्वस्यास्मारकत्वात्, अन्यथा घटत्वादेरपि तथैव स्मृतिसंभवे संज्ञामात्रस्य पारिभाषिकत्वापत्तेः, तस्मात् यथाभाष्यमेव पारिभाषिकत्वपरिभाषोचितेति । नन्वेवं शब्दवत्वादावपि प्रवृत्तिनिमित्तापेक्षा स्यादिति चेत्, तद्गतासाधारणधर्मस्य तत्रापि प्रवृत्तिनिमित्तत्वेनेष्टापत्तेः, अन्यथाऽऽकाशादौ त्वतलादेः प्रयोगो न स्यात् तस्य प्रवृत्तिनिमित्तार्थकत्वात्, निर्बीजलक्षणाया अनुचितत्वात्, शब्दगुणकमाकाशमिति सहप्रयोगस्तु पिककोकिलन्यायेन समाधेयः । एव च यदि शब्दगुणत्व एव प्रचुरप्रयोगः, तदा तदेव प्रवृत्तिनिमित्तम् । यदि चाष्टद्रव्यातिरिक्तद्रव्यत्वादावपि समः प्रयोगः, तदा नानार्थन्याय एव । प्रवृत्तिनिमित्तलक्षण तु शक्यत्वे शक्य वृत्तित्वे च सति स्वभिन्नशक्यानधिकरणत्वम् । अत्र द्रव्ये द्रव्यपदप्रवृत्तिनिमित्ततां वारयितुं स्वभिन्नशक्यानधिकरणत्वमिति । घटद्रव्यस्य द्रव्यपदशक्यत्वेऽपि द्रव्यपदशक्यकपालवृत्तित्वेऽपि च स्वभिन्नद्रव्यत्वलक्षणशक्याधिकरणत्वात् । प्रमेयत्वादौ केवलान्वयिन्यव्याप्तिवारणाय स्वाभिन्नेति, तस्य स्वस्वरूपशक्याधिकरणत्वेऽपि स्वभिन्नशक्यानधिकरणत्वात् । आकृतावतिव्याप्तिवारणाय शक्यवृत्तित्वे सतीति, तस्याः शक्यत्वेऽपि शक्यवृत्तित्वाभावादवयवसयोगरूपत्वेनावयव एव वृत्तः । घटत्वे द्रव्यपदप्रवृत्तिनिमित्ततां वारयितु शक्यत्व इति, तस्य द्रव्यपदशक्यघटवृत्तित्वेऽपि द्रव्यपदशक्यद्रव्यत्वानधिकरणत्वेऽपि द्रव्यपदशक्यत्वाभावात् । नचाभिधेयत्वादावव्याप्तिः स्वभिन्नप्रमेयत्वादिरूपशक्याधिकरणत्वात्, न हि अभिधेयपदप्रवृत्तिनिमित्तमभिधेयत्वं स्वभिन्नस्याभिधेयपदार्थस्य प्रमेयत्वादेरनाश्रय इति । किञ्च आकृतित्वस्यापि शक्यतया तत्राप्यव्याप्तिः, घटपदशक्यत्वावच्छेदकधर्मस्यैव प्रवृत्तिनिमित्तत्वात् । शक्यतावच्छेदकत्वं च शक्यतया सह प्रवृत्तिनिमित्तमात्रगतः स्वरूपसम्बन्धविशेष इति सक्षेपः ।

द्रव्यत्वसाधकतया गुणानाह तत्रेति । नन्वाकाश एव नास्ति कस्य द्रव्यत्वसिद्धिरत आह शब्द इति । अनुमानात्सिद्धिरित्याशयः।

नन्वाकाशः प्रत्यक्ष एव कुतो न भवति? न च रूपाभावात् न चाक्षुष इति वाच्यम् । नील नभ इति प्रत्ययेन रूपवत्त्वादिति चेत् । सुरशिखरिगतेन्द्रनीलमणिप्रभाया एव तत्र भानात् । न चैव नभसि तद्धानानुपपत्ति , तत्रैवारोपात् । न चास्य भ्रमस्य चाक्षुषत्वे नभोविशेष्यप्रकृतत्वानुपपत्तिः बहिरिन्द्रियजबोधे विशेष्ययोग्यतायाःतन्त्रत्वादिति वाच्यम् । बहिरिन्द्रियजबोधे उपनीतस्य विशेषणतया भाननियमेऽपि नभसि नीलिमेति प्रत्ययोत्तरं नीलमत्र इति मानसप्रत्ययस्य सत्त्वात् चक्षुरनुविद्यमानस्य नैल्यग्रह उपक्षयात् । यथा प्रमेयमित्यादिप्रत्यक्षे सामान्यप्रत्यासत्तिसत्त्वेनायोग्यस्यापि विशेष्यतया भान तथा ज्ञानप्रत्यासत्तावपि विशेष्यतया भाने को विरोधः ? ज्ञानप्रत्यासत्त्या बहिरिन्द्रियं विशेषणतयैव भासत इत्यत्र बीजाभावात् । न च विशेषणज्ञानस्य वृत्तत्वात् सविशेषणक एव बोध इति वाच्यम् । मानसेऽपि तथापत्ते । ज्ञातत्वेऽपि विशेष्यविशेषणभावनियामकस्यादृष्टस्यैवोचितत्वात् मानसे तथैव वक्तव्यत्वात् । नभसस्तु नीलत्वे सन्निकृष्टेऽपि नैल्यप्रत्ययापत्ति. । आलोकस्याभिभावकत्वे दूरेऽपि तदनापत्तिः । तस्मात् नीरूपमेव नभस्तथाच न चाक्षुषद्रव्यमिति सिद्धम् ।

परे तु इह पक्षी नेह पक्षीति चाक्षुषेनस्याधारतया काशन इति निखिलपरीक्षकसाक्षिकमाधारान्तरस्य बाधितत्वात्, तथाच नभोभिन्नद्रव्यचाक्षुषे रूपत्व प्रयोजकमिति अनन्यगत्याऽऽयातीत्याहुः।

अत्राचार्याः आलोकमण्डलस्यान्यत्रगमने तत्र पक्षिगमनोमत्रैव(?) पक्षीति व्यवहारापत्ति. पक्षिणस्तत्रैव स्थितौ पूर्वालोकमण्डलस्यान्यत्र गमने तत्रैव पक्षीतिव्यवहारानापत्तिश्च । न चाधिकरणसाजात्यमादाय तथा, आलोकाभावेऽपि इह पक्षीत्यादिप्रतीतेः प्रमातृमात्रप्रमितत्वात् । तस्मान्नालोकमादाय पक्षीत्यादिप्रथा, अपि तु मूर्ताभावमादाय । न चालोकादेर्विद्यमानत्वात् कथ मूर्ताभावस्तत्रेति वाच्यम् । निबिडमूर्ताभावस्याधारत्वात् । न च मूर्ताभावस्यैकतयाऽन्यत्र गतेऽपि पतत्रिणि तत्रैव पक्षीति प्रत्यक्षापत्तिरिति वाच्यम् । भूभागविशेषोऽर्द्धदेशावच्छिन्नमूर्ताभावस्याधारत्वेन प्रतीत्या तस्य चान्यत्राभावात्, आकाशस्तु नाधारतया प्रतीयते तस्य व्यापकतया देशाभेदेऽपि तत्रैव पक्षीति प्रत्ययापत्तिः । न चाकाशभागस्तथा, त-

स्य व्यापकत्वे तद्दोषनादवस्थ्यात्, अव्यापकत्वे मूर्तनया सह पत-त्रिणाऽन्यत्रगमनेतु तत्रैवेति प्रत्ययापत्तेः। नच वे(?)तिप्रत्ययानुरोधेन तस्य भागस्य कल्पने धर्मिग्राहकमानेन तस्य मूर्तस्याप्यवगतेः सि-द्धिर्दूषणानां सिद्धिपराहतत्वादिति वाच्यम्। एतादृशभागकल्पने प्रमाणाभावात् नभसो निरवयवत्वेन निर्भागत्वात् प्रतीतेरन्यथैवो-पपत्तेरित्याहुः।

अत्र वयम्। मूर्ताभावस्य पक्ष्याधारत्वे मानाभावः, तद्-धोभागस्थिते पटे घटे पट इत्येव प्रतीयते न तु घटत्वे पट इति। तथा न जातिराधार इतिवत् भूतले घटाभाववति पटसत्त्वे भूत-ले पट इत्येव प्रतीयते न तु घटाभावे पट इतीति न्यायसाम्यात्। तस्मादिहेति सामान्याकारया प्रतीत्या न मूर्ताभावस्याधारत्वमि-ति। नाप्याकाशस्य, तस्यापि पक्ष्याद्याधारत्वे मानाभावात्, अन्यथा तस्यापि सर्वाधारत्वेन परिगणनापत्तेः। आकाशे पक्षीति प्रत्ययात्त-थेति चेत्। तर्हि स एवोपनति इह पक्षीति प्रत्यक्षे भासतां किमि-त्यरूपस्य प्रत्यक्षत्वाऽङ्गीकार इति न मूर्ताभावस्य सर्वाधारता-स्वीकारः।

वस्तुतस्तु सर्वाधारत्वेनावधारितयोर्दिक्कालयोर्मध्ये इदानीमि-त्यादिप्रत्ययाविलक्षणतया कालमुपेक्ष्य दिशमेवेहेति प्रत्ययः प्रकाश-यति। तस्य व्यापकत्वेऽपि मूर्ताभावस्यैवावच्छेदकविशेषेण व्यव-च्छेद इति, अन्यथाऽऽकाशचाक्षुषतापक्षेऽपि तस्य व्यापकतामाश्रित्य समाधेयतापत्तेः।

परमार्थतस्तु नभसः सर्वाधारत्वे सर्वकारणतापि स्यात्। न चोत्पत्त्यनाश्रयत्वात् न तथा, नभसि पक्षिणोः संयोग उत्पन्न इति प्रत्ययात्। न चासौ भ्रमः, आकाशे पक्षीत्यादिप्रत्ययस्यापि तथा-त्वापत्तेरित्याद्यालोचयामः।

शब्दस्तावन्न सामान्याद्यात्मकः, कार्यत्वस्योत्पन्नः कोला-हल इत्यादिबुद्धिसिद्धत्वादिति हेतुः। प्रत्यक्षश्च शब्दस्य स इति नासिद्धिः। बाह्यपदश्चेन्द्रियस्य विशेषणं नातो मनसापि ग्रहादसिद्धिः। न चैकमात्रेन्द्रियग्राह्ये प्रभाकर्मणि व्यभिचारः, प्रभाया अपि उक्तनयेनाप्रत्यक्षतया तत्कर्मणोऽप्यप्रत्यक्षत्वात्। एवं प्रत्यक्षस्य शब्दस्य कर्मभिन्नत्वे सिद्धे तद्दृष्टान्तेन शब्दत्वहेतुम-

तीन्द्रियस्यापि कर्मभिन्नत्वमनुमेयम् । नाप्यभावो निःप्रतियोगिकत्वात् । निःप्रतियोगिकत्वं च सप्रतियोगिकत्वेन कदाप्यनुल्लेखात् । न द्रव्यं रूपाग्राहकेन्द्रियवेद्यत्वात् रसवत् सामान्यगुणस्याश्रयाग्राहकेनेन्द्रियेणाग्रहणादिति परिशेषेण विशेषगुणत्वे सिद्धे स्पर्शवद्द्रव्यस्य तत्प्रतिषिध्यते—शब्दो न स्पर्शवत्विशेषगुण इति । अत्र हेतुः प्रत्यक्षत्वे इति । साध्ये यदि प्रतियोगिनि विशेषपदं नोपादीयेत तदा घटपटद्वित्वे व्यभिचारः, यदि स्पर्शवत्पदं नोपादीयते तदा सुखादौ । हेतौ प्रत्यक्षत्वे सतीत्यनुपादाने परमाणुगुणैर्व्यभिचारः । प्रत्यक्षत्वादित्युक्तौ घटरूपादौ । कारणगुणपूर्वकत्वे हि संख्यादिशब्दानां संख्याद्युत्पत्त्यनन्तरमेव तत्र शब्दः प्रतीयेत रूपादिवत् कारणप्रक्रमेण तत्रोत्पादविलम्बाभावात् । न चोत्पद्यत एव भवदभिमतोत्पादकस्य तु व्यञ्जकत्वस्याभावान् न प्रतीयते इति वाच्यम् । दण्डादिसंयोगस्य व्यञ्जकत्वे तदपगमे शब्दोपलम्भानापत्तेः, उपलभ्यते हि दण्डादिसंयोगविगमेऽपि शब्दः । उत्पादकत्वे तु तदपगमेऽपि उपलंभ उपपद्यत एव । किञ्च वर्णानां स्पर्शवद्गुणत्वपक्षे मुखमाधारो वाच्यो व्यंग्यत्वे च तेषामेकव्यञ्जकसत्त्वे सर्वेषामुपलम्भप्रसङ्गः । न च प्रतिनियतव्यञ्जकव्यंग्यत्वात् नैकाभिव्यक्तिसमये पराभिव्यक्तिरिति वाच्यम् । तथाहि वर्णा न प्रतिनियतव्यञ्जकव्यंग्या अन्यूनानतिरिक्तदेशत्वे सति समानेन्द्रियग्राह्यत्वात् घटैकत्वपरिमाणवदित्यनुमानात् । अत्र सत्यन्तमात्रे घटरूपरसयोर्व्यभिचारश्चक्षुरसनलक्षणप्रतिनियतव्यञ्जकव्यंग्यत्वात्, समानेन्द्रियग्राह्यत्वाभावाच्च विशिष्टे हेतौ न व्यभिचारः । सत्त्वयोर्व्यभिचारवारणाय सत्यन्तम् । तयोर्गुणवत्त्वव्यक्तिमात्रलक्षणप्रतिनियतव्यञ्जकव्यंग्यत्वेऽपि द्रव्यमात्रवृत्तित्वेन द्रव्यादिवृत्तित्वेन च न्यूनातिरिक्तदेशवृत्तित्वादिति । इदानीमेकधर्मिकयोर्भिन्नकालोत्पन्नयोर्द्वित्वयोर्व्यभिचारो भिन्नचक्षुःसंयोगघटितसमवायव्यञ्जकत्वात्, एकवस्तुप्रतियोगिकयोर्मूलशाखावच्छिन्नसंयोगयोश्च व्यभिचारः—तत्र तदवच्छिन्नभिन्नचक्षुःसंयोगव्यंग्यत्वात् तत्समानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकत्वस्य न्यूनवृत्तित्वस्य तदवच्छिन्नप्रतियोगिताकान्योन्याभावसमानाधिकरणत्वस्याधिकवृत्तित्वस्य चाभावेनान्यूनानतिरिक्तदेशवृत्तित्वात् समानेन्द्रियग्राह्यत्वाच्च हेतुसत्त्वादिति चेत् । न । एकावच्छेदेनेति विशेष-

णप्रक्षेपाद्वित्वयोः काललक्षणावच्छेदकभेदात् संयोगयोः शाखादि-लक्षणावच्छेदकसत्त्वात् । नन्वेवमेकावच्छेदेन विद्यमानत्वे सति समानेन्द्रियग्राह्यत्वादित्येव हेतुरस्तु व्यर्थमन्यूनानतिरिक्तदे-शत्वमिति चेन्न । शाखावच्छिन्नयोः श्येनतच्चरणसंयोगयो-र्व्यभिचारात् तच्चरणसंयोगयोः चक्षुःप्रतियोगिकयोर्भिन्नयोः संयुक्तसमवायघटकत्वेन व्यञ्जकत्वात् उक्तविशेषणोपादाने च न व्यभिचारो निरुक्तन्यूनातिरिक्तदेशवृत्तित्वात् । न चार्द्ध-निखातवंशपरिमाणैकत्वयोर्व्यभिचारः एकत्वग्रहणे एकत्वव्यञ्जकस्य परिमाणाव्यञ्जकत्वात् इति वाच्यम् । परस्परव्यभिचारिव्यञ्जक-स्य व्यंग्यत्वाभावेन घटादिना दण्डस्य संयोगजन्यत्वे सिद्धे सिद्ध-मकारणगुणपूर्वकत्वमिति । न च यस्याग्निसंयोगेन परमाणौ रूपा-द्युत्पत्तिस्तत्कारणगुणप्रक्रमेणान्त्यावयविनि तथा वाय्वादिसंयोगेन शङ्खादौ शब्दोत्पत्तिरपि स्यादिति वाच्यम् । पार्थिवविशेषगुणस्य स-र्वस्य पाकप्रयोज्यत्वनियमात् । तथा च शब्दो न पृथिवी-विशेषगुणः पाकाप्रयोज्यत्वात् । न च दवदहनदह्यमानविपिनाद्-भागासिद्धिः, शब्दान्तरं पक्षीकृत्य प्रकृतानुमाने तत्पक्षीकृत्य तद्दृष्टा-न्तेन पृथिवीगुणत्वाभावसाधनात्, तत्र च शब्दत्वस्यैव हेतुत्वात् । एवं चैतस्य दृष्टान्तत्वेन जलादिवृत्तित्वेन शङ्कितशब्दानामथ ते शब्दा न स्पर्शवद्विशेषगुणाः शब्दत्वात् प्रकृतशब्दवदित्यनुमानविषयते-ति हृदयम् ।

द्वितीयो हेतुः प्रत्यक्षत्वे सत्ययावद्द्रव्यभावित्वादिति ! अत्र परमाणुगुणानां पाकनाश्यतया व्यभिचारवारणाय प्रत्यक्षत्वे स-तीति । घटादिद्वित्वाभावे द्वावेव तद्वारणाय सुखादौ (?) साध्यप्रति-योगिविशेषणेषु पूर्वोक्तो न्यायः । तृतीयो हेतुराश्रयादन्यत्रोपलब्धे-श्च इति । शब्दो न शङ्खादिविशेषगुणः शङ्खाद्यसम्बद्धेन्द्रियग्राह्यत्वात् सुखवत् । अत्र साध्ये विशेषपदस्य न कृत्यम् । अक्षरार्थस्त्वाश्रयादाश्र-यत्वेनाभिमताच्छङ्खादेरन्यत्र दूरस्थितेनेन्द्रियेणोपलम्भादिति शङ्खा-नां हीन्द्रियेण संयुक्तसमवायेन ग्रहणम्, न च दूरस्थयोः संयोगः सम्भवतीति भावः । एवं शङ्खादीनां गुणो न भवति शङ्खाद्यवयव-गुणापूर्वकत्वात् शङ्खादिषु सत्सु निवृत्तेश्चेति सिद्धम् । ननु आ-काशगुणत्वेऽपि भेर्याद्यवच्छेदेनोत्पन्नशब्दः कथं गृह्यते श्रवणास-

म्बन्धादिति चेत् । वीचीतरङ्गन्यायेन कदम्बगोलकन्यायेन वा यः शब्दः कर्णशष्कुल्यवच्छिन्ने नभस्युत्पन्नस्तस्यैव परिच्छेदात् । यस्तु तत्रैव प्रथममुत्पन्नस्तत्र नानयोर्न्याययोः प्रचारः । अनयोश्च न्याययो-र्व्यवस्थितो विकल्पः । प्रागभावपवनयोरैक्ये वीचीतरङ्गन्यायः तद्भेदे तु कदम्बगोलकन्यायः । ननु वायुगुण एव भवतु शब्दः, तथाच तत्र कारणगुणपूर्वकत्वं यावद्द्रव्यभावित्वम् श्रवसः सम्बन्धश्च सम्भाव्यते इति चेत् । श्रोत्रस्य रूपादिषु यद् बहिरिन्द्रियं यद्गुण ग्राहक तद्गुणवदिति व्याप्त्या शब्दवत्त्वे शब्दस्य वायवीयत्वे वाय-वीयत्वापत्तौ त्वगिन्द्रियाभेदप्राप्तौ स्पर्शशब्दग्राहकत्वे नानार्थत्वापत्तौ बाह्यत्वेऽपि एकप्रकृतिकत्वेऽपि अदृष्टवैचित्र्यात् त्वक्श्रवसोर्भेदे सर्वेन्द्रियाणामेकप्रकृतिरिति दिक् ।

आत्मगुणत्वाभावं साधयति बाह्येति । गन्धादिविलक्षणानामा-त्मगुणानामान्तरत्वादित्यर्थः । अपि च नात्मगुणः आत्मान्यसमवा-यात् गन्धादिवत् । तत्रासिद्धिशङ्कायामाह आत्मान्तरग्राह्यत्वा-दिति । आत्मान्तरात्मनोऽन्तर्मध्ये आत्मन्यग्राह्यत्वादात्मगुणाना-मात्मनि ग्रहणात् । अत्राप्यसिद्धिसम्भावनायामाह अहङ्कारे-णेति । अहत्वसामानाधिकरण्येन अप्रतीयमानत्वात् इत्यर्थः । वीणा वाद्यते इत्याद्यनुभवादहं वाद्य इत्याद्यननुभवाच्च अहन्त्वसा-मानाधिकरण्येनाप्रतीयमानत्वात् तत्तदात्मन्यसमवायः तत आत्म-गुणत्वाभाव इति भावः । ननु अहं नदामीति व्यवहारादहन्त्वसा-मानाधिकरण्य तत्र प्रतीयत एवेति चेन्न । कृतावेव तत्प्रत्यायकत्व-स्य तत्र प्रतीतेः कृतेरेव प्रत्ययात् । दिगादिगुणत्व वारयति श्रोत्रपदस-माभिव्याहारेण ग्राह्यत्वादित्यनेन प्रत्यक्षत्वं प्राप्यते । तथा च न दि-गादिगुणः शब्दः प्रत्यक्षत्वादित्यनुमानम् । विशेषगुणाभावात् इति भा-ष्यपाठानुरोधेन न दिक्कालमनसामिति वाक्यशेषो शेषाद्याचार्यै-रुक्त. तत्र च वैयधिकरण्यविशेषगुणाशङ्कया शब्दो न दिक्कालमनो-गुणो विशेषगुणत्वात् इत्युक्तम् । पारिशेष्यादिति । ननु परिशेषेण तदाश्रयाष्टद्रव्यातिरिक्तत्वं सिध्यतु द्रव्यत्वसिद्धिस्तस्य कुत इत्य-त आह गुणो भूत्वेति । शब्दो द्रव्याश्रितो गुणत्वादित्यनुमानोत्तरं द्रव्याश्रितशब्दोऽष्टद्रव्यातिरिक्ताश्रितोऽष्टद्रव्यानाश्रितत्वात् इत्य-नुमानेनाष्टद्रव्याश्रितत्वं सिध्यतीत्यर्थः । यद्वा प्रथमानुमानानन्तरं

शब्दाश्रयो द्रव्यमष्टद्रव्यातिरिक्तं तदवृत्तिधर्मवत्त्वादित्यनुमानो-त्तरमष्टद्रव्यातिरिक्तद्रव्यसिद्धौ शब्दो अष्टद्रव्यातिरिक्तद्रव्याश्रितो-ऽष्टद्रव्यानाश्रितत्वे सति गुणत्वात्, यन्नैवं तन्नैव यथा गन्धादिरि-ति व्यतिरेकीति भाव.। स चाकाशः पृथिव्यादिवन्न नानेत्याह शब्देति। शब्देन हि आकाशः सिध्यति, स चैकेनापि विभुना सर्वत्रोपपद्य-त इत्यनेकसिद्धिर्गौरवापहतेत्यर्थः। नन्वेकेनाकाशेनोत्पत्तिः तस्य परममहत्त्वे स्यात् तदेव कुतः इत्यत आह विभवेति। विभववान् महानाकाशस्तथाचात्मेति सूत्रादित्यर्थः।सर्वमूर्तसंयोगित्वरूपविभुत्वेन तस्य परममहत्त्वं सिध्यतीति सूत्रार्थः। विभुत्वसिद्धिस्तु स्पर्शशून्य-द्रव्यत्वादित्याशयः। मनोभिन्नत्वे सतीत्यपि विशेषणात्, तेन न मनसि व्यभिचारः। परममहत्परिमाणमित्यस्य परममहत्त्व परिमा-णमित्यर्थः। तेन विभिन्नपदत्वाभावः। परममहतः परिमाणमिति वा सामानाधिकरण्य एवाऽऽत्वविधानादित्याचार्याः। वर्धमानोपाध्या-यास्तु कर्मधारयेऽपि नात्व महच्छब्दस्यैवाऽऽत्वविधानात्। अत्र तु तदन्तस्य परममहच्छब्दस्य विद्यमानत्वात्। तत्रैव विधौ तदन्तवि-धिः यत्रोत्तरपदापेक्षाया अभावात् आनास्ति यथा जराशब्दस्य ज-रसादेशे तत्र जराशब्द इव तदन्त जराशब्देऽपि तदादेशसत्त्वात् अत्र विधौ उत्तरपदापेक्षाया अभावादात्वविधा तु साऽपि(?)नहि केवलस्य महच्छब्दस्याऽऽत्वं विधत्ते। किन्तु सोत्तरपदस्य, नहि यथा महाघट इति भवति तथा महेति। उत्तरपदानपेक्षायामपि तद्विधौ 'इष्टकेषी-कामालानां चिततूलभारिषु (पा०अ०६-आ०३सू०६५) इत्यत्र विश-ष्य तदन्तविधिविधानवैयर्थ्यप्रसङ्गः। तस्मादुत्तरपदसापेक्षतयाऽत्र तदन्तविधौ व्युदस्ते प्रतिप्रसवतया विशेषविधान घटते। तदन्त-विधे. सार्वत्रिकत्वे तु विघटित भवति। ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्तीति परिभाषया प्रकटमेवोत्तरपदापेक्षया तदन्तवि-धिव्यासेधादित्यभिप्रायकमाहु।

अयमत्र प्रघट्टकतात्पर्यार्थो द्रव्यत्वेन तावत्संख्यापृथक्परिमा-णानि प्राप्तानि तत्र च नानात्वे गौरवापत्त्या एकतायामागताया-मणुत्वतो दश दिक्षु युगपच्छब्दोत्पादकत्वानुपपत्त्या महत्वसि-द्धौ पृथिव्यादिवदपकृष्टमहत्त्वसत्त्वे नित्यत्वापत्तौ कार्यकारणभे-दे नानात्वक्षत्याऽनन्यगत्या परममहत्त्वमहतामिति। एवं चात्मदृष्टान्तेन

कथं परममहत्वं सिद्ध्येत् । न च प्रत्यक्षगुणवत्त्वानुरोधेन परममहता तस्य महत्त्वमात्र एव विश्रामादिति रिक्तम्, तथा च लाघवादेकत्व-सिद्धिः । तदनुपपत्त्या चैकपृथक्परममहत्त्वयोः सिद्धिरिति संक्षेपः ।

यद्यपि विभववचनादेव संयोगः सिद्धः तस्मिंश्च सिद्धे विभागो-ऽपि तयोः समनियमात्, तथाप्युपायस्येति न्यायेनोपायान्तरमाह श-ब्देति । संयोगाद्विभागाच्छब्दाच्च शब्दस्य निष्पत्तिरिति सूत्रादित्यर्थः । द्वितीयादिर्हि शब्दः शब्दजः प्रथमं प्रत्यसमवायिकारणमपेक्षितं तच्च संयोगाद्येवेति भावः । एवं च सङ्ख्यादिषु विभागान्तेषु सिद्धेषु न व्यापकनिवृत्त्या धर्मिग्राहकप्रमाणसिद्धस्य द्रव्यत्वस्य निवृत्तिरि-त्याह अत इति । गुणवत्त्वात्–सङ्ख्यादिगुणवत्त्वात् । ननु द्रव्यस्य विभुद्रव्यत्वं वक्तव्यम् तच्चानाश्रितत्वव्याप्यं, न च तदस्तीति व्या-पकनिवृत्त्या तन्निवृत्तिरत आह अनाश्रितत्वादिति । सङ्ख्यादिरूप-गुणसत्त्वाद् द्रव्यमनाश्रितत्वसत्त्वाच्च विभुद्रव्य व्यापकनिवृत्तेर-भावादिति भाव । ननु द्रव्यत्वे नित्यत्व स्यात् , न च तत्र प्रमाण-मस्तीत्यत आह समानेति । आकाशं प्रति आकाशान्तरं न कार-णम् , एकत्वेन तदभावात् । नापि विजातीयं, द्रव्यस्य विजाती-यसमवायिकारणत्वाभावादित्यर्थः । निष्कारणकभावस्य च नित्य-त्वं सिद्धमेवेति हृदयम् । शब्दाश्रयतया परार्थत्वं प्राप्तमेव शब्दा ग्राहकतयात्या * * * अत्र पत्रत्रय त्रुटिः (१)

(व्यो०) इदानीमाकाशस्योद्देशवतो लक्षणपरीक्षार्थं प्रकरणम् ।

आकाशकालदिशामेकैकत्वादपरजात्यभावे पारिभाषिक्यस्तिस्रः संज्ञा भवन्तीति । एताश्च समुच्चयं विना आकाशादीनां लक्षणमित्याहि आकाश कालो दिगिति यथासंख्यम् । तथाहि–इतिशब्दस्य प्रत्येकम-भिसम्बन्धादाकाशमिति संज्ञा आकाशे काल इति काले दिक्संज्ञा दिशि न तिस्रोऽप्येकस्मिन्निति । अथ कस्मादिमाः पारिभाषिक्यः ?

(१) इत परं कालग्रन्थस्य कियदंशपर्यन्तं सेतुर्नोपलभ्यते मुख्यादर्शभूते एकमात्र अलवरपुस्तकालयस्थसेतुपुस्तकप्रतिलिपौ-पत्रत्रयत्रुटिर्मध्य एव यथालिखिताऽस्ति तथैवात्र मुद्रितमन्य स्मिंश्च काशिकराजकीयसरस्वतीभवनस्थेऽपि पुस्तके एवमेवोपलभ्यत इति सं० ।

द्रव्यगुणकर्मात्मकस्य निमित्तस्याभावात् । अथाऽऽकाशत्वादि सामा-
न्यलक्षण निमित्तं भविष्यतीत्याह अपरजात्यभाव इति । अपरा हि
जातिः द्रव्यत्वापेक्षयाऽऽकाशत्वकालत्वदिक्त्वरूपा । सा तु न स
म्भवत्येव, आकाशादेरेकत्वात्सामान्यस्य च नानाधिष्ठानत्वादिति ।
नचाऽऽकाशादीनां पारिभाषिक्यः तिस्रः सञ्ज्ञा भवन्तीति साधर्म्या-
भिधान न सम्बद्धम्, वैधर्म्यावसरेण सञ्ज्ञानां परस्परव्यावृत्ततया
वैधर्म्यरूपत्वादेकत्राभिधान च शास्त्रस्य सङ्ग्रहरूपत्वादिति । तथा
ऽऽचाकाशमितिसंज्ञा अनादिकालप्रवाहायत्ता नान्यत्र सम्भवतीत्य-
साधारणत्वाल्लक्षणम् । एतच्च विशेषणमर्थाल्लभ्यते । तथा ह्याका-
शमितरस्माद्भिद्यते अनादिकालप्रवाहायाताकाशशब्दवाच्यत्वात्,य-
स्त्वितरस्मादनाकाशादेर्न भिद्यते, न चासावेवम्,यथा क्षित्यादि, न च
तथाऽऽकाशस्तस्माद्भिद्यते इति । ननु पारिभाषिक्यः सञ्ज्ञा न सम्भ-
वन्त्येव निमित्तचतुष्टयाभावस्यैव निमित्तत्वादिति चेत् । तथाहि–यत्र
द्रव्यगुणकर्मसामान्यात्मक निमित्तं न सम्भवति तत्रैव प्रवर्तते नान्य-
त्रेति तदभावो निमित्तम् । नैतदेवम् । स्वानुरक्तप्रत्ययहेतोर्निमित्तस्यात्र
विवक्षितत्वात् । यथा हि द्रव्यगुणसामान्यानुरक्तो दण्डीत्यादिव्यव-
हारः तथा च नायमाकाशादिव्यवहारस्तदभावानुरक्त इति पारि-
भाषिक्य एव । पूर्वं हि द्रव्याणां समवायित्वं चोक्तम् । तत्र कैर्गुणैः
गुणवत् केषामुत्पत्तौ समवायिकारणं किञ्च गुणात्मकं लक्षणमित्या-
ह–तस्य गुणाः शब्दसङ्ख्यापरिमाणपृथक्त्वसयोगविभागा इति ।
एतैर्गुणै गुणवदत्र केषांचिदुत्पत्तौ समवायिकारणं शब्दश्चासाधा-
रणत्वाल्लक्षणमिति । ननु सर्वमेतदाश्रयासिद्धमाकाशसद्भावे
प्रमाणाभावात् । न । प्रत्यक्षेणानुपलम्भेपि अनुमानेन सद्भावसिद्धेः ।
किमनुमानमित्याह शब्द इति । तथाहि–शब्दः क्वचिदाश्रितः गुण-
त्वात्,यो यो गुणः स सः क्वचिदाश्रितो यथा रूपादिस्तथा चायं गुण-
स्तस्मादाश्रित इत्यर्थः । अथ पृथिव्यादेर्गुणो भविष्यतीत्याह–न स्पर्शव-
द्विशेषगुणः शब्दः अस्मदादिप्रत्यक्षत्वे सत्यकारणगुणपूर्वकत्वात्,यो
योऽस्मदादिप्रत्यक्षत्वे सत्यकारणगुणपूर्वकः सस स्पर्शवतां विशेषगुणो
न भवति यथा सुखादिस्तथाचाय यथोक्तसाधनस्तस्मात् स्पर्शवतां
विशेषगुणो न भवतीति । ननु चात्र विशेषगुणप्रतिषेधे साध्ये
सामान्यगुणप्राप्तिः विशेषप्रतिषेधस्य शेषाभ्यनुज्ञायां सामर्थ्योपल-

ध्येः, अथ सामान्यगुणप्रतिषेधस्तथापि विशेषगुणप्राप्तिरिति । नैतदेवम् । प्रतियोग्यपेक्षत्वात्पक्षादिव्यवस्थायाः । तथाहि–परेण क्षित्यादिविशेषगुणवत्त्वं शब्दस्याभ्युपगतं तस्यैव प्रतिषेधः, सामान्यगुणत्वञ्च नेष्टमेव । शेषाभ्यनुज्ञा तु यत्रोभयोः प्रमाणेन प्रसिद्धिः तत्रैकप्रतिषेधेऽन्यस्याप्रतिषिद्धस्यावस्थानम् । यथा दर्शनं सव्येतरचक्षुर्भ्यां संपाद्य दृष्टमित्येकप्रतिषेधेऽन्यस्याप्रतिषेधादवस्थानमिति । न चैवं शब्दस्य क्षित्यादिसामान्यगुणत्वं परस्य सिद्धमित्यदूषणमेतत् । अत एव यद्यपि संयोगविभागादेरस्मदादिप्रत्यक्षत्वे सत्यकारणगुणपूर्वकत्वम् । तथापि स्पर्शवद्विशेषगुणत्वं नास्तीति सपक्षेऽन्तर्भावादनैकान्तिकत्वाभावः । रूपादयश्च विपक्षास्ते च कारणगुणपूर्वका इति साधनशून्या एव । तथापि पार्थिवपरमाणुरूपादयोऽकारणगुणपूर्वकाः स्पर्शवतां विशेषगुणाश्चेति व्यभिचारस्तदर्थमस्मदादिप्रत्यक्षत्वे सतीति विशेषणम् । ते तु योगिनामेव प्रत्यक्षा इति । अस्मदादिप्रतिपादनाय शास्त्रस्यारम्भादस्मदादिविशेषणं तु लभ्यते । अन्ये तु संयोगादिभिर्व्यभिचारपरिहाराय शेषाभ्यनुज्ञावाक्यादुद्धृत्य विशेषपदं हेतुपदेन सह सम्बन्धयन्ति । तथाहि–न स्पर्शवतां गुणः शब्दोऽस्मदादिप्रत्यक्षत्वे विशेषगुणत्वे च सत्यकारणगुणपूर्वकत्वात् सुखादिवत् । अत्र हि सामान्यतो विशेषयोगात् सामान्यप्रतिषेधाद्विशेषप्रतिषेधो भवत्येव, ब्राह्मण्यनिषेधाद्राजसनादिप्रतिषेधवदिति । अत्र च प्रतिज्ञावाक्ये समासान्तर्गतं पदं हेतुपदेन कथं सम्बध्यत इति चिन्त्यम् । नन्वकारणगुणपूर्वकत्वादिति हेतुरसिद्धः परदृष्ट्या संयोगाद्विभागाच्छब्दाच्च कारणगुणाच्छब्दस्य नित्यत्वाभ्युपगमात्, तथाहि–शब्दस्य कारणमाकाशं तद्गुणाश्च संयोगादयः कारणगुणास्ते कारणमस्येति कारणगुणपूर्वकत्वम् । नैवम् । अभिप्रायापरिज्ञानात् । तथा चायमर्थो विवक्षितः । समवायिकारणेषु गुणाः कारणगुणास्ते पूर्वं कारणं यस्य गुणस्य असौ कारणगुणपूर्वको यथा पटरूपादिस्तन्तुरूपादिपूर्वक इति । न चैवं शब्दस्याकाशस्याकार्यत्वेन समवायिकारणगुणाभावादिति । अथ स्वदृष्ट्या कारणगुणपूर्वकत्वम्, तथा च भेरीशब्दस्तदवयवशब्दपूर्वकस्तथा शङ्खशब्दश्चेति । न । तेषामनुपलम्भात्, तथाहि–शङ्खशब्दकाले शङ्खावयवशब्दा नानुभूयन्त इति, यथा पटरूपानुभव-

काले तन्तुरूपाणामनुभव इति । अथाभिभूतत्वादनुपलम्भः, तन्नास्तित्वे प्रमाणाभावात्। तथाहि–तदवयवशब्दाश्चिरोत्पन्ना एवावयविनि शब्दमारभन्त इति न प्रमाणमस्ति । यदि वाऽवयवशब्दानामवयविशब्दैरभिभूतत्वात् विद्यमानानामप्यनुपलम्भस्तदभावे सति तदुपलम्भः स्यात्, रासभशब्दाभावे वीणाशब्दस्येव । यथाहि वाद्यमानायां वीणायां रासभसन्निधौ विद्यमानस्यापि वीणाशब्दस्याभिभवादनुपलम्भः पुनः अभिभावकाभावात् उपलम्भो दृष्टो, न चैवम् अवयविशब्दाग्रहेऽपि अवयवशब्दानामस्ति संवेदनम् । न च कारणगुणपूर्वकेषु कारणाभिभावकत्वं दृष्टं तथा शब्दाभिभवेपीति तु शब्दस्य ग्रहणात् मन्दस्याग्रहणमिति। न चावयविशब्दोपलम्भकाल एव अवयवशब्दानामग्रहणं पूर्वमपि अनुपलम्भात् । यावद्द्रव्यभावित्वं च कारणगुणपूर्वकानाम्। न च सत्कार्यवादबलेनावयवावयविशब्दानां सद्भावेपि व्यञ्जकाभावादनुपलम्भ इति वाच्यम् । तन्निषेधस्य वक्ष्यमाणत्वात् । न चावयवशब्दानामवयविशब्दवैलक्षण्यादसमवायित्वं वाच्यम् । तस्य हि समानजातीयेष्वत्यन्तविजातीयेषु च दर्शनात् । यथाहि कारणगताद्रूपाच्छुक्लमात् कार्ये तथाभूतं रूपमेवं रसादिष्वपीति। तथाऽत्यन्तविजातीयस्यासमवायिकारणत्वम्।यथा प्रचयाख्यः संयोगः संख्या च परिमाणोत्पत्तौ । न चैव शब्दः, तथाहि–भेरीशब्दो गभीरस्तदवयवशब्दाश्च तद्विधर्माण इत्येवं शङ्खादिशब्देष्वप्यूह्यम। न च सर्वस्य सुखदुःखमोहात्मकत्वात् सुखादिदृष्टान्तात् साध्यसाधनमिति मन्तव्यम् । प्रधानवादप्रतिषेधात् । सुखादीनां च आत्मगुणत्वात् । तथा न स्पर्शवतां विशेषगुणः शब्दोऽस्मदादिप्रत्यक्षत्वे सत्ययावद्द्रव्यभावित्वात् । यो योऽस्मदादिप्रत्यक्षत्वे सत्ययावद्द्रव्यभावी स स स्पर्शवतां विशेषगुणो न भवति, यथा सुखादिः, तथा चायमस्मदादिप्रत्यक्षत्वे सत्ययावद्द्रव्यभावी तस्मान्न स्पर्शवतां विशेषगुण इति। ये च स्पर्शवतां विशेषगुणाः तेऽस्मदादिप्रत्यक्षत्वे सत्ययावद्द्रव्यभाविनो यथा रूपादयः । अत्रापि पार्थिवपरमाणुरूपादिव्यवच्छेदार्थमस्मदादिप्रत्यक्षत्वे सतीति पदम्। न च संयोगादिभिर्व्यभिचारः, पूर्वोक्तन्यायात्। नापि यावद्द्रव्यभावित्वम शब्दस्य, रूपादिवदप्रतीयमानत्वात् । तथाऽऽश्रयादन्यत्रोपलब्धेश्चेति हेत्वन्तरञ्च समुच्चय, न परं पूर्वोक्ताभ्यामाश्रयादन्यत्रो-

पलब्धेश्च न स्पर्शवद्विशेषगुणः शब्द इति । ननु शब्दस्य यथाऽऽका
शमाश्रयस्तस्मादन्यत्रोपलब्धिरसिद्धा तत्रैवोपलम्भात् । न पराभ्यु
पगमेन भेर्यादिराश्रयशब्देनाभिधानात् । तथाहि-भेरीशब्दस्तद्गुणो
न भवति ततोऽन्यत्रोपलभ्यमानत्वात्, यो यस्ततोऽन्यत्रोपलभ्यते
स स तद्गुणो न भवति, यथा सुखादिः, यश्च तद्गुणः स
तत्रैवोपलभ्यते यथा रूपादिः, न च तथा शब्दस्तस्मात् तद्गुणो
न भवतीति । नन्वसिद्धमेतत् शब्दस्य तत्रैवोपलम्भात् । तथा-
हि-भेर्यां शब्द इति प्रतिभासो दृष्टो रूपवत्, न चान्यथा भवितु
मर्हतीति । न च श्रोत्रस्य तत्रासन्निधानमहङ्कारित्वेन व्यापकस्य तत्र
सद्भावात् । नापि सर्वशब्दानामुपलब्धिप्रसङ्गः, अदृष्टवशेन नियत
देश एव वृत्तेरात्मलाभादिति । अव्यापकस्य च वा तद्देशं यावत्परि-
माणाभ्युपगमः । यत्र चाश्रयप्रतिभासाभावः तत्र शब्दस्यैव स्वाश्रय
परिमाणद्वारेण श्रोत्रदेशमागमनम् । तदेतदसाम्प्रतम् । इह भेर्यां
शब्द इति प्रतिभासस्य सन्तानानुमानद्वारेणाधिष्ठानदेश एव प्रतिभा-
सात् । ननु चात्र विशेषहेतोरभावान्निश्चयाभाव एव, किम् तत्स्थ-
स्यैव शब्दस्योपलम्भः सन्तानानुमितस्य वेति । न तत्स्थस्यैवो-
पलम्भः, क्वचिदाश्रयवियुक्तस्यापि श्रोत्रदेशे प्रतिभासात् । न चैवं
स्पर्शवतां गुणाश्चाश्रयवियुक्ता गृह्यन्त इति नासिद्धत्वं हेतोः । अथ
स्पर्शवद्गुणत्वेऽपि गन्धस्येव तदाश्रयागमनात् उपलम्भो भविष्य-
तीति चेत् । न । गन्धस्य स्पर्शवत्गुणत्वप्रसिद्धावाश्रयाविच्छेदेन
घ्राणाधिष्ठानदेश एव प्रतिभासात् सूक्ष्मस्य तदाधारस्यागमन
युक्तम् । न चैवं शब्दस्य तथा सूक्ष्मद्रव्याधारस्य भेरीशब्दस्याग-
मनमेव न युक्तम्, भेर्यां समवेतस्योत्पादात् । न ह्यन्यत्र समवेत-
मन्यत्र समवैतीति । समवेत्यवादेन त्वागमनेपि तदवयवशब्दा भेरी
शब्दाश्चेति प्रतिभास एव प्रसङ्ग, सूक्ष्मद्रव्यसमवायस्याविशेषात् ।
तथा भेरीदण्डाभिघाताद्भेर्यामुत्पन्नः शब्दो नागच्छत्येवाश्रयस्य तत्रा
वस्थानात् । तदवयवेषु च सूक्ष्मेषु ये जाताः शब्दास्तदाश्रयस्याग
मनात् आगच्छन्तीत्यभ्युपगमे भेर्यादिगम्भीरध्वनेरश्रवणमेव स्यात् ।
न चाहङ्कारिकत्वात् व्यापकस्य भेर्यादिदेशे वृत्तिर्घटत इति मन्तव्यम्।
पूर्वमेवाहङ्कारिकत्वप्रतिषेधात् । न च श्रोत्रेण भेर्यादिदेशग्रहणम् स-
म्भवतीति तदवच्छेदेन शब्दस्य ग्रहणाभावप्रसङ्गः । अथ प्रसिद्धसमय-

स्य शब्दश्रवणादाश्रयानुमाने सत्ययं भेरीशब्द इत्यवच्छेदेन प्रतिभासत इति चेत्। आयातस्तर्हि मदीयं पन्थानम्। कथम्? शब्दश्रवणात् सन्तानद्वारेणाश्रयानुमितावपि भेर्याः शब्द इति प्रतिभासाभ्युपगमात्। तदेवमाश्रयादन्यत्रोपलभ्यमानत्वान्न स्पर्शवद्विशेषगुणः शब्द इति सिद्धम्। तथैकस्मिन्नेव वाद्ये वाद्यमाने बहूनां षड्जादिभेदानामुपलम्भान्न तद्गुणत्वम्। तथाहि—यदाऽऽनोद्यगुणः स्याच्छब्दः कथं बहूनां शब्दानां समानेन्द्रियग्राह्याणामविभुनि द्रव्ये सद्भावः स्यात्। अथ चित्ररूपवदेतत्स्यात्। न। तत्रैकरूपस्यारम्भात्। तथाहि—नानारूपाण्येकं कार्यमारभन्त इत्युक्तम्। नचैवं नानाशब्दैरेकः शब्द आरभ्यमाणो दृष्ट इति। न चात्र चित्ररूपवदेकस्मिन् काले चित्रशब्दप्रतिभासः सम्भवति, क्रमेण प्रतिभासनात्। तथा रूपादिवच्चित्रोत्पादेऽभ्युपगते युगपदुपलब्धिप्रसङ्ग। न च क्रमेणाभिव्यक्ति, सद्भावे प्रमाणाभावादित्युक्तत्वात्। संयोगाच्च क्रमेणाभिव्यक्त्यभ्युपगमे शब्दस्य न स्पर्शवद्विशेषगुणत्वं तद्वैधर्म्यादित्यलमतिविस्तरेण।

ननु चात्र हेतुभ्यामनन्तरं प्रतिज्ञोपन्यासादवयवव्यत्यये किं प्रयोजनम्। शास्त्रे नायं नियम इत्युपदर्शनमत्र। तथा ह्यवयवविपर्यासवचनमप्राप्तकालं नाम निग्रहस्थानं जल्प एव न शास्त्रे इत्युपदर्शयति। उदाहरणाद्यवयवलाभार्थमित्यन्ये। तच्चैतदुव्यन्यय विनापयर्थकथनादेव, तस्यानेकधाभ्युपगमात्। नन्वेकेनैव प्रमाणेनार्थस्य परिच्छेदादेकस्मिन्नर्थेऽनेकहेतूपन्यासो व्यर्थ एव। यदि वा प्रमाणान्तरोपन्यासोऽन्यथानुपपत्त्या ज्ञायते—न प्राक्तनस्यार्थपरिच्छेदे सामर्थ्यमपूर्वार्थपरिच्छेदकत्वं वा, अधिगतार्थस्यानुवादकत्वात्। तथा ह्यधिगतेऽप्यर्थे प्रमाणान्तरप्रवृत्तावविश्रामप्रसङ्ग। तस्मादन्योन्यव्यावृत्तविषयत्वात् प्रमाणानामनेकहेतूपन्यासो परिज्ञानायैव। *नैतदेवम्। सर्वत्र व्यवस्थानभ्युपगमात्। तथा ह्येकस्मिन्नेवार्थे*ऽनेकोपायदर्शनं शास्त्रे न दोषाय, तस्य हि परानुग्राहकत्वात्। तथा विभिन्नाभिप्राया. प्रतिपाद्या इत्यनेकहेतूपन्यासात्। कश्चित् केनचिदल्पप्रयासेनैव प्रतिपद्यते इति। न चात्र कस्यचिदप्रामाण्यम्, सर्वेषामपि प्रमाजनकत्वात्। न च प्रमाणपरंपराप्रसङ्गः, परिच्छिन्नेऽप्यर्थेऽवश्यं प्रमाणान्तरोपन्यासानभ्युपगमात्। तथाहि—यत्र प्रमाणान्तरसद्भावः तत्रैव तदपेक्षा, न तदभावेऽपीति। यथा शब्देनाऽवगते

ऽनुमानेनापि बुभुत्सिते अनुमानेनाप्यधिगते प्रत्यक्षेणेति । तथा प्रत्यक्षेणैकेन करणेनोपलब्धेः पुनः करणान्तरेणेति । तथा एकस्मिन् सुखसाधनेऽर्थेऽनेकप्रमाणप्रवृत्तौ सुखातिशयश्च प्रयोजनमिति । न चानधिगतार्थगन्तृत्वं प्रमाणसामान्यलक्षणम् , प्रत्यभिज्ञानादेरप्रामाण्यप्रसङ्गात् । तथाह्यधिगत एवार्थे प्रत्यभिज्ञानमनुमानं च प्रवर्तत इति वक्ष्यामः । अथैकदेशवृत्तिविशेषगुणत्वात् क्षणिकविशेषगुणत्वाच्च सुखादिवदात्मगुणो भविष्यतीत्याह—न बाह्येन्द्रियप्रत्यक्षत्वादित्यादि । अथ प्राक्तनानुमानस्य निर्दुष्टतायामनुमानान्तरस्यानुत्थानमेव । नात्मगुणत्वे सति शब्दस्य श्रोत्रेणापरिच्छेदादाश्रयासिद्धत्वमनुमानयोः । तथाहि—श्रोत्रमात्मा न भवत्यकर्तृत्वात्, नाप्यन्तःकरणमेव श्रोत्रम् तस्य हि बहिःकरणत्वात् । अभ्युपगमे वा यावत् सुखाद्युपलब्धिः तावच्छब्दोपलब्ध्या भवितव्यमिति बाधिर्यञ्च स्यात् । अथ शब्दग्रहणमन्तःकरणस्योपरतव्यापारात् । एवं तर्हि सुखादीनामग्रहणं स्यात्, न च करणं च क्षुराद्येकत्रोपरतव्यापारमन्यत्रार्थप्रकाशकं दृष्टम् । क्षित्यादिवायुपर्यन्तश्च श्रोत्रं न भवत्येव, घ्राणादिसंपादने सामर्थ्यावधारणात् । दिक्कालयोश्च श्रोत्ररूपता न भवत्यत्र, भौतिकत्वात् बाह्येन्द्रियाणाम् । पारिशेष्यादन्यच्छ्रोत्रम् । तेन नात्मगुणस्य शब्दस्याग्रहणमेव स्यादित्याश्रयासिद्धत्वम् । गृह्यते च बाह्येन्द्रियेण शब्दस्तस्मादात्मगुणो न भवतीति । तथाच शब्दो नात्मगुणो बाह्येन्द्रियप्रत्यक्षत्वात्, यो यो बाह्येन्द्रियप्रत्यक्षः स स आत्मगुणो न भवति, यथा रूपादि, तथा चायं तस्मादात्मगुणो न भवतीति । वैधर्म्येण तु सुखादयः । ततश्च नात्मगुणः शब्दः आत्मान्तरग्राह्यत्वात् रूपादिवत् । आत्मगुणाश्चात्मान्तरग्राह्या न भवन्ति सुखादयः । ननु श*ब्दस्यात्मान्तरग्राह्यत्वं व्यक्त्यपेक्षया न सम्भवत्येव । तथाहि—या शब्दव्यक्तिरेकस्मिन् श्रोत्रे समवेतोपजाता सा नान्यत्रेति ।* जात्यपेक्षया तु सुखादेरप्यात्मान्तरग्राह्यत्वादिति अनेकान्तिकत्वम् । नैतदेवम् । येनात्मना क्रियते शब्दः तस्मादन्येनापि गृह्यते , न चैवं सुखादिरिति, तथाहि—तीव्रतराभिघातादेका शब्दव्यक्तिर्महान्तमाकाशदेशं व्याप्योपजायत इत्यनेकैरुपलभ्यत एव । न चाव्याप्यवृत्तित्वेन विरोधः, स्वाश्रयाव्यापकत्वात् । न च सन्तानाभ्युपग-

मो निरुध्यते तीव्रतरादिभेदभिन्नानां शब्दानामुत्पत्त्यभ्युपगमात्। तथा ह्यस्ति तीव्रतराभिघातादेका शब्दव्यक्तिर्महान्तमाकाशदेशं कल्पितं व्याप्योपजायते । ततस्तीव्रतर इत्यादिक्रमेणानुभवात्। तथा व्यक्त्यपेक्षायामात्मान्तरग्राह्यत्वं न सम्भवतीति ब्रुवतः सन्तानाभ्युपगमादपसिद्धान्तप्रसङ्ग इति। न चेतोपि आत्मगुणः शब्द आत्मन्य समवेतत्वात्, रूपादिवत्, ये चात्मगुणाः ते तत्रैव समवेताः सुखादय इति। अथात्मन्यसमवेतत्व साध्यम् न विशिष्यत इत्याह—अहङ्कारेण वियुक्तग्रहणादिति। तथाहि—नात्मनि समवेतः शब्दोऽहङ्कारेण वियुक्तत्वाद्रूपादिवत्। ते चात्मनिमित्त विना न प्रवर्तन्त इति प्रयोगदर्शनादात्मोपकारित्वं निमित्तमिति कल्प्यते।

अथ दिक्कालमनसां गुणो भविष्यतीति तन्निषेधार्थमाह श्रोत्रग्राह्यत्वादित्यादि। तथा च शब्दो न दिक्कालमनसां गुणः श्रोत्रग्राह्यत्वात्। यद्यच्छ्रोत्रग्राह्यं तत्तद्दिक्कालमनसां गुणो न भवति, यथा शब्दत्वादि। तथात्र शब्दः श्रोत्रग्राह्य तस्माद्दिक्कालमनसां गुणो न भविष्यतीति। ये तु तद्गुणा श्रोत्रग्राह्या न भवन्ति यथा सख्यादय इति। तथाच दिक्कालमनोव्यतिरिक्तस्य श्रोत्रस्य प्रतिपादनात्, तत्तद्गुणत्वे तेन ग्रहणाभावप्रसङ्गः। तथाहि—दिक्कालाभ्यां न सम्बद्धमिति तत्समवेतस्य शब्दस्याग्रहणम्। मनसश्चाणुपरिमाणत्वात् तद्गुणत्वे गम्भीरध्वनेरश्रवणप्रसङ्ग। तदभावे च क्वचित्प्रदेशे शब्दस्यानुत्पत्तिः स्यात्। न च कार्येणेव कारणस्य तत्र सद्भावः, कार्यस्यान्यथापि भावात्। नापि विभुद्रव्यविशेषगुणानां सुखादीनामिव परमाणुविशेषगुणानामिन्द्रियेणोपलम्भो दृष्टः। परमाणुपरिमाणं च मनः। तदेवं दिक्कालमनोगुणत्वे शब्दस्य श्रोत्रग्राह्यत्वं न स्यादिति। बाधकञ्चेदम्—तथा विशेषगुण एव वैशेषिकस्तस्य भावादिति। तथाहि—दिक्कालमनसां पक्षीकरणे वैशेषिकगुणाभावो सिद्धः स्यादस्यैव विशेषगुणत्वादिति व्यतिरेकमुखेनान्यो हेतुर्व्याख्यायते। तथाहि—दिक्कालमनसां वैशेषिकगुणाभाव इत्युक्ते शब्दस्तु विशेषगुण इति हेतुर्लभ्यते एव। तथाच शब्दः दिक्कालमनसां गुणो न भवति, विशेषगुणत्वात्, यो यो विशेषगुणः स स दिक्कालमनसां गुणो न भवति, यथा रूपादिः, तथा चायं विशेषगुणस्तस्मान्न दिक्कालमनसां गुणः शब्द इति। अन्ये तु न दिक्कालमनसां गुणः शब्दः इति साध्ये वैशेषिकगुणा-

भावः साध्याच्च विशिष्यत इति मन्यमाना हेत्वन्तरं ब्रुवते । तथाहि— न दिक्कालमनसां गुणः शब्दो गुणत्वेन गुणिनो लिङ्गत्वात्, यो यो गुणत्वेन गुणिनो लिङ्गः स स दिक्कालमनसां गुणो न भवति यथा सुखादयः, तथा चायं शब्दो गुणत्वेन गुणिनो लिङ्गस्तस्मात् तद्गुणो न भवतीति । ये तु दिक्कालयोर्लिङ्गं न ते गुणत्वेन गुणिनो लिङ्गम्, यथा पूर्वापरादिप्रत्यया युगपदादिप्रत्ययाश्चेति । न हि तद्विशिष्टत्वात्तयोर्लिङ्गम् । गुणत्वेन चात्मनः। तथा युगपदादिशब्दाः पूर्वापरादिशब्दाश्च यद्यपि तद्विशिष्टत्वात्तयोर्लिङ्गम् तथापि गुणत्वेन आश्रयान्तरानुमापका इत्यलमतिविस्तरेण ।

मनोगुणत्वे चोक्तमेव दूषणमिति परिशेषात् गुणो भूत्वाऽऽकाशस्याधिगमे परिच्छेदे कर्तव्ये लिङ्गमिति । परिशेषस्तु प्रसक्तप्रतिषेधेऽन्यत्र प्रतिषेधात(१) । तदेवं साधनं व्यतिरेकाव्यभिचारेणैव विषयव्यवस्थापनायालम् । तथाहि-शब्दः पृथिव्युदकज्वलनपवनदिक्कालात्ममनोव्यतिरिक्तद्रव्याश्रयः तद्वृत्तिबाधकप्रमाणसद्भावे सति गुणत्वात् यस्तु तद्व्यतिरिक्ताश्रयो न भवति न चासौ तद्वृत्तिबाधकप्रमाणसद्भावे सति गुणो यथा रूपादिः । न च तथा शब्दस्तस्मात्तद्व्यतिरिक्तद्रव्याश्रयः शब्द इति सिद्धमाकाशम् । तत् किमेकमुतानेकमित्याह-शब्दलिङ्गाविशेषादेकत्वं सिद्धम् । शब्दो हि लिङ्गमाकाशस्याविशिष्टतया नानात्वाप्रतिपादकमिति । नन्वसिद्धमविशिष्टत्वं विचित्रत्वाच्छब्दानाम् । तथाहि कार्यवैचित्र्यं कारणवैचित्र्यं विना न स्यादिति तीव्रादिभेदभिन्नानां शब्दानां विचित्रेणैव कारणेन भवितव्यमिति नानात्वसिद्धिस्तदाश्रयस्य । यदि च कारणवैचित्र्यं विनापि कार्यवैचित्र्यमिष्येत, परमाणूनामपि चातुर्विध्यं न स्यात्, तत्राप्येकस्मादेव कारणाद्विचित्रं क्षित्यादिकार्यं भविष्यतीति । अथात्र कार्यवैचित्र्येण कारणवैचित्र्यानुमानमिति चेत् । तच्छब्दवैचित्र्येऽपि समानमित्यलम् । तदसत् । सहकारिवैचित्र्येणापि शब्दवैचित्र्योपलब्धेर्न तदाश्रयस्य नानात्वम् । तथाच तीव्रतमादभिघातात्तीव्रतमः शब्दो मन्दाच्च मन्द इत्यादि ।

---

(१) प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययः परिशेष इत्यर्थः ।

न च क्षित्यादावप्येवमस्त्विति वाच्यम्। तत्र हि चतुर्विधं कार्य इतरेतरव्यावृत्तादुपादानादुत्पद्यमानं दृष्टमिति तज्जातीयाः परमाणवश्चतुर्विधा एव प्रतीयन्ते। कार्यवैचित्र्य तु सामग्रीवैचित्र्यादेव। तत्र क्वचित्कारणभेदः क्वचित् कर्मभेदोऽन्यस्य चेति यथासम्भव ग्राह्यम्। अत्र कारणभेदेनापि शब्दवैचित्र्योपपत्तेर्न समवायिकारणात् भेद इति सत्यम् एतच्छब्दलिङ्गाविशिष्टत्वान्नानात्वाप्रतिपादनमिति। अथ नानात्वाप्रसिद्धावप्येकत्वं प्रमाणं विना न सिद्ध्यति इत्यभिधेयं प्रमाणमिति चेत्। न। द्रव्यत्वादेव संख्यासद्भावसिद्धौ नानात्वे प्रमाणाभावादेकत्वमेव सिद्ध्यतीति। तथा सङ्ख्यानन्तरं परिमाण मवसरप्राप्तं परित्यज्य क्रमातिक्रमेण पृथक्त्वनिरूपणं कस्मादित्याह तदनुविधानात्तेनैकत्वेनानुविधानं साहचर्य्यम्। यत्र ह्येकत्वं तत्र तत्रावश्यमेकपृथक्त्वमिति। नन्वेवं परिमाणेपि तदनुविधानमस्त्येव। तथाहि यत्रैकत्वं तत्रावश्यं परिमाणं भवतीति। न। विशेषानुविधानाभावात्। यथाहि यत्रैकत्वं तत्रावश्यमेकपृथक्त्वं भवतीति विशेषानुविधानम्, नचैवं यत्रैकत्व तत्रावश्यमणुत्वं स्थूलत्वञ्चेति विशेषानुविधानमस्तीति पूर्वं पृथक्त्वं निरूप्यते। तथा परममहत्परिमाणमाकाशे कुतः प्रमाणादित्याह–विभववचनादिति। "विभवान्महानाकाशस्तथा चात्मा, तदभावादणु मन" इति ७-अ-१आ-२२-२३सूत्रे दर्शयति। विभवात् कारणात् महानाकाश इति सामान्यशब्देनास्यार्थात्परममहत्त्वं विवक्षितम्। तथाहि–विभुना द्रव्यस्य परममहत्त्वं सिद्धम् आत्मादाविति इहापि तथा साध्यते। आकाश परममहद्विभुत्वादात्मवदिति। सर्वेषां चाविभूनां पक्षीकरणे केवलव्यतिरेकानुमानम्। आकाशादीनामात्मपर्यन्तानां परममहत्त्वं विभुत्वादित्युक्ते येषां तु परममहत्त्व नास्ति न तेषां विभुत्वमिति व्यतिरेकः। अथ किमिदं विभुत्वं सर्वैर्मूर्तैः संयोग इति। अन्ये तु सर्वत्रोपजातानां शब्दानामाकाशे समवायस्तत्सद्भावे अपूर्णाद्रकता विभुत्वमिति मन्यन्ते। यदि गुणपरिमाणानधिकरणत्वे सति नित्यद्रव्यत्वात्परममहत्त्वमिति साध्यते। तथा शब्दकारणवचनात् संयोगविभागाविति संयोगाद्विभागाच्छब्दाच्च शब्दनिष्पत्तिरिति सूत्रं दर्शयति। तथाहि–संयोगविभागौ शब्दोत्पत्तेरसमवायिकारणमित्यभिधानादाकाशे समवायो लभ्यते। अन्यथा हि प्रत्यासत्तेरभावादसमवा-

यिकारणत्वं न स्यात्। न चान्यदसमवायिकारणमस्तीति यत एव गुणवदाकाशमतो गुणत्वादनाश्रितत्वाच्च द्रव्यं परमाणुवदिति। तथाहि—परमाणोर्गुणवत्त्वमनाश्रितत्वं च दृष्टं द्रव्यत्वं चास्ति। अद्रव्ये चैतन्न सम्भवति। अथ किमाकाशं नित्यमुतानित्यमित्याह—समानासमानजातीयकारणासम्भवाच्च नित्यम्। तथाहि न समानजातीयं समवायिकारणमाकाशस्यैकत्वात्। नाप्यसमानजातीयमसमवायिकारणमस्ति। समानजातीयाभावेन तत्संयोगस्याप्यभावात्। न च समवाय्यसमवायिकारणं विना वस्तुभूतस्य कार्यस्योत्पत्तिः सम्भवतीत्यकार्यत्वान्नित्यत्वं सिद्धमाकाशस्य। अतश्च सर्वप्राणिनां शब्दोपलब्धौ निमित्तं कारणम्। आकाशस्यैकत्वेऽप्यनेकार्थक्रियाकारित्वं दर्शयति। न च सत्तामात्रेणाकाशं शब्दोपलब्धेः कारणम्। सर्वत्र सर्वप्राणिनामविशेषेण शब्दोपलब्धिप्रसङ्गः, सर्वशब्दानामाकाशे समवायाविशेषादत आह श्रोत्रभावेन श्रोत्रत्वेनेति। किं तच्छ्रोत्रमित्याह—श्रोत्रं पुनः श्रवणविवरसंज्ञको नभोदेश इति। श्रूयते अनेनेति श्रवणम्, तच्च तद्विवरं चेति तथोक्तं श्रवणविवरमिति संज्ञा यस्य नभोदेशस्यासौ श्रवणविवरसंज्ञकः कर्णशष्कुल्याकाशः संयोगोपलक्षित इति। तथा शब्दनिमित्तोपभोगप्रापकधर्माधर्मोपनिबद्ध इति। शब्दो निमित्तं यस्यासौ तथोक्तः स चासावुपभोगश्च तं प्रापयत इति तत्प्रापकौ तौ च धर्माधर्मौ ताभ्यामुपनिबद्धः सहकृत इति। नन्वेवमपि कर्णशष्कुल्याकाशसंयोगोपलक्षितविशिष्टादृष्टोपगृहीतो नभोदेशस्तस्मान्नार्थान्तरं न भवतीति सर्वशब्दोपलब्धिः स्यात्। नैतदेवम्। कर्णशष्कुलीसंयोगोपलक्षितस्य नभसः श्रोत्रत्वे तस्याव्याप्यवृत्तितया न सर्वेषां ग्रहणम्। तथा यद्यपि कर्णशष्कुलीसंयोगैकार्थसमवायित्वाच्छब्दानां तथा विशिष्टप्रत्यासत्तेरभावादग्रहणम्। यो हि कर्णशष्कुलीसंयोगस्य सांनिध्यभाक् शब्दः स एवोपलभ्यते। न चैवम् सर्वशब्दास्तेषामव्याप्यवृत्तित्वात्। न च कर्णशष्कुलीसंयोगावरुद्धनभोदेशव्यतिरिक्तदेशे सर्वेषामुत्पादनादग्रहणमेवेति वाच्यम्। शब्दोपलम्भान्यथानुपपत्त्या सन्तानन्यायेन श्रोत्रदेशमागतस्य प्रतिपाद्यमानत्वादित्यलम्। अथ कस्माद्बधिराणां कर्णशष्कुलीसंयोगावरुद्धनभोदेशसद्भावेऽपि शब्दाग्रहणं सहकार्यभावादित्याह—

तस्य च नित्यत्वे सत्युपभोगनिबन्धकस्य शब्दोपलब्धौ सहकारिणोऽदृष्टस्याभावाच्छब्दोपलब्धिर्न भवतीति बाधिर्यमुपपद्यत एव ॥

इत्याकाशम् ।

(भा०) कालः परापरव्यतिकरयौगपद्यचिरक्षिप्रप्रत्ययलिङ्गम् । तेषां विषयेषु पूर्वप्रत्ययविलक्षणानामुत्पत्तावन्यनिमित्ताभावाद्यदत्र निमित्तं स कालः । सर्वकार्याणां चोत्पत्तिस्थितिविनाशहेतुस्तद्व्यपदेशात् । क्षणलवनिमेषकाष्ठाकलामुहूर्तयामाहोरात्रार्द्धमासमासर्त्वयनसंवत्सरयुगकल्पमन्वन्तरप्रलयमहाप्रलयव्यवहारहेतुः । तस्य गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागाः । काललिङ्गाविशेषादेकत्वं सिद्धम् । तदनुविधानात् पृथक्त्वम् । कारणे काल इति वचनात् परममहत्परिमाणम् । कारणपरत्वादिति वचनात् संयोगः । तद्विनाशकत्वाद्विभाग इति । तस्याकाशवद्द्रव्यत्वनित्यत्वे सिद्धे । काललिङ्गाविशेषादञ्जसैकत्वेऽपि सर्वकार्याणामारम्भक्रियाभिनिर्वृत्तिस्थितिनिरोधोपाधिभेदान्मणिवत्पाचकवद्वा नानात्वोपचार इति ॥

(सू०)कालो-महाकालः। परापरेति(१)। परापरपदे भावप्रधाने परत्वापरत्वार्थके, ते चात्र दैशिकपरत्वापरत्वभिन्ने परत्वापरत्वे कालिके बोध्ये। ज्येष्ठः परः कनिष्ठोऽपर इति प्रतीतिविषयौ हि गुणविशेषौ परत्वापरत्वे, (२)तथा हि कनिष्ठजन्मनोऽन्तरे

[१] कालमाह परापरेति पाठान्तरम् ।
[२] तद्बुद्धिरिति पाठान्तरम् ।

यावन्तस्तपनपरिस्पन्दास्तदपेक्षया बहुतरतपनपरिस्पन्दान्तरितजन्मनि ज्येष्ठे बहुतरतपनपरिस्पन्दान्तरितजन्मत्वज्ञानेन परत्वम् अल्पतरतपनपरिस्पन्दान्तरितजन्मत्वज्ञानेनापरत्वं च कनिष्ठे जन्यत इति हि गुणनिरूपणे(१) वक्ष्यते । तथा च तादृशपरत्वापरत्वयोर्व्यतिकरोऽतिमिलनं(२) स च यौगपद्यायौगपद्ययोश्चिरक्षिप्रयोः प्रत्ययाश्चेति(३)द्वन्द्वः, ते लिङ्गानि ज्ञापका यस्य स काल इत्यर्थः । ननु कथं परत्वापरत्वयोः कालज्ञापकत्वम् इति चेत् । इत्थम्—उक्ततपनपरिस्पन्दास्तावत्सु कालेषु प्रत्यासन्ना एव परत्वापरत्वोत्पादकाः, अन्यथा युगपदुत्पन्नयोरपि तैः परत्वापरत्वे उत्पाद्येताम् । अत्र उपजायमानयो-(४)स्तयोरसमवायिकारणन्तत्तपनपरिस्पन्दविशिष्टद्रव्यस्य ज्येष्ठकनिष्ठवृत्तिः संयोगो वाच्यः, तद्विशिष्टद्रव्य च न कालं विनाऽन्यत् सम्भवति, अन्यस्य द्रव्यस्य तपनपरिस्पन्दवैशिष्ट्याप्रतीतेः । कालस्य च तदानीमिदानीं परिस्पन्दा इति प्रतीत्या विषयीकरणात् तदानीमित्यस्य चान्ततः(५) कालरूपत्वादित्थं च परत्वापरत्वे काललिङ्ग इति बोध्यम् । इदमुपलक्षणम् । पुष्पफलादीनां कादाचित्कत्वमपि तल्लिङ्गम् । न च पुष्पादीनां राशिविशेषस्थरविणैव सम्भवात्कादाचित्कत्वं न कालानुमापकमिति वाच्यम् । पुष्पादिना सह रवेः सांनिध्याभावेन कालस्यैव तत्सांनिध्यघटकत्वात् । यौगपद्यमेककालता, अयौगपद्यमनेककालता, चिरत्वं दीर्घकालता, क्षिप्रत्वमल्पकालता ।

[१] त्विनिरूपणे इत्यपि पाठः ।
[२] करो मिलनमिति पाठान्तरम् ।
[३] यौगपद्यायौगपद्यचिरक्षिप्रप्रत्ययाश्चेति पाठान्तरम् ।
[४] उत्पद्यमानयोस्त० ।
[५] अन्तत इति क० मु० पुस्तके नास्ति । चान्तरा इति पाठान्तरम् ।

अत्र च कालशब्देन सूर्यगत्यादयः कालोपाधय एवोच्यन्ते। काल-स्यैकत्वादेव तेषां प्रत्ययैः कालोऽनुमीयत इत्यर्थः। नन्वेभिः प्रत्ययैः कथं कालानुमानं कालस्यासिद्धत्वेन साध्यज्ञानाभावा-दित्यतोऽन्यथानुपपत्त्या कालकल्पकमेवानुमानमित्याह तेषा-मिति। पूर्वप्रत्ययतो विलक्षणानां विषयेषु घटादिषु तेषां प्रत्ययानामुत्पत्तावित्यन्वयः। पूर्वप्रत्ययो हि पूर्वसिद्धद्रव्यादि-विषयः प्रत्ययः ततो विलक्षणानां यौगपद्यायौगपद्यचिरक्षिप्रादि-विषयाणामित्यर्थः। तथा हि घटा युगपदुत्पद्यन्ते युगपन्नश्यन्ती-त्यादिप्रत्ययेषु तावद्युगपदुत्पत्तौ पूर्वसिद्धद्रव्यघटादिप्रत्ययविषय-तो विलक्षणो विषयः, स च प्रत्यय ऐन्द्रियको नातीन्द्रियं कालं विषयीकर्तुं शक्नोति। अत एका सूर्यक्रिया पूर्वसिद्धेष्वनन्विता विषयीकरोति उत्पद्यमानघटादेश्च प्रत्यासत्त्यभावात् सूर्यक्रिया-धिकरणकत्वासम्भवात्, अन्यथाऽनुपपत्त्या तत्प्रत्यासत्तिघटकः कालः कल्प्यत इत्यर्थः। यदत्र निमित्तमिति। यदत्र प्रत्यास-त्तिघटकमित्यर्थः। तस्य समस्तकार्यपदार्थकारणत्वमाह सर्व-कार्याणामिति। उत्पत्तिराद्यक्षणसम्बन्धः, स्थितिः स्वप्राग-भावध्वंसानधिकरणकालसम्बन्धः, विनाशो ध्वंसः, तद्धेतुः, अत एव सर्वोत्पत्तिमन्निमित्तकारणत्वमस्य साधर्म्यमुक्तम् प्राक्। तद्धेतुत्वे प्रमाणमाह तद्व्यपदेशादिति। तेन कालेनोपाधिभूत-सूर्यक्रियाप्रत्यासत्तिघटकेन सहाधिकरणतया विशिष्य व्यप-देशादित्यर्थः। भवति हि इदानीमुत्पन्नः श्वः परश्वो वा उत्प-त्स्यत इदानीमस्ति इत्यादिव्यपदेशैरधिकरणत्वेन विशिष्य कालो व्यपदिश्यत इति। उत्पत्त्यादिव्यवहारात् व्यवहारा-न्तरस्यापि हेतुतामाह क्षणलवेति। स्वजन्यविभागानधिकरणं क्रियाधिकरणकालः क्षणः, क्षणद्वय लवः, अक्षिपक्ष्मसंयोग-

निमित्तकर्माधिकरणं कालो निमेषः, अष्टादश निमेषा स्युः काष्ठा, त्रिंशत्तु ताः कलाः, मुहूर्तयामादयः प्रसिद्धा एव, प्रलयः संहारकाल उक्त एव, तेषां व्यवहाराणां हेतुश्च हेतुभूतज्ञानविषय इत्यर्थः। द्रव्यत्वेन तस्य गुणानाह तस्य गुणा इति। संख्यासु मध्ये तस्यैकत्वमेव संख्येत्याह काललिङ्गेति। कालस्य लिङ्गं हि परत्वापरत्वे प्रागुक्ते समस्तज्येष्ठकनिष्ठवृत्तीनां तद्वयानां स्वज्ञानेनोत्पादकाः अन्तरा वर्तमानास्तपनपरिस्पन्दास्तत्प्रत्यासत्तिघटकस्य कालस्याविशेषादेकेनैव कालेन निर्वाहेऽनेकत्वकल्पनायां गौरवादिति भावः। तथा च काललिङ्गीभूतपरत्वापरत्वयोः सूर्यप्रत्यासत्तिघटककालविशेषस्याविशेष एव परम्परया काललिङ्गपरत्वापरत्वयोरविशेषो बोध्यस्तस्मादित्यर्थः। [यद्यपि कालघटौ द्वाविति प्रतीतिविशेषाद्वित्वमपि काले वर्तत इत्येकत्वमात्रानुपपत्तिः, तथापि स्वसजातीयद्वितीयवृत्तिसंख्याराहित्ये सति एकत्व सिद्धमित्यर्थः।] तदनुविधानादिति। एकत्वानुविधानादित्यर्थः। य एकः सोऽन्यस्मात्पृथगिति अनुविधानम्। कारणे काल इति। कारणे कालाख्या इति (२अ.२ आ.९ १सू.)सूत्रकारवचनम्। परत्वापरत्ववतोः समस्तज्येष्ठकनिष्ठयोस्तपनपरिस्पन्दप्रत्यासत्तिकारणे काले परममहत्त्वं सिद्ध्यतीति तत्सूत्रार्थः । समस्तज्येष्ठकनिष्ठप्रत्यासत्तिकारणत्व च नाविभुनः सम्भवतीति विभुनः परममहत्त्वमावश्यकमिति तत्सूत्रेण प्रतिपादितमित्यर्थः। कारणपरत्वादिति। कारणपरत्वात् कारणापरत्वाच्च परत्वापरत्वे इति हि (७अ.२आ.२२)सूत्रम्। कारणपरत्वादित्यादेरर्थः–कारण परत्वस्य कारणमपरत्वस्य तच्च काल इति बोध्यम् । तस्माद्धेतोर्ज्येष्ठे परत्वात् कनिष्ठे चाऽपरत्वात् परत्वापरत्वे तयोः सिद्ध इत्यर्थः ।

[ ] चिह्नितः पाठः कस्मिंश्चित् पुस्तके नास्ति ।

कालस्य हेतुत्वं च सूर्यपरिस्पन्दाधिकरणतया तत्प्रत्यासत्तिघटकस्यास्य संयोगद्वारेत्यतः कालस्य संयोगः सिद्ध इत्यर्थः। तद्विनाशकत्वादिति। परापरपुरुषक्रियया हि तादृशपुरुषकालविभागः स च पूर्वसंयोगविनाशकतयैव सिद्ध इत्यतस्तद्विनाशकत्वादित्यर्थः। तस्याकाशवदिति। आकाशस्य यथा गुणवत्त्वाद्द्रव्यत्वं समानासमानजातीयकारणाभावान्नित्यत्वं च तथा तस्यापीत्यर्थः। ननु कालस्यैकत्वे नित्यत्वे च कथमतीतानागतवर्तमानतया स व्यवह्रियते अतीतानागतादिभेदेनैकत्वासम्भवात् अतीतानागतयोर्नाशप्रागभावप्रतियोगिरूपत्वेन नित्यत्वासम्भवाच्चेत्यत आह काललिङ्गेति। काललिङ्गाविशेषादेकत्वं सिद्धमिति प्रागुक्तम्, तच्च व्याख्यातमेव। तस्मादञ्जसा तत्त्वेनैकत्वे सिद्धे तस्य कालस्य नानात्वोपचार इत्यन्वयः। उपचारे हेतुमाह सर्वकार्याणामिति। आरम्भः आद्यकृतिहेतत्सान्निध्यादिह प्रागभाव एव आरम्भः, क्रिया च व्यापारः, अभिनिर्वृत्तिः फलं, स्थितिर्विद्यमानता, निरोधो ध्वंसः, एतैरुपाधिभिर्नानात्वोपचार इत्यर्थः। तथाहि–भविष्यति पट इत्यत्र पटस्य धर्मिणोऽसत्त्वेपि तदीयप्रागभावसत्त्वौपाधिकी(१)कालस्य भविष्यत्ता, कुरुते घटमित्यत्र घटासत्त्वेऽपि तद्धेतुकुलालव्यापारविद्यमानत्वौपाधिकी कालस्य वर्तमानता, स्मारयति पूर्वानुभवोऽनुभूतमर्थमित्यत्र पूर्वानुभवासत्त्वेपि तत्फलस्य स्मरणस्य विद्यमानत्वौपाधिकी कालस्य वर्तमानता, एवं चकार घटमित्यत्र घटकुलालयोर्विद्यमानत्वेपि घटोत्पादकक्रियाप्रध्वंसौपाधिकी कालस्यातीततेत्यर्थः। औपाधिके व्यवहारे दृष्टान्तमाह मणिवदिति। स्फटिकमणिवदित्यर्थः। स्फटिकमणेरेकत्वेऽपि यथा जपापुष्प-

[१] सम्बन्धौपाधिकीति पाठान्तरम्।

नीलोत्पलादिसान्निध्यौपाधिकरक्तनीलादित्वेन नानात्वेन व्यवहारस्तथेत्यर्थः । ननु जपारक्तत्वादः स्फटिकावृत्तित्वेन तत्र भ्रान्त्यैव व्यवहारः, कालवृत्तिना प्रागभावादिना तूपाधिना न भ्रान्त्या व्यवहार इति दृष्टान्तदार्ष्टान्तिकवैषम्यमत आह पाचकवदिति । पाचकवदित्युपलक्षणमिदम् । पुरुषस्यैकत्वेऽपि तद्वृत्तिपठनपचनादिक्रियौपाधिको यथा पाठकपाचकतया नानात्वव्यवहारस्तथेत्यर्थः ॥

(से०) **** न्द्रान्तरितजन्मायमल्पतरतपनपरिस्पन्दान्तरितजन्मेति मत्योरस्ति परत्वापरत्वे प्रति हेतुता तयोरेव च सन्निकृष्टबुद्धिर्विप्रकृष्टबुद्धिरिति नाम तयोश्च विशिष्टबुद्ध्योः क्रिया विशेषणं पिण्डो विशेष्यः न च विशिष्टबुद्धिः सम्बन्धमन्तरा सञ्चारमाचरति । न चेह संयोगसमवायौ सम्भवतः, क्रियाया अदृष्टत्वात् पिण्डादन्यत्र स्थितेश्च । नापि स्वरूपसम्बन्धः सम्बन्धान्तरं वा, तत्साधकस्याभावात्, तस्मादत्र कश्चित्परम्परासम्बन्धो वक्तव्यः । न चात्र शब्दतच्छ्रवसोरिव समवायो मत्याश्रयस्य पिण्डे ऽसमवायात् । नापि चक्षुघटरूपयोरिव संयुक्तसमवायः मत्याश्रयस्य भाति पिण्डेनासंयोगात् , तस्मात्संयुक्तमात्रं क्रियायाः समवाय इति घटकतया (?) कालघटकतेति व्योमशिवाचार्याः । तत्राचार्यैर्व्योमादिभिरन्यथासिद्धिमाशङ्क्य नभसः स्वघटितसम्बन्धेन परत्र परधर्मोपनायकत्व एकभर्यभिघात सर्वभेरीषु शब्दोत्पत्तिप्रसङ्ग, नभसः स्वघटितसम्बन्धेन तस्याभिघातस्य सर्वत्र भेर्यां सत्त्वात् । आत्मनोऽपि स्वघटितसम्बन्धेन परत्र परधर्मसंक्रामकत्वे वाराणसीस्थेन नीलिम्ना पाटलिपुत्रस्थितस्फटिकमणेरुपरञ्जनप्रसङ्गः । न च कालोऽपि क्रियावदभिघातनैल्ये किमिति नोपनयतीति वाच्यम् । कालसिद्धावस्य भेर्यन्तरे भेर्यन्तराभिघातस्य परम्परासम्बन्धघटको न भवति संयुक्तसमवायसत्त्वात् । न चैवं सति सर्वत्र शब्दोत्पत्त्यापत्तिः साक्षात्सम्बन्धस्य शब्दोत्पादकत्वात् । एवमात्मनोऽपि परधर्मोपनायकत्वमिष्टमेव । तत्र चातिप्रसङ्ग इष्टापत्तिरेव । न हि वाराणसीस्थनैल्यपाटलिपुत्रस्थितस्फटिकशकलयोर्न संयुक्तसंयुक्तसमवायोऽस्ति । न च भवत्वाकाशात्मघटितसंयुक्तसंयुक्तसमवायो न तु सम्बन्ध इति वाच्य-

म् । संयुक्तसंयुक्तसमवायस्य सम्बन्धतायाः संयुक्तसंयुक्तसमवायेनावच्छेदात् लाघवात् , न त्वाकाशाद्यघटितत्वमपि विशेषणं गौरवात् । यदपि कालमादाय नातिप्रसङ्गो धर्मिग्राहकमानबाधादिति । तदपि नाऽऽचार्यतात्पर्यविषयः । क्रियामात्रोपनायकत्वेन कालसिद्धेः क्रियोपनायकत्वेनैव सिद्धिः, न हि यदन्यकार्यकारित्वेन सिद्ध्यति तत्रान्यकार्यकारित्वेन सिद्ध्यति । तत्रान्यकार्यकारित्वं धर्मिग्राहकमानबाधितम् । क्षित्यादिजनकत्वेन सिद्धस्य भगवतो घटादिजनकत्वे धर्मिग्राहकमानबाधापत्तेः, तस्मात्कालेऽपि अतिप्रसङ्ग स्यादेव । न च काला यदि क्रियोपनायकं स्यादिन्द्रियभिघातादिकमप्युपनयदिति अतिप्रसङ्गो न सम्भवति व्यासङ्गाभावादिति वाच्यम् । आकाशादावप्यस्यातिप्रसङ्गभङ्गस्य वक्तुं शक्यत्वात् । न च कालो नान्यदुपनयति प्रयोजनाभावात् क्रियां तूपनयति परत्वाद्युत्पत्तेः प्रयोजनस्य सत्त्वादिति वाच्यम् । आकाशेऽप्येतावतोऽक्षरस्य वक्तुं शक्यत्वात् । किञ्च कालस्य क्रियोपनायकत्वं क्रियापिण्डयोः परम्परा****त्रुटितपत्रमेतान्निरंकपत्रस्य****(१)प्रसङ्गस्याश्रयासिद्धेः । न हि यो न सिद्धः तत्रासावप्युमुकं कुर्यादिति वक्तुं शक्यते सिद्धौ च धर्मिग्राहकमानबाधो निरुक्तक्रमेण क्रियामात्रोपनायकत्वेन तस्य सिद्धेरित्यालोचयन्ति । अत्र किञ्चित्सप्रपञ्चं वर्णयामः । यदुक्तमम्बरस्य स्वघटितपरम्परासंबन्धेन परत्र परधर्मोपसंक्रामकत्वं एकभेर्यभिघाते सर्वभेरिष्वभिघातापत्तौ सर्वत्र शब्दोत्पत्तिः स्यादिति । तच्च सुमनसां तेषामेव मानसमुल्लासयति लिखनं तु एकदेशिमतेन, न ह्यत्रान्यधर्मोपनायकत्वं परधर्मस्य परत्र प्रापकत्वं कालस्यापि तथात्वे वत्सलति भास्वति जाते ऽस्थिरतापत्तेः, किन्तु परम्परासम्बन्धघटकत्वम् । नचाऽऽकाशो **अत्र त्रुटिपत्रम्* सम्बन्धघटकत्वं तत्रलयादावपि कालस्यास्ते, अपि च सूर्यक्रियायाः पिण्डेन स्वरूपसम्बन्ध एवेह क्षणेऽपि पिण्ड इत्यादिप्रतीत्याऽवसीयतेऽन्यथा द्रव्येण संयुक्तसंयुक्तसमवायो रूपादिना समवायिसंयुक्तत्वतद्घटकतया तत्कल्पनेति । न च क्षित्यादिजनकत्वेन सिद्धस्यापि भगवतो भवतु घटादिकर्तृत्वं कर्तृतादिप्रयोजकस्य तथात्वादि-

---

(१) अत्रापि पूर्ववत्पाठस्त्रुटितो लक्ष्यते स च पाठकैः स्वयं योजनीयः । एवमग्रेऽप्यनुपदम् ।

ज्ञानादेः सत्त्वात् । कालस्य तु क्रियोपनायकत्वेन सिद्धस्य किमित्य-भिघाताद्युपनायकत्वमिति वाच्यम् । अभिघातादिनापि परम्परासम्बन्धघटकत्वसत्त्वात् , तस्मादाकाशादिभिरेव परम्परासम्बन्धोपपत्तौ किमिति कालकल्पनेति । किञ्चासौ बहुतरतपनपरिस्पन्दान्तरितजन्मासावल्पतरतपनपरिस्पन्दान्तरितजन्मेत्यनयोः प्रतीत्योस्तपनपरिस्पन्दानां पिण्डे न सम्बन्धो न विषयः, किन्तु पिण्डजन्माभिभूयोऽल्पतद्व्यवहितत्वं, यथा कनकाचलोऽमलो भूयो देशव्यवहितस्थितिः। विन्ध्याचलः कृतस्वल्पदेशव्यवहितस्थितिरित्यादौ, न ह्यत्र व्यवधायकदेशानां कनकाचलादौ सम्बन्धः परिस्फुरति, किन्तु तत्स्थितौ व्यवहितत्वमात्रमिति कालपरिकल्पनेति पूर्वपक्षपरिकल्पनेति सङ्क्षेपः।

आचार्यचरणास्तात्पर्यवर्णनेनान्वयामः। आकाशघटितस्य संयुक्तसमवायस्य विशिष्टबोधजनकत्वे काशीस्थेन नीलिम्ना पाटलिपुत्रस्थितस्य स्फटिकस्य समवायाभावग्रहेण समवायेन सुरभिजलप्रत्ययानुदयेऽपि संयुक्तसमवायाभावग्रहेण तेन सुरभिजलमिति प्रत्ययवत्(?), तस्मात् विशिष्टबोधप्रयोजकत्वेन सम्बन्धः सिध्यंस्तद्घटकत्वेन कालमेवोल्लासयतीति । न च कालघटितस्यापि सम्बन्धस्य विशिष्टबोधसमर्थकत्वेऽतिप्रसङ्गोऽसिद्धावाश्रयासिद्धेः, सिद्धौ धर्मिग्राहकस्यान्यस्य वा दूरस्थितस्फटिकादौ नीलादिविशिष्टबोधजनकत्वे प्रमाणस्याभावात् । न च स्वरूपसम्बन्धेनैवोपपत्तिः, सम्बन्धान्तरासम्भव एव तस्य स्वीकारात् । न चेदानीं घट इत्यादि प्रतीत्या स्वरूपसम्बन्धस्यावश्यकत्वे किमिति तत्सम्बन्धान्तरकल्पनेति वाच्यम् । इदानीं घट इति प्रतीत्या क्रियाया आधारत्वं प्रतीयतेऽसौ बहुतरतपनपरिस्पन्दवानित्यत्र घटस्य, तथाच विलक्षणप्रतीत्या विलक्षणमितिमिति चेत् , सन्निकृष्टविप्रकृष्टबुद्धिश्चायं बहुतरतपनपरिस्पन्दावच्छिन्न इत्याद्याकारा नातः क्रियया सम्बन्धाप्रतीतिरित्युक्तिः परमादद्यात् । न च क्रियानिष्ठत्वमेव सन्निकृष्टविप्रकृष्टबुद्धौ भासतां तत्र च स्वरूपसम्बन्ध एव भासते, न हि कालस्य कालोपाधेः क्रियाया न सर्वाधारत्वम् । न च सर्वाधारतायां स्वरूपसम्बन्धातिरिक्तं सम्बन्धान्तरमस्ति रूपाद्याधारतायां संयुक्तसंयुक्तसमवायासम्भवात् । अपि चोत्पत्तिराद्यक्षणसम्बन्धः सम्बन्धश्च प्रकृतः स्वरूपसम्बन्ध एवेति सकलशिष्टदार्शनिकानुशिष्टः पन्थाः । एवञ्च

भूयोऽल्पक्रियासम्बन्धावपि स्वरूपसम्बन्धपर्यवसायिनावेवेति किमिति सामयिकिसत्तास्वीकारः । न चैकमनेनिष्ठसंख्यादिभिन्नाः सर्वे धर्मा विशेष्यगुणशून्यैकयुविरहदशायां सति पदार्थे परत्वाद्यनुत्पत्त्यापत्तिः; क्रियात्वमेव तत्रानुगमक महाप्रलयसाधारणतद्नापत्तेः, क्रियात्वप्रकारककालत्वप्रकारकप्रत्यययोर्वैलक्षण्याऽननुभवाच्च । न च विशेषणे क्रियाभागे कालत्वस्यासत्त्वात् कथं द्रव्यगतं तदादाय क्षणादिवदवच्छिन्नकालस्वरूपस्यैव क्षणादित्वात् । एवं च क्षणे घट इत्यादिर्जगदाधारताव्यवहारोऽपि कालमादायैव क्रियादेस्त्ववच्छेदकतामात्रम् । न चैवं कालोपाधेः प्राचीनग्रन्थेषु निर्विवादः सर्वाधारताप्रवादो न स्यादिति वाच्यम् । एकदेशिदर्शनमाश्रित्य तथोपदेशात् । एवं चोत्पत्त्यादिरपि कालविशेषसम्बन्ध एव न तु क्रियासम्बद्धसन्निकृष्टविप्रकृष्टबुद्धिरपि तदल्पत्वभूयस्त्वावगाहिनी । एवं च कालासिद्धावसमवायिकारणमपि तत्संयोग एव मूर्तान्तरसंयोगशून्ये द्व्यणुके भगवद्बुद्धिनिर्वर्त्यपरत्ववत्प्रयत्नसंयोगमादाय समाधिरसमावेशात् । एवं च दिक्सिद्धिरपि दिग्गतकारणगतव्यवहारात्, एवं सूर्यसंयोगो दिवीतिप्रतीत्योर्वैलक्षण्यात् अस्माभिः पितृचरणसरसिजानुसरणम् । अपि सामर्थ्यासादितयौगपद्यादिप्रत्ययेऽपि कालो विषयो नतूपाधिः, तथा चैतत्प्रत्ययविषयतया कालसिद्धिरिति भाष्यार्थः । अत्रापि विषयान्तरेणान्यथासिद्धिं वारयति तेषामिति । घटादिषु रूपधानीय(?)मित्यादिप्रत्ययविलक्षणा हि युगपज्जात इत्यादिप्रत्यया उत्पाद्यन्ते, तत्र च निमित्तान्तरस्य विषयान्तरस्य रूपादेरसभवात् यन्निमित्तं यो विषयः स कालोविलक्षणे प्रत्ययोत्पत्तिस्तावत् प्रामाणिकी । सा च विषयतया कालव्यवस्थापयतीति भाव । एवं च उत्पत्तावित्यग्रे प्रामाणिक्यामित्यध्याहार्यम् । परार्थतामाह सर्वेति । उत्पत्तिराद्यक्षणसंबंधः स्थितिः स्वप्रागभावध्वंसविरहः विनाशः प्रसिद्ध एव । यद्यपि उत्पत्तेः कालगर्भतया न जन्यत्वं तथापि स्वरूपसम्बन्धात्मके सम्बन्धे द्वितीयो भागः कालातिरिक्ततया जन्यत एव । स्थितिस्तु प्रागभावादिविरहस्य पटाद्यात्मतयाऽनन्यैव । आचार्यस्तूत्पत्तिरात्मलाभः स्थितिराविनाशात् क्रमवत्सहकारिसम्बन्धः । तत्रात्मलाभ आत्मस्वरूपं स्वरूपस्य च जन्यतोचितैव न तु यथाकथञ्चित् रूपा-

त्पत्त्याधारत्वेनाद्यघट उत्पन्नो घटे सहकारिसम्बन्ध उत्पन्नोऽद्य वि-
नाश उत्पन्न इति व्यपदेशात् उत्पत्त्या आधारस्य च पूर्ववर्तिनः कार-
णत्वं दुर्वारमिति भावः। नातः क्षणे व्यभिचारः। क्षणादिव्यवहारः का-
लकृत एव इत्याह क्षणेति । कालोपाध्यनधिककालोपाधिः क्षणा-
पेक्षया न्यूनस्य कालोपाधेरभावात्, अन्यस्तु कालोपाधिः क्षणाद्य-
धिक एव, तल्लक्षणज्योतिःशास्त्रानुसारेणादेशोऽयमिति भाव। विशे-
षगुणशून्यतां बोधयितुं तद्गुणेषु सामान्यगुणानेव गणयति तस्येति।
तत्र प्रमाणमाह द्रव्यत्वादेरित्यर्थः । आकाशवदस्यापि एकत्वमेवे-
त्याह कालेति । परत्वादिविशेषेन हि कालोऽनुमीयते स चैकेनैव
विभुनोपपद्यत इति नानेकस्य तस्य सिद्धिरित्यर्थः। एकत्वव्यापक-
त्वात् एकपृथक्त्वसिद्धिरित्याह तदिति। कारणे कालाख्या इति वच
नात् परममहत्परिमाणसिद्धिरित्याह कारण इति। कारणपरत्वात् का
रणापरत्वाच्च परत्वापरत्वे इति सूत्रे कारणत्वात् परत्वापरत्वे लक्ष-
णया संयोगविशेषो सिद्ध्यत इति । अयमाशय। कालपिण्डसंयोगस्य
परत्वादिकारणतया काले संयोगसिद्धिरिति। तदिति। सत्याश्रये वि-
भागस्यैव संयोगनाशकत्वादित्यर्थः। धर्मिग्राहकमानेन लाघवसहका-
रिवशात् सिद्ध्यत् एकत्वं स्वव्यापकतया पृथक्त्वं व्यवस्थापयति।
एकस्याल्पपरिमाणस्य चतुर्दशभुवनवर्तित्वादिकारणत्वानुपपत्त्या
तावन्निखिलमूर्तसंयोगसिद्धौ परममहत्परिमाणसिद्धिः। स्फटिकादौ
जपादियोगात् यथा नानात्वोपचारः तथा कालेऽपि इत्यर्थः। भवि-
ष्यदादिव्यवहारो हि द्वेधा क्वचिद्धर्मिणमादाय क्वचित् धर्मं, पटो
भविष्यतीत्यत्र धर्मिणमादाय पटप्रागभावस्यैव सत्त्वात्, पटं भाव-
यिष्यति कुविन्द इत्यत्र धर्मिणः कुविन्दस्य सत्त्वेऽपि पटोत्पादनानु-
कूलव्यापारलक्षणतद्धर्मप्रागभावावस्थित्या भविष्यत्ताव्यवहारः ।
अत्र प्रागभावप्रतियोगित्वलक्षणं भविष्यत्वं तस्य कुविन्देऽभावेऽपि
व्यापारस्य भविष्यत्त्वात् भवति तत्र भविष्यत्त्वव्यवहारः। उत्पद्यते
पटः इत्यत्र न धर्मिणो वर्तमानता पटस्यासत्त्वात्, अत्रापि पट-
व्यापारस्य पटाजनकत्वात् पटोत्पत्तेः पूर्वमसत्त्वाच्च किन्तु
पटोत्पत्त्यनुगुणकुविन्दादिव्यापारस्य वर्तमानतया तत्र वर्त-
मानताव्यवहारः। एवं च क्वचित् तस्यैव वर्तमानता क्वचिद-
न्यस्य सत्त्वम्। यः तदीयोऽन्यदीयो वाऽनुभवः स्वविषयं स्मारयति इ-

त्यादौ त्वनुभवादिव्यापारवर्तमानतैव। अस्यात्मेत्यादौ तु धर्मिण एव वर्तमानता। अभूत् पट इत्यादौ पटसत्त्वेऽपि पटोत्पादनानुकूलव्यापारातीतत्वव्यपदेशः। नष्टः पट इत्यादौ तु धर्मिनाशादेव। एवं च धर्मप्रभृतीनां प्रागभावादिप्रतियोगितया भविष्यदादित्वं तदुपलक्षितः कालो भविष्यदादिः। एवं चैतत्कृत एव काले त्रिविधो व्यवहारो न तु मुख्य इति तत्त्वम्। यत्र काले यस्य प्रागभावस्तत्र स भावी यस्य ध्वंसः सोऽतीतो य विद्यमानः स वर्तमानः। काले वर्तमानत्वादिव्यवहारस्तूपाधिवर्तमानत्वादिकृतो, यथा मध्याह्नोऽस्तीति प्रातः कालोऽतीतः सायंकालो भविष्यतीति। अत्र मध्याह्नत्वादिप्रयोजकोपाधिसत्त्वादिभिरेव काले वर्तमानादिव्यवहारो, निरुपाधिस्तु नित्यं वर्तमान एवेति सारम्। अक्षरार्थस्तु प्रारम्भपदेन प्रागभावो गृह्यते क्रियापदेन व्यापारो अभिनिर्वृत्तिपदेन च सिद्धिवाचकेन प्रकृते धर्मो लक्ष्यते स्थितिनिरोधौ तु विद्यमानतानाशौ प्रसिद्धावेव। एवं च प्रागभावसहिताभ्यां व्यापारधर्मिणोः स्थितिनिरोधाभ्यां काले नानात्वव्यवहारः क्वचित् व्यापारप्रागभावादेः क्वचिद्धर्मिप्रागभावादेर्भविष्यदादिव्यवहारः। सर्वकार्याणामिति तु नानात्वोपचार इत्यत्रान्वेति सर्वकार्यसम्बन्धी नानात्वोपचार इति तदर्थः। तथा च प्रागभावादिभिरुपाधिभिः घटादिसम्बन्धी काले भविष्यदादिव्यवहारः इति। यथा स्फटिकादौ लौहित्यादिप्रतीतिर्भ्रान्त्या तथा नात्रेत्याह पाचकवद्वेति समयः॥

(व्यो०) इदानीमुद्देशवतः कालस्य लक्षणपरीक्षार्थं कालः परापरव्यतिकरयौगपद्यायौगपद्यचिरक्षिप्रप्रत्ययलिङ्ग इत्यादि प्रकरणम्॥

अत्र च कालसद्भावप्रतिपादकमेव लिङ्गमितरस्माद्भेदकं भवतीति मन्यमानो लक्षणान्तरं नावोचत्। तथाहि—काल इतरस्माद्भिद्यते परापरव्यतिकरयौगपद्यायौगपद्यचिरक्षिप्रप्रत्ययलिङ्गत्वाद्यस्तु न भिद्यते न चासावुक्तलिङ्गो यथा क्षित्यादिः। न च तथा कालस्तस्माद्भिद्यत इति। व्यवहारो वा साध्यते विवादगोचरापन्नं द्रव्यं काल इति व्यवहर्तव्यम् परापरव्यतिकरादिलिङ्गत्वादिति। अथ प्रतिबन्धानुपलब्धेः कथमेतानि कालसद्भावे लिङ्गं भवन्ति। विशिष्टकार्यतया, विशिष्टं कार्यं विशिष्टात् कारणादुत्पद्यमानं दृष्टम्, परापरव्यतिकरयौगपद्यायौगपद्यचिरक्षिप्रप्रत्ययाश्च विशिष्टं कार्यमिति विशि-

प्रकारणपूर्वकत्वं साध्यते तथाच परापरयोर्दिक्कृतयोर्व्यतिकरविपर्ययो गृह्यते। यत्र हि दिग्विवक्षयोत्पन्न परत्व तत्रैवापरत्वं यत्रैवापरत्वं तत्रैव परत्वमुत्पद्यमान दृष्टमित्यर्थान्तरञ्च । व्यवहर्तृनिमित्ताद् व्यतिरेक संभवतीति । तथा चाधमजातीये दिग्विक्षया परस्मिन् स्थविरपिण्डे वलीपलितादिसान्निध्यमपेक्षमाणस्य उत्कृष्टजातीयं युवानमवधिं कृत्वेतरस्मात्परो विप्रकृष्टोऽयमिति बुद्धिर्भवति, तामपेक्ष्य परेण कालप्रदेशेन योगात्परत्वमिति। स्थविर चावधिं कृत्वोत्कृष्टजातीये यूनि परदिग्भागव्यवस्थितेऽपि रूढश्मश्रुकार्कश्यमपेक्षमाणस्य सन्निकृष्टा बुद्धिरुत्पद्यते । तामपेक्ष्यापरेण कालप्रदेशेन योगादपरत्वस्योत्पत्तिरिति । अत्र दिकृसंपादितपरत्ववैलक्षण्यान्न तदेव निमित्तम् । नापि निकृष्टजातीयतया जातिकृतं परत्वं संभवति । न च क्षित्यादेरन्यतम निमित्त सामर्थ्यानवधारणात् । यस्तु शिष्यते स काल इति । नन्वेकस्मिन्नेव दिने पाकजोत्पत्तिन्यायेन पिण्डयोः समुत्पादात् कथ परत्वापरत्वम् ? उत्पत्तेःप्रभृत्यादित्यपरिवर्तनापेक्षया, तथाहि–जन्मनःप्रभृत्येकस्य ादित्यपरवर्तनानि भूयांसीति परत्वम्, अन्यस्य चाल्पीयांसीत्यपरत्वम् । अथादित्यपरिवर्त्तनमेवास्तु किं कालेनेति चेत्। न। युगपदादिप्रत्ययानुमेयत्वात् ।न चादित्यपरिवर्तनादेव युगपदादिप्रत्ययाः सम्भवन्तीति। एकस्मिन्नेवादित्यपरिवर्तने सर्वेषामनुत्पादात्, व्यपदेशाभावाच्च । तथाहि–युगपत्काल इति व्यपदेशो न युगपदादित्यपरिवर्तनम् इति। न च क्रियैव काल इति वाच्यम । युगपदादिप्रत्ययाभावप्रसङ्गात् । तथाहि- क्रियायाः क्रियारूपतया विशेषाभ्युपगमादिति प्रत्ययाभावः परापरव्यतिकराभावश्च। न च क्रिया काल इति प्रतीयते, यदि च कर्तृकर्मव्यतिरिक्ता विशिष्टप्रत्ययसंपादिका क्रिया स्यात् सञ्ज्ञाभेदमात्रम्। अव्यतिरेके तु विशिष्टप्रत्ययाभाव एवेत्यलं विस्तरेण।

तथा युगपत्भावो यौगपद्यम् । बहूनां कर्तृणां कार्यकारणं बहूनां कार्याणामात्मलाभ इति । तथाहि युगपदेते कुर्वन्तीति कर्त्रालम्बनं ज्ञान युगपदेतानि कृतानीति कार्यालवन च दृष्टम् । न चात्र कर्तृमात्रं कार्यमात्रं चालम्बनमतिप्रसङ्गात् । तथाहि यत्र क्रमेण कार्यं तत्रापि कर्तृकर्मणोः सद्भावात् स्यादेतद्विज्ञानम् । न चास्ति कतरस्माद्विशिष्टं कर्तारं कार्यं वाऽऽलम्ब्यो-

त्पद्यते विज्ञानमेतदिति ज्ञायते। यच्च तद्विशेषणं क्षित्यादिविलक्षणं स काल इति न यौगपद्यायौगपद्यक्रम इति। अयुगपदेते ब्रुवन्तीति कर्त्रालम्बनं ज्ञानमयुगपदेतत् कृतमिति कार्यालम्बनज्ञानम्। अत्रापि विशिष्टयोः कर्तृकर्मणोरालम्बनत्वात् क्षित्यादिविलक्षण निमित्तं वाच्यमिति कालसिद्धिः। तथैक एव कर्ता किञ्चित् कार्यं चिरेण करोति व्यासङ्गादनर्थित्वाद्वा किञ्चित् क्षिप्रम् तदर्थितया तत्र चिरेण कर्तुं क्षिप्रं कृतमिति प्रत्ययो विलक्षणत्वाद्विलक्षण कराणमाक्षिपतीति। न च कार्यमेव निमित्तम्। तस्योभयत्र समानत्वात्। नापि कर्तैव तस्यापि साधारणत्वात्। न च निर्निमित्तं कदाचित् भावादतो विलक्षणेन निमित्तेन भवितव्यम् इत्यत आह–तेषां युगपदादिप्रत्ययानां विषयेषु कर्तृषु कार्येषु, किं विशिष्टानां पूर्वप्रत्ययविलक्षणानाम्। पूर्वं प्रत्यया. कर्तृकार्येषु तत्प्रत्ययास्तद्विलक्षणानामुत्पत्तावन्यस्य क्षित्यादिरूपस्य निमित्तस्यासम्भवाद्यन्निमित्तं स काल इति। अथ कालस्यैकरूपतया विलक्षणप्रत्ययानामभावप्रसङ्ग एव। अथ क्रियावैलक्षण्याद्विलक्षणः कालस्तद्वैशिष्ट्याच्च प्रत्ययवैशिष्ट्यमिति चेत्। एवं तर्हि दुरुत्तरमितरेतराश्रयत्वम्। तथाहि–क्रियायाः क्रियारूपतया विशेषाभावात् कथं कालविशेषकत्वम्। अथ युगपत्क्रियाविशेषितो युगपत्कालस्तद्विशेषिता च युगपत्क्रियेतीतरेतराश्रयत्वमेव। नैतदेवम्। निर्विकल्पिकायां संविदि परस्परव्यावृत्तक्रियास्वरूपावगमे सति तद्विशिष्ट. कालस्तस्माच्च युगपदादिप्रत्यया इत्युपगमान्निर्विकल्पकाच्च सविकल्पोत्पत्तिरिष्यते। यदि वा स्वरूपेणैव क्रियाया विशिष्टत्वं तत्सहकारी कालो युगपदादिप्रत्ययसंपादक इति। न चात्र विशेषणं कालः। किं तर्हि? विशिष्टकार्योत्पत्तौ विशिष्टेन निमित्तेन भवितव्यमिति। अन्ये तु विशेषणत्वात् गृहीतस्य व्यापार इत्यनुमानादेः व्यापारानुपलब्धेः प्रमाण च विनाऽसम्भवादिति कालस्य प्रत्यक्षतां ब्रुवते। तथाहि–विशेष्यज्ञानान्यथानुपपत्त्या विशेषणे ज्ञानं कल्प्यते। तच्च प्रमाणान्तरव्यापारानुपलब्धेः प्रत्यक्षमेव। ननु सर्वेषामेव कारकाणां विशेष्यज्ञानोत्पत्तौ व्यापाराविशेषेऽप्येकमेव विशेषणं नान्यदिति विशेषहेतुर्नास्तीति न स्वालम्बनज्ञानसहितस्य विशेष्यज्ञानोत्पत्तावेकस्यैव व्यापारादयमेवानुराग। स्वानुरक्तप्रत्ययजनकञ्च विशेषणं नाकारार्पकं नापि स्वशब्दाभिलिप्यज्ञानजनकमसम्भवात्।

न हि स्वाकारार्पकत्वं विशेषणस्य, आकारवादप्रतिषेधात् । नापि विशेषणशब्दाभिलप्यं विशेष्ये ज्ञानं सम्भवति, पुरुषे दण्ड इति ज्ञानानुत्पत्तेः । अथ दण्डस्यातिशयाधायकत्वानुपपत्तेर्विशेषणत्वाभाव इति चेन्न । विशेष्यज्ञानजनकत्वेनास्यैवातिशयत्वात् । तज्ज्ञाने चातिशयः, तत्सद्भावे कार्यसद्भावात् । अथ विशेषणविशेष्ययोर्भिन्नज्ञानालम्बनत्वेन प्रमाणमस्तीति चेत्, तथाहि-विशेष्यज्ञानमुत्पत्तेः पूर्वं विशेषणस्य न तद्रूपतां दर्शयति न क्रमेण प्रमाणमिति । न च विभिन्नज्ञानालम्बनत्वं विशेषणविशेष्यभावेन व्याप्तम् । नापि विशेषणविशेष्यभावः क्रमेणत्युभयथापि व्यभिचारात् । तथाहि-लिङ्गलिङ्गिनोः विभिन्नज्ञानालम्बनत्वेऽपि न विशेषणविशेष्यभाव इति व्यभिचारः । न च क्रमे साध्ये विशेषणविशेष्यभावो हेतुः, साधारणत्वात्तस्य सपक्षविपक्षाभ्यां व्यावृत्तेरिति । तथापि भिन्नज्ञानालम्बनत्वे विशेषणविशेष्ययोरनुमेयप्रतिपत्तेः प्रत्यक्षलक्षणत्वं स्यात् । तथा ह्यनुमानेन गृहीते विशेषणमिन्द्रियार्थसन्निकर्षेण सह व्यापारात् प्रत्यक्षमविशेषणात्मभूतमिति तज्जनिता प्रतिपत्तिरग्निमानेष देश इति प्रत्यक्षफला स्यात् । न चाग्नेर्लिङ्गाधारस्य पूर्वमनुमानं सम्भवति । तथापि पर्वतोऽप्यनुमीयमानोऽग्निविशिष्टः प्रतीयत इति पूर्वमग्निग्रहणम् । तत्राप्यग्निर्विशेषणमित्यन्योन्याश्रयत्वम् । अथाग्नौ समवायोऽग्नित्वस्य विशेषणम् । तत्राप्यग्नित्वमग्नौ विशेषणमिति तदेव दूषणमविशिष्टस्य सर्वत्र सद्भावात् विशेषकत्वानुपपत्तिः । अथ पर्वतोऽग्नेर्विशेषणम् । तत्रापि पर्वतत्वं तत्र च समवायो विशेषणमिति पूर्ववद्दूषणम् । अथाग्निसंयोगः पर्वतस्याग्नेश्च विशेषणम् तस्यापि संयोगिनौ तयोरपि संयोग इति पूर्वदोषप्रसङ्गः । तस्मादनुमानं प्रमाणीकुर्वता विशेषणविशेष्यालम्बनमेकविज्ञानमभ्युपेयम् । एवञ्च धूमविशिष्टस्य पर्वतस्योपलंभादग्निविशिष्टे प्रतिपत्तिर्भवति । अथैकज्ञानालंबनयोरङ्गुल्योरिवैकज्ञानालम्बनपक्षे कथं विशेषणविशेष्यभावः प्रधानोपसर्जनभावेन स एव कस्मादिति चेत् । विभिन्नज्ञानालम्बनत्वेपि समानम् । तथाहीदं विशेषणमिदं विशेष्यमिति विभिन्नज्ञानालम्बनत्वाविशेषे कथं नियमः । प्रधानोपसर्जनभावादिति चेत् । इष्टम् । तदेकज्ञानलम्बनत्वेपीति दोषाभावात् । अथैकश्चायं विशेषणविशेष्यभावो न धर्मपदार्थान्तर्गतः तद्व्यतिरेकप्र

निषेधात् । नापि द्रव्यादिपदार्थान्तरगतः । षट्सूपलम्भात् इति । नहि द्रव्यादीनामन्यतमः षट्सूपलभ्यत इति । अथ विशिष्टप्रत्ययहेतुरदृष्टो विशेषणविशेष्यभाव इति चेत् । तस्य चैकतायामिदं विशेषणमिद विशेष्यमिति व्यवस्थानुपपत्तिः । विशेषणविशेष्यत्वस्यैकत्वादिति । तथाहि यदेव विशेषणत्वं तदेव विशेष्यत्वमित्येकस्य पुरुषस्यैकस्मिन्नेव काले तदेव विशेषण विशेष्यं चेति स्यात् । न चैतदस्ति । तस्माद्विशिष्टादृष्टो न विशेषणविशेष्यभावः । अथ नैको दृष्टो विशेषणविशेष्यप्रतिनियतः तथापि विशेषणविशेष्ययोर्भावो न स्यात् । अतो यथासम्भव विशेषणविशेष्यभावो ग्राह्यः क्वचित्संयोगः क्वचित् समवाय इति । तथा चाभोगेऽपि विशेषचक्षुरादिसम्बन्ध एव विशेषणविशेष्यभावस्तेन सता च विशिष्टप्रत्ययजननात् । न चादृष्टस्यान्यत्र कारणं निषिध्यते । सकलकार्येषु साधारणत्वात् । नाप्यदृष्टो दृष्टकारणम् प्रत्याचष्टे । शरीरादेरप्यभावप्रसङ्गात् । तथाहि—सुखादिसंपादकोऽदृष्ट एवास्त्वलं शरीरादिपरिकल्पनयेति । अथादृष्टसद्भावेऽपि शरीरादयो दृष्टत्वादभ्युपगम्यन्ते । तर्हि विशेषणचक्षुरादिसम्बन्ध एव दृष्टत्वाद्विशेषणविशेष्यभावोऽभ्युपगन्तव्यः । अथ विशेषणे तस्यावृत्तेः कथं तद्भाव इति चेत् । नादृष्टवद् व्यापारापेक्षया तद्वृत्तित्वात् । अथैकज्ञानालम्बनत्वे सुरभि द्रव्यमिति भिन्नेन्द्रियग्राह्ययोर्विशेषणविशेष्यभावो न स्यात् । नहि भिन्नेन्द्रियग्राह्यमेकं विज्ञानं समस्ति दृष्टमिति । न विशेषणविशेष्ययोर्भिन्नज्ञानालम्बनत्वे बाधकोपपत्तेरनुसन्धानज्ञानमेतत् । तथाहि—घ्राणेन गन्धमुपलभ्य चक्षुषा स्पर्शनेन वा द्रव्यं पश्चान्मनसाऽनुसन्धत्ते—सुरभि द्रव्यमिति । न च सर्वं विशेष्यज्ञानमनुसन्धानज्ञानमिति वाच्यम् । तत्र हि बाधकानुपपत्तेः । तथा विशेषणविशेष्ययोर्भिन्नज्ञानालम्बनतायामेकं दण्डिनमहमद्राक्षमिति स्मरणं न स्यात् । तस्य ह्यनुभवानुरूपत्वात् । अथ पुरुषप्रत्ययसामानाधिकरण्याद्दण्डिनमित्यादिप्रयोगेषु पुरुषस्यैकक्रियासम्बन्धात् तदालम्बनमेव विशेष्यज्ञानमिति चेत् । न पुरुषस्य विशेष्यतया प्राधान्यात् । क्रियासम्बन्धः सामानाधिकरण्यं चोपपद्यत एवेत्यलमतिविस्तरेण ।

अन्ये त्वेकज्ञानालम्बनत्वे विशेषणविशेष्यभावो न स्यात् । तयोः करणकर्मरूपत्वादिति मन्यन्ते । तथाहि विशेष्यते अने-

नेति विशेषणं करणम् । विशिष्यत इति विशेष्यं कर्म । तच्चैकज्ञानालम्बनतायां न स्यात् उभयोः कर्मत्वादिति । नाप्यज्ञातव्यापारे सहकारित्वाद्विशेषाच्चक्षुरादिभ्यो विशेषः स्यादिति तज्ज्ञानं कल्प्यते । यदि च दण्डत्वविशिष्टो दण्डः पुरुषस्य विशेषणमिष्यते तस्याप्यन्यदित्यनवस्था । दण्डश्चेद्दण्डत्वस्य विशेषणमितरेतराश्रयत्वं च स्यादिति विशेष्यज्ञानाभावप्रसङ्गः । अस्ति च विशेष्यज्ञानमिति तदन्यथानुपपत्त्या विशेषणज्ञानमात्र ज्ञायते । यच्चेदं विशेष्यज्ञानमुत्पत्तेः पूर्वं विशेषणस्यानन्तरूपतां दर्शयतीत्युक्तम् । तत्र काम विशेषणरूपतेति विचार्यम् । नहि दण्डे दण्डत्वादिवद्विशेषणरूपता प्रतिभाति । अथ स्वानुरक्तप्रत्ययजनकत्वं विशेषणत्वम् । तच्च यदि स्वालम्बनज्ञानसहितस्य विशेष्यज्ञानजनकत्वमभ्युपगम्यतेऽथाभिमत । न चैकविज्ञानालम्बनत्वेऽनुरागार्थं पश्यामः, तच्छब्दाभिलप्यत्वादेः प्रतिषेधात् । नापि क्रमो विशेषणविशेष्यभावहेतुरभ्युपगमात् । विशेष्यज्ञानं तु विशेषणज्ञानं दर्शयत्येव । अन्यथा हि तद्विशिष्टतायोगात् । यच्चेदमनुमानादप्रतिपत्तेः प्रत्यक्षफलकत्वमिति । तच्चासत् । बाधकसद्भावेनैकज्ञानालम्बनत्वाभ्युपगमात् । न चैवं सर्वत्र बाधकमस्तीति । अन्ये तु धूमोपलम्भानन्तरमग्न्यनुमाने सत्यग्निमानयं पर्वत इति ज्ञानं प्रत्यक्षफलमेवेति ब्रुवते, अन्यथा ह्यग्निमत्त्वपरोक्षतानिर्देशो न स्यात् । अत्र च साध्यधर्मविशिष्टधर्मिणः साध्यत्वे कथमेतत् साधनं स्यादिति वाच्यम् । यश्चैष विशेषणविशेष्यभावः किमेकोऽनेको वेति । तत्रैकत्वाभ्युपगमेऽपि न विशेषणविशेष्ययोरव्यवस्था निमित्तान्तरस्यासाधारणस्य सद्भावात् । तथाहि विशेषणं स्वानुरक्त प्रत्ययोत्पादकत्वेनेत्युक्तम् । विशेष्यं तु विशेष्यज्ञानविषयत्वेन, विशेषणविशेष्यभावस्तु परं विशेष्यज्ञानोत्पत्तौ सहकारी न पुनर्व्यवस्थाकारणमिति । न च संयोगसमवायावेव विशेषणविशेष्यभावः । तयोः समवाये अभावे वाऽभावात् । अत्रापि विशिष्येन्द्रियसम्बन्धोऽस्तीति चेन्न । तस्य विशेषणावृत्तित्वात् । नाप्यदृष्टवद्व्यापारापेक्षया तद्वृत्तित्वं संयोगसमवाययोरन्यत्रानुपलब्धेः । तथाहि-संयोगसमवाययोर्यदि व्यापारापेक्षया विशेषणवृत्तित्वमिष्येत । विशेष्यसम्बन्धं विनाऽभावसमवाययोर्ग्रहणम् स्यात्, यत्र हि तयोर्वृत्तिस्तत्रैव

ग्रहणजनकत्वोपलब्धेः । अदृष्टस्य त्वात्मसमवेतस्यापि सकलकार्यो-
त्पत्तौ साधारणत्वात् । संयोगादिसद्भावे तदभावे च केवलस्य व्या-
पारोऽभ्युपगम्यत एव । स चोभयत्र व्यापारापेक्षया सम्बद्ध इव स-
म्बद्धो न परमार्थतः । न चोपचरितस्येन्द्रियासहकारित्वम्, अपरोक्ष-
ज्ञानस्यान्यथासम्भवेन तद्भावसिद्धेः । दृष्टञ्च श्रोत्रान्योपचरितस्यापि
शब्दज्ञानसहकारित्वमिति । यच्चेदं सुरभि द्रव्यमित्याद्यनुसन्धान-
ज्ञानमित्युक्तम् । तदसत् । अन्यत्राप्येवंप्रसङ्गात् । न चात्र विभिन्नज्ञा-
नालम्बनत्वे किञ्चिद्बाधकमस्तीति तदेवाभ्युपेयम् । नापि दण्डिन-
महमद्राक्षमिति स्मरणानुपपत्तिः । विशेषणज्ञानजनितसंस्कारस्य
विशेष्यज्ञानसहकारिणः संस्कारारम्भेणापि तद्भावात् । यच्चेदमेक-
ज्ञानालम्बनत्वेपि विशेष्यस्य प्राधान्यात् क्रियासम्बन्धः सामाना-
धिकरण्यं च घटत इति । तन्न । प्राधान्यस्यैव विचार्यत्वात् । एक-
ज्ञानालम्बनतायां हि किं कृतं प्राधान्यमिति चिन्त्यम् । सामाना-
धिकरण्यं त्वेकज्ञानालम्बनत्वाविशेषे पुरुषप्रत्ययेन न च दण्डप्रत्यये
नेति विशेषणहेत्वाभावः । अथ विभिन्नविशेषणनिमित्तयोरेक
स्मिन्नर्थे वृत्तेः सामानाधिकरण्यम् । दण्डीतिप्रत्यये दण्डो विशेषण
पुरुष इति । न चैव दण्डस्य विशेषणत्वेऽन्यद्विशेषणमस्तीति सामा-
नाधिकरण्यम् । नैतदेवमनेकस्य प्रमेयस्य प्रतिभासाभ्युपगमात् त-
थाहि न दण्डीति ज्ञाने दण्डत्वाद्यपि प्रमेय प्रतिभासत इत्यभ्युपगमे
कथं न सामानाधिकरण्यम् । तथा सूत्रव्याघातश्च । समवायिनः श्वै-
त्याच्छ्वैत्यबुद्धेश्श्वेते बुद्धिस्ते कार्यकारणभूते कार्यकारणस्वभावे
इति । न पुनर्भूताभिधानमुपमायां मुख्य बाधकानुपपत्तेः, ना-
पि प्रमेयविशेषादेव प्रत्ययविशेषः सहकारिवैलक्षण्येनापि भावात् ।
नन्वेवं तर्हि विशेषणवत् सम्बन्धेऽपि ज्ञानं कल्पनीयम् । नच तदनुरा-
रागस्याप्रतिभासेन चक्षुरादिवदगृहीतस्यापि व्यापाराभ्युपगमात् ।
नाप्यभेदोपचाराद्विशेषणविशेष्यभावः । पुरुषो दण्ड इति ज्ञानानु-
पपत्तेः । अथ विशेषणं विशेष्यञ्च सम्बन्धं लौकिकीं स्थितिं गृहीत्वा
सङ्कलय्यैव तथा प्रत्येति नान्यथेति सङ्कलनाज्ञानमिति चेत् । नैतद्यु-
क्तम् । एतावतो ज्ञानकलापस्य सद्भावे प्रमाणभावात् । तथाहि--परं
विशेष्यज्ञानमुत्पद्यमानं दृष्टम् । तच्चान्यथा न घटत इति विशेषणेपि
ज्ञानं क्लृप्तम् न पुनर्ज्ञानान्तरसद्भावे प्रमाणमस्तीति । न चेदं निर्विषय

कल्पनाज्ञानमर्थान्वयव्यतिरेकानुविधानात्, बाधकानुपपत्तेश्च। नदेवं गृहीतस्य विशेषणस्य विशेष्यज्ञानजनकत्वाल्लिङ्गादिव्यापारानुपलब्धेश्च प्रत्यक्षत्व कालस्येति। सत्यम्। तथैकज्ञानालम्बनत्वेपि युगपदादिप्रत्यया न कालस्य लिङ्गम्। तस्यापि विशेषणतयालम्बनत्वात्। अमीषाञ्चेन्द्रियानुविधानेन प्रत्यक्षफलत्वादित्यलम्।

सर्वकार्याणामुत्पत्तौ कारणत्वं प्रतिज्ञातमाह—सर्वकार्याणामुत्पत्तिस्थितिविनाशहेतुरिति। उत्पत्तिरात्मलाभो भावानां, स्थितिः क्रमभाव्यनेककार्यकर्तृत्वं, विनाशः प्रध्वंसस्तेषां कारणमिति। अत्र तु यद्यपि सर्वकार्याणां हेतुरित्युक्ते सर्वमेतल्लभ्यते तथाप्यवान्तरविशेषापेक्षया भेदकथनम्। अथ तेषां हेतुः काल इति कथं ज्ञायते इत्याह—तद्व्यपदेशादिति। तथा ह्युत्पत्तौ कालेन व्यपदेशो मध्याह्ने उत्पन्नोऽपराह्णे उत्पन्न इति। स्थितौ च मध्याह्ने यावत् स्थितोऽपराह्णश्चेति। विनाशे तु प्रातर्विनष्टो वर्षान्ते विनष्ट इत्यादि। कारणेन तु कार्यस्य व्यपदेशो यथा चाक्षुषं विज्ञान मानसं विज्ञानमिति। अथ करणेनापि व्यपदेशः सम्भवत्येव–मूर्ताः परमाणवो दण्डी पुरुष इति। सत्यम्। तथापि सम्बन्धे सति व्यपदेशोपलब्धेः, न चान्यः सम्बन्धोऽत्र सम्भवतीति कार्यकारणभावो ज्ञायते। अथास्ति संयोगो, न गुणकर्मादेरव्यपदेश्यताप्रसङ्गात्। अस्ति च तत्रापि व्यपदेशः पूर्वाह्णे शब्दः तथोत्क्षेपणमित्यादि। अथायं व्यपदेशः संयुक्तसमवायात् भविष्यतीति। नाभाव तदभावप्रसङ्गात्। अतः कार्यकारणभाव एव सम्बन्धोऽभ्युपेयः। तस्य हि व्यापकत्वादिति। तथा नियत एव काले कुसुमादेः कार्यस्योपलम्भो न कालान्तर इत्यन्वयव्यतिरेकाभ्यां तस्य कारणत्वं विज्ञायते। तथाहि वसन्तसमय एव पाटलादिकुसुमानामुद्भवो न कालान्तर इत्येवं कार्यान्तरेष्वप्यूह्यम्। तथा प्रसवकालमपेक्षत इति व्यवहारात् कारणत्वं कालस्य। तथाहि—सहकारिण्यपेक्षोपलब्धेः कालस्य सहकारितामन्तरेण प्रसूतावयं व्यवहारो न स्यात्। तथा न परं युगपदादिप्रत्ययहेतुः, क्षणलवनिमेषकाष्ठाकलामुहूर्तयामाहोरात्रार्धमासमासर्त्वयनसम्वत्सरयुगकल्पमन्वन्तरप्रलयमहाप्रलयव्यवहारहेतुश्चेति। तथाहि—परमाणोश्चावरुद्धनभोदेशत्यागोपलक्षितः कालः क्षणः। तद्द्वयं लवः। प्रोक्तनिमेषश्च लवद्वयम्। काष्ठा निमेषाः पञ्चदश चेह

प्रकीर्तिताः । त्रिंशत् काष्ठा कला प्रोक्ता कला त्रिंशन्मुहूर्तकः । इत्येव मासादेरपि लक्षण पुराणप्रसिद्धं ग्राह्यमिति । स चायं क्षणादिव्यवहारो विशिष्टनिमित्तमाक्षिपति । नचान्यत् निमित्तं सम्भवतीति क्रियादेः प्रतिषेधादिति कालसद्भावसिद्धिः । तस्य समवायित्वगुणत्वप्रतिपादनार्थं तस्यैव गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागा इति वाच्यम् । अत्र केषांचिदुत्पत्तौ समवायिकारणमेतैर्गुणैर्गुणवान् काल इति । अथ द्रव्यत्वादेव संख्यासद्भावसिद्धौ किमेकोऽनेको वेति संशये तन्निरासायाह—काललिङ्गाविशेषादेकत्वं सिद्धमिति । कालस्य यल्लिङ्ग युगपदादिप्रत्ययरूपं तदविशिष्टमिति नानात्वाप्रतिपादकत्वम् । ननु चासिद्धमनयुगपदादिप्रत्ययानां परस्परं विशिष्टत्वात् न च कार्यवैलक्षण्यं कारणवैलक्षण्यं विना भवतीति नानात्वमेव न्याय्यम् । सत्यम् । कार्यवैलक्षण्याद्भिन्नायत एव सामग्रीवैलक्षण्यम् । तच्च सहकार्यन्तरानुप्रवेशेनापि घटत इति कथ कालस्य नानात्वम् । उक्तञ्चात्र विशिष्टक्रियोपचितस्य विशिष्टप्रत्ययजनकत्वमिति । न चैवं परमाणूनां चातुर्विध्यं व्याहन्यत इति पूर्ववद्वाच्यम् । नदेवं नानात्वे प्रमाणाभावाद्द्रव्यस्य च सङ्ख्येयत्वादित्येकत्वं सिद्धम् । तथा तदनुविधानात् पृथक्त्वमिति । तेनैकत्वेनानुविधानं साहचर्यायत्र ह्येकत्व तत्रावश्यमेकपृथक्त्वं भविष्यतीति । न चैवं परिमाणविशेषणसाहचर्यमस्तीति ज्ञानार्थं क्रमातिक्रमेण पृथक्त्वनिरूपणमिति । तथा कारणे काल इति वचनात् परममहत्परिमाणमिति । युगपदादिप्रत्ययानां कारणे कालाख्येति सूत्रं दर्शयति । तथाहि-- युगपदादिप्रत्ययानां कारणे काल इत्याख्या सञ्ज्ञेति ते च प्रत्ययाः सर्वत्र भवन्तीति व्यापकत्वं कालस्य । तस्माच्च परममहत्त्वमिति । यदि चाणुपरिमाणानधिकरणत्वे सति नित्यद्रव्यत्वात्परममहत्त्वमिति पूर्ववद् वाच्यम् । तथा कारणपरत्वादिवचनात् संयोग इति कारणपरत्वात्-कारणापरत्वाच्च कार्ये परत्वापरत्वे इति सूत्रे दर्शयति । कारणपरत्वं हि कालपिण्डसंयोगः परत्वोत्पादकत्वादुपचारेण विवक्षित इति वक्ष्यामः परत्वपरीक्षायाम् । तद्विनाशकत्वाद्विभाग इति । तस्य हि संयोगस्य कृतकत्वादवश्यं विनाशेन भवितव्यम् । स च सर्वत्राश्रयविनाशाभावाद्विभागादेव विनश्यतीति विभागः सिद्ध इति । अथ कालस्य कथं द्रव्यत्वं नित्य-

त्व चेत्याह तस्याकाशवद्द्रव्यत्वनित्यत्वे सिद्धे इति । तथाहि गुण वत्त्वादनाश्रितत्वाच्च द्रव्यं कालः । समानासमानजातीयकारणासम्भवाच्चाकार्यत्वेन नित्य इत्यतिदेशार्थः । ननु चात्र कालस्यैकतायां वर्तमानादिव्यवहारः कथं स्यादित्याह काललिङ्गाविशेषादञ्जसैकत्वमपीत्यादि । यद्यपि काललिङ्गाविशेषादञ्जसा मुख्यया वृत्त्यैकत्व सिद्धम् । तथापि सर्वकार्याणां प्रारंभश्च क्रियाभिनिर्वृत्तिश्च स्थितिश्च निरोधश्चेति तथोक्तास्त एवोपाधयः तद्भेदान्नानात्वमिति । तथा च प्रारम्भक्रियोपलक्षितोऽनागतः कालः अभिनिर्वृत्तिरात्मलाभः तदुपलक्षितश्च वर्त्तमानः तथा स्थिति क्रमभाव्यनेककार्यकर्तृत्वं तदुपलक्षितोऽपि वर्त्तमान एव तस्य यावद्वस्तुसद्भावः व्याप्यत्वाद्यावद्धि वर्त्तते वस्तु तावद्वर्तमान इति । तथा निरोधो विनाशः तदुपलक्षितश्चातीत इति । अथ कथं नानात्वमुपचर्यत इत्याह मणिवत् पाचकवद्वेति । यथा मणेः स्वरूपापरित्यागेनैवोपाधिभेदादुपचर्यते नानात्व पीतो रक्त इति । तद्वदिहापि भिन्नक्रियोपाधिवशाद्वर्तमानादिभेद इति । यथा वा स्वरूपापरित्यागेनैव पुरुषस्य नानाक्रियावशात् पाचकादिभेदस्तद्वदिहापीति । वास्तवं हि भेदबाधकोपपत्तेः । तथाहि यदि वर्तमानादेर्वास्तवो भेदः व्यापकत्वं च स्यात् । एकस्य वस्तुनोऽनेककालसम्बन्धाद्व्यपदेश्यता प्रसज्यते । न हि वर्तमानेन व्यपदेशः । अतीतानागताभ्यामपि सम्बन्धात्, नाप्यतीतेतराभ्यामपि सम्बन्धादव्यापकत्वम् । तर्हि नानेकस्य पुरुषस्यैकस्मिन्नेव देशे अतीतानागतवर्तमानप्रत्ययाः प्राप्नुवन्ति । ते तथा दृष्टा स्तथा चैकस्य विद्यमानक्रियोपलम्भादेकस्मिन्नेव देशे वर्तमानप्रत्ययस्तत्रैवान्यस्य क्रियोपरमादतीतप्रत्ययोऽन्यस्य चोत्पद्यमानक्रियोपलम्भादनागत इति क्रियावशादेव नानाप्रत्ययजनकत्वं पुनर्वास्तवोऽस्य भेद इति स्थितम् ॥

इति कालः ॥

(भा०) दिक् पूर्वापरादिप्रत्ययलिङ्गा । मूर्तद्रव्यमवधिं कृत्वा मूर्तेष्वेव द्रव्येष्वेतस्मादिदं पूर्वेण दक्षिणेन पश्चिमेनोत्तरेण पूर्वदक्षिणेन दक्षिणापरेण अप-

रोत्तरेण उत्तरपूर्वेण चाधस्तादुपरिष्टाच्चेति दश प्रत्यया यतो भवन्ति सा दिगिति ॥

तस्यास्तु गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागाः । कालवदेते सिद्धाः । दिग्लिङ्गाविशेषादञ्जसैकत्वेऽपि दिशः परममहर्षिभिः श्रुतिस्मृतिलोकव्यवहारार्थं मेरुं प्रदक्षिणमावर्त्तमानस्य भगवतः सवितुर्ये संयोगविशेषास्तेषां लोकपालपरिगृहीतदिक्प्रदेशानामन्वर्थाः प्राच्यादिभेदेन दशविधाः सञ्ज्ञाः कृताः, ततो भक्त्या दश दिशः सिद्धाः । तासामेव देवतापरिग्रहात् पुनर्दश सञ्ज्ञा भवन्ति–'माहेन्द्री वैश्वानरी याम्या नैर्ऋती वारुणी वायव्या कौबेरी ऐशानी ब्राह्मी नागी चेति' ॥

(सू०) दिशमाह दिगिति । लिङ्ग प्रमाणं, पूर्वापरादिप्रत्यय एव तत्र तादृशप्रमाणमित्यर्थः । एतादृशप्रत्ययस्य जनकत्वेन दिक् सिध्यतीत्यर्थः । तदेव विशदयति मूर्तद्रव्यमिति । अमूर्तद्रव्यस्य पूर्वादिप्रत्ययावधित्वं पूर्वादिप्रत्ययविषयत्वं च न दृष्टमित्यत उभयत्र मूर्तत्वम् । काले पूर्वापरादिव्यवहारस्त्वतीतत्वाद्यौपाधिक एवेति बोध्यम् ! पूर्वेणेत्यादिक स्वार्थिकेणप्रत्ययान्तम्, पाणिनिमते तु स्वमते स्वार्थिकतृतीयान्तम । इदं पूर्वमित्यादिरर्थः । अन्यनिमित्तासंभवादिति । पूर्वस्यां दिशीत्येवमेव व्यवहारः, न च दिशोऽन्यत्तन्निमित्तं भवितुमर्हति। कालो यदि तन्निमित्तं तदा पूर्वकाल इत्यादिरेव व्यवहारः, पूर्वदिग्वर्तिनि वर्तमानवस्तुन्यपि सत्त्वात् । द्रव्यत्वेन तत्र संख्यादिगुणपंचकमाह तस्यास्त्विति। कालवदेत इति। यथा काललिङ्गकालिकपरत्वापरत्वाविशेषात् कालस्यैकत्वं तथा दिग्लिङ्गदैशिकपरत्वापरत्वाविशेषाद्दिशोऽप्येकत्वमित्यर्थः । तथाहि

एकदेशमधिकृत्य कश्चित्पूर्वः कश्चिदपर इति प्रतीत्या पूर्वापरयोर्व-स्तुनोः परत्वापरत्वे विषयीक्रियेते । अन्तरा बहुतरसंयुक्तसंयोगा-ल्पतरसंयुक्तसंयोगज्ञानं च तयोरुत्पादकम् । तयोरसमवायिकारणा-नि च ते संयोगाः परापरवस्तुनोः प्रत्यासत्त्यभावादनुपपन्नाः, अतः प्रत्यासत्तिघटिका दिक्कल्प्यते । तस्याश्च समस्तपरापरप्रत्यासत्ति-घटकत्वप्रविशिष्टमत एकत्वमेव दिश इत्यर्थः । दिग्लिङ्गकल्प्यमानदि-शोऽविशेषेण दिग्लिङ्गस्याविशेषः । यथा काले एकत्वानुविधाना-त्पृथक्त्वं तथा दिश्यपि । पूर्वदर्शितसूत्रात् यथा काले परममहत्त्वं तथा दिश्यपि । यथा पूर्वदर्शितापरसूत्रात् काले संयोगस्तथा दिश्यपि । यथा काले तद्विनाशकत्वाद्विभागस्तथा दिश्यपीत्यर्थः ।

ननु यदि दिगेकैव तदा कथं प्राच्यादयो दश दिश इति व्यवहार इत्यत आह दिग्लिङ्गाविशेषादिति । दिग्लिङ्गाविशेषो व्याख्यात एव । तस्मादञ्जसा दिश एकत्वे सिद्धेऽपि परममहर्षिभिर्मरीच्या-द्यैः प्राच्यादिभेदेन दशविधा दिशः संज्ञाः कृता इत्यर्थः । कि-मर्थमित्यत आह श्रुतिस्मृतिलोकव्यवहारार्थमिति । 'प्राचीप्रवने देशे यजेते'ति 'न प्रतीचीशिराः शयीत' इति श्रौतो व्यवहारः । 'आयुष्यं प्राङ्मुखो भुंक्ते' इति स्मार्तः । 'दक्षिणेन याही'त्यादिर्हि लौकिकव्यवहारस्तदर्थमित्यर्थः । ताः संज्ञाः किं पारिभाषिक्यः किं वा नेत्यत आह अन्वर्था इति । अन्येषामनुगतस्वार्था अन्येषां सम्बन्धस्वार्था इत्यर्थः । स्वार्थो हि दिशोऽन्येषां सम्बन्ध इत्यन्वर्थाः प्राच्यादिसञ्ज्ञा इत्यर्थः । केषां सम्बन्धस्वार्था इत्यत्राह भगवतः सवितुरिति । लोकपालपरिगृहीतेति । सुमेरुं पर्वतं प्रदक्षिणं यथास्यात्तथा आवर्तमानस्यावर्तयतो(१) भगवतः सवितुर्ये संयोगविशेषाः पूर्वाचलोपरिभागावच्छिन्ना

(१) वर्त्तयत इति पाठान्तरम् ।

आकाशसंयोगविशेषास्तेषामिन्द्रादिलोकपालपरिगृहीतदिग्देशानां च सम्बन्धस्वार्थाः संज्ञा इत्यर्थः । दिग्देशानामित्यत्र चार्थः पूरणीयः । तथाचैकस्या एव दिशस्तादृशरविसंयोगतादृशदिग्देशोपाधिकयो दश संज्ञा इत्यर्थः । प्राच्यादिभेदेनेति । प्राच्यवाचीप्रतीच्यादिभेदेन भिन्नाः संज्ञा इत्यर्थः । प्रथममञ्चति सूर्य इति प्राची । अवाक् तदनन्तरमञ्चति सूर्य इति अवाची । प्रतीपमञ्चति इति प्रतीचीत्यादि यथाकथञ्चिदनुगतार्थता बोध्या । नक्षत्रमण्डलापेक्षया यतः पृथिवी सा दिगधः । पृथिव्यपेक्षया नक्षत्रमण्डलं यतः सा दिगूर्ध्वा इति बोध्यम् । अवान्तरोर्ध्वाधोव्यवहारश्च वह्निज्वाला यत्र याति तदूर्ध्वं गुरुद्रव्यं यत्र पतति तदध इत्येवं रीत्या । ननु सूर्यसंयोगवशाल्लोकपालपरिगृहीतदिग्देशवशाच्च दिशां भेदेन संज्ञादशकं प्रसक्तमित्यत आह अतो भक्त्येति । अभक्त्याऽभेदेन तद्देशदिशां भेदापरिग्रहेण दशविधाः संज्ञा इत्यर्थः । तासामेवेति । उपाधिभेदेन भिन्नत्वेन व्यवाह्रियमाणानां तासां दिशामेवेत्यर्थः ॥

(से०) अथावसरसङ्गत्या दिशमुपदिशति दिगिति । पूर्वापरादिप्रत्ययलिङ्गतामेव स्फोरयति मूर्तेति । ईदृशि प्रत्यये विभुनो द्रव्यस्यावध्यवधिमद्भावोऽस्ति इत्यत्र मूर्तपदं, न ह्याकाशात् घटः पूर्वेणाति सम्भवति घटस्थलेऽप्याकाशसत्त्वात् अत एव न घटाकाशः पूर्वेणाति । नन्वाकाशात् घटः पूर्वेणेति मा भवतु व्यापकतया तदवधिकपूर्वस्या सम्भवात्, व्यापकतयैव तु घटावधिकपूर्वभागेऽपि सत्तया घटाकाशः पूर्वेणाति प्रत्यये किमपूर्वं तथाच किमिति चेत्, आकाशस्य व्यापकतया तदवधिकपूर्वदेशमात्रावस्थित्यभावाभिप्रायेण तथाभिधानात्। इद पूर्वेणैतस्मादित्यादीदि पूर्वमित्याद्यर्थे । ननु परिशेषं विना कथ दिक् सिद्धरत आह अन्येति । आद्यो भास्वत्संयोग इह निमित्त इदमस्मात्प्रथमादित्यसंयोगसिद्धमित्यर्थकत्वात् । न च प्रथमादित्यसंयोगो अन्यत्र घटादौ साक्षात्सम्बन्धेन सम्भवति स्वरूपसम्बन्धस्तु सम्ब-

न्धान्तरात् संभवति, परंपरासम्बन्धघटकस्तु न पृथिव्यादिः पृथिव्या-
द्यसम्बद्धेऽपि पतत्रिप्रभृतौ पूर्वापरादिप्रत्ययप्रागभावादाकाशात्मनो-
स्त्वतिप्रसङ्गभयादेव ततो व्यावृत्तौ, कालस्तु न परधर्ममात्रोपनायको-
ऽतिप्रसङ्गात्। क्रियासंयोगयोस्तु नैको येन क्रियामात्रोपनायकतया सि-
द्धस्य कालस्य संयोगोपनायकत्व स्यात , तस्मात् कालः क्रियामा-
त्रोपनायकतयैव सिद्ध इति संयोगोपनायकमन्यत्कल्पनीयम्। किञ्च
कालोपनयेन सर्वप्रमातृसाधारणो व्यवहारस्तन्यते वर्तमानादेः स-
र्वान् प्रति समानत्वात् , असौ तु व्यवहारो न प्रमातृमात्रसाधारणो-
ऽस्माकं प्राच्या अन्येषां प्रतीचीत्वात् , तस्मादसाधारणव्यवहारनि-
दानं द्रव्यान्तरमेव कल्पनीयम्। तदेव दिग्। नचोपाधिना संयोगेने-
वान्यथासिद्धिर्येनैव संयोगेनैकस्य प्राचीव्यवहारः तेनैवापरस्य प्रती-
चीव्यवहारेण संयोगस्य सर्वसाधारणत्वाद्दिक्षु धर्मिग्राहकमानाद-
साधारणव्यापारोपहारप्रापकतया याति। न च कालोऽप्यसाधारणं
व्यवहारं कल्पयति अत्र मध्याह्नस्यान्यत्रार्द्धरात्रत्वादिति वाच्यम्।
अत्र दिशोऽपि प्रयोजकत्वात् केवलकालकलितास्तु साधारण एव
वर्तमानादावसाधारण्यानिरीक्षणादित्याचार्याः।

ननु इदमस्मात्पूर्वमित्यस्येदमस्मात्प्रथमादित्यसंयोगसिद्धमिति
नार्थः तथा प्रत्ययेऽवधिमतोऽभावे अवधिभानानुपपत्तेः। नचावधि-
भानं विनासौ प्रथमादित्यसंयोगसंयोगसम्बद्ध इति प्रत्ययो नोपप-
द्यते येन तादृशो विषयस्य सावधित्व स्यात्। नाप्येतदपेक्षयेदं प्रथ-
मादित्यसंयोगसन्निहितमित्यर्थः। तथा चावश्यवधिमद्भाव उपप-
द्यत इति वाच्यम्। अत्र प्रत्यय आदित्यसंयोगस्य घटे प्रत्ययेन स-
न्निधानमात्रप्रत्ययेनोपनायिका नापि क्षणाः। न चैतदपेक्षयेदमादित्य-
संयुक्तसंयोगाल्पीयस्त्ववदादित्यगंकत्वम् अस्मादिदं पूर्वमित्यस्य भूय-
स्त्वं तु प्रतीचीप्रत्ययमितिवाच्यम्। अत्र घटकानामेव पतत्रिस्फुरणेन
दिशो परिस्फुरणात्(?)तदपेक्षयेद संयुक्तसंयोगाल्पीयस्त्ववदितिवत्।
अत्र हिमवत्संयुक्तोऽयं प्रदेशः तत्संयुक्तोऽयमित्यादिसंयुक्तसंयोगा-
ल्पीयस्त्वमधिकत्वे तु भूयस्त्वम्। किञ्च संयोगस्य साधारणत्वमुक्त
तदप्युक्तनिर्वर्त्यमेव। यद्वा इदमस्मात्पूर्वमित्यस्येदमस्मादुत्तरसान्निहि-
तादित्यसंयोगवदित्यर्थः, तत्सान्निधानसन्निधानेनावश्यवधिमद्भाव
आहत एव आदिमादित्यसंयोगयोगस्तु न घटकमन्तरा घटते घटिका च

दिगेव। संयोगस्य च साधारणमप्राप्तिरेव विचित्राभ्यामपि संयोगाभ्यां योगं विना विशिष्टव्यवहारानुपपत्तेः । वैशिष्ट्यं च दिक्कालनिवर्त्यमेव। यद्वा इदमस्मात्पूर्वमित्यस्योदयाचलसन्निहितसंयोगादित्यर्थः। इदमस्मात्पश्चिममित्यस्येदमस्मादस्ताचलसंयोगवदित्यर्थः। तथाचैकस्यैव संयोगस्य यदपेक्षयोदयाचलसान्निध्यं तदपेक्षया प्राचीव्यवहारजनकत्वं यदपेक्षयाऽस्ताचलसान्निध्यं तदपेक्षया प्रतीचीव्यवहारजनकत्वमिति साधारण्यं स्फुटमेव। एवमस्मात्पूर्वमित्यस्येदमस्मादुदयाचलसंयुक्तसंयोगाल्पीयस्त्ववद् इत्यर्थः। तस्य चोदयाचलस्वल्पसंयोगपरम्परावादित्यर्थः। न च संयोगपरंपरान्यवृत्तिरित्यत्र विना दिशं युज्यते। किञ्च संयोगस्य असाधारणव्यवहारप्रापकत्वं न धर्मिग्राहकात् न वा प्रमाणान्तरात्सिद्धम्। तथाच धर्मिग्राहकादेव प्रमाणात्सर्वसाधारणासाधारणव्यवहारसम उपह्रीयते नहि मथुरातः प्राग्दिश्यवस्थितायां काश्यां केनापि प्रमात्रा ततः प्रत्यगवस्थितत्वं व्यवह्रियते। काश्या एकः कश्चित् प्रमाता स्वापेक्षया प्रागवस्थितत्वं व्यवहरति कश्चित्तु प्रत्यगवस्थितत्वमित्यसाधारणमिति चेत्। एवं हि येव किञ्चिदवधिका प्राची सैव किञ्चिदवधिका प्रतीचीत्यवधिभेदमादायासाधारण्यमुपवर्ण्यते ईदृशञ्चासाधारण्यं कालवलयति(?)।यो हि कालो विद्यमानापेक्षयाऽतीतत्वादनुत्पन्नापेक्षया भविष्यत्वाद्यदपेक्षया वर्तमानः तदपेक्षया सर्वं वर्तमानत्वेन व्यवह्रियते इति चेत्। यदपेक्षया प्राची तदपेक्षया सा सर्वैः प्राचीत्वेन व्यवह्रियते इति साधारण्यस्य दिश्यपि सम्भवात्। इदं तु असाधारण्यं सम्भवति चलस्य यस्यापेक्षयैव काशी प्रागवस्थिता तस्यैव प्रत्यगवस्थिता भवति य एव काश्याः प्रत्यगवस्थितः स एव चेत् प्राग् गच्छति तदैतस्य सुघटत्वात्। कालस्तु य एव यदपेक्षया वर्तमानव्यवहारं तनोति स एव नातीतादिव्यवहारं तदपेक्षयेति वैलक्षण्यात्। एवं चैवंविधलक्षणव्यवहारसमर्पकतया दिक्कालयोर्वैलक्षण्यमक्षतम्। युक्त्यन्तरं तु दिक्साधकं कालग्रन्थादवसेयम्।

अत्रापि सामान्यगुणा एवेत्याह तस्या इति। एकविशेष्यविधेः शेषनिषेधफलकत्वादिति भावः। अत्र प्रमाणमाह कालवदिति। लाघवादेकत्वं तद्व्यापकत्वादेकपृथक्त्वम्। विश्ववर्तिपरत्वादिव्यवहारप्रापकतया परममहत्परिमाणं परत्वाद्यसमवायिकारणतया संयो-

गम्तच्छिनाशकत्वाद्विभाग इत्यर्थः । एकत्वे नानात्वव्यवहारं कालवत् कथयति दिगिति । पूर्वादिप्रत्ययादिलिङ्गाविशेषात् । न चैक-यैवोपपन्नामनेकां व्यवस्थापयति इत्यर्थः । 'प्राचीप्रवणे यजेते' त्यादिः श्रौतो व्यवहारः, 'आयुष्य प्राङ्मुखो भुङ्क्ते' इत्यादिः स्मार्तः, 'काशीमलर्कपुरात्पूर्वेण याहि' त्यादिलौकिकव्यवहारस्तात्स-द्ध्यर्थं सर्गादिप्रभवैर्महर्षिभि· मेरुं प्रादक्षिण्येन गच्छतो भास्वतः संयोगविशेषमनुसृत्य प्राच्यादयो दश संज्ञाः कृताः । प्राच्यादीना-मेव चेन्द्रादीन् पुरस्कृत्यैन्द्र्यादयः संज्ञा निर्वर्तिताः पूर्वादिसंज्ञाश्च प्रकृतभाष्यस्योपलक्षणत्वात् प्राग् अस्यां सविताऽञ्चतीति प्राची अवाग् अञ्चति, प्रतीपमञ्चति, उदगञ्चति, इत्यवाच्यादयः । प्राग-वाच्यादयस्तु दिग्द्वयान्तरालतया नेयाः । सूर्यापेक्षया यतः पृथिवी साऽधस्तात् पृथिव्यपेक्षया यतः सूर्यः सोर्ध्वम्, एवं च दश यौगिक्यः संज्ञा उपचारतो भवन्ति । वस्तुतस्तु एकैव दिगिति भावः । यदपे-क्षयोदयाचलसन्निहिता या दिक् सा तदपेक्षया प्राची व्यवहिता तु प्रतीची पूर्वाभिमुखस्य पुंसः दक्षिणदिग्भागावच्छिन्ना दिग् दक्षि-णा वामभागावच्छिन्नोदीची । दक्षिणत्वोदीचीनत्वे च शरीरावयव-जातिविशेषावित्यपि वदन्ति । कचिदेकादश दिशो गणिताः तत्र यथा प्राच्यवाच्योरन्तराले दिग प्रागवाची तथोर्ध्वाधोन्तरालादिकसं-ज्ञयेति दिक् ॥

(व्यो०) इदानीं दिशोऽवसरप्राप्ताया लक्षणपरीक्षार्थं दिक् पूर्वा-परादिप्रत्ययलिङ्गेत्यादि प्रकरणम् ।

दिगिति लक्ष्यनिर्देशः । पूर्वापरादिप्रत्ययलिङ्गेति लक्षणम् । तथा पूर्वश्चापरश्च पूर्वापरौ तावादिर्येषामिति तथोक्तास्ते च ते प्रत्ययाश्चेति ते लिङ्गं यस्याः सा तथेति सग्रहोक्तं विवरणार्थमाह । मूर्तमवधिं कृत्वा मूर्तेष्वेव द्रव्येषु विषयभूतेषु एतस्मान्मूर्तद्रव्यादिदं मूर्तं पूर्वेण दक्षिणेनेत्यादिदेशप्रत्यया यतो निमित्तात् भवन्ति सा दिगिति । तथाच दिगितरेभ्यो भिद्यते पूर्वापरादिप्रत्ययलिङ्गत्वा-द्यस्तु न भिद्यते न चासावेव यथा क्षित्यादिरिति । व्यवहारो वा साध्यः । ननु च पूर्वापरादिप्रत्ययाः परस्परापेक्षितया मूर्तेष्वेव भवन्तीत्यसिद्धं लक्षणाभिधानम् । नैतदेवम् । परस्परापेक्षि-तायामुभयाभावप्रसङ्गात् । तथाहि–यदि पूर्वमपेक्ष्यापरप्रत्ययोऽपरं

चापेक्ष्य पूर्वप्रत्यय इत्येकाभावे अन्यतराभावादुभयाभावप्रसङ्गः। न च निर्निमित्तः, कदाचिदुत्पन्नत्वादन्वयव्यतिरेकाभ्यां मूर्तद्रव्यस्य व्यापारोपलब्धेरङ्गुल्यादिव्यपदेशाच्चालम्बनत्वम्। न च तस्या विशिष्टस्य प्रत्ययजन्मनि व्यापारः, सर्वत्राविशेषेण पूर्वापरादिप्रत्ययाविशेषप्रसङ्गात्। अथ मूर्तद्रव्यमेवानधिभूतं निमित्तमिति चेत्। न तस्य सर्वप्रत्ययेष्वविशेषात्। तथाहि तस्य निमित्ततायां यत्रैव पूर्वप्रत्ययस्तत्रैव दक्षिणादिप्रत्ययाः प्रसज्येरन्नविशेषात्। नापि सङ्केत एव निमित्तम्। तस्य हि निमित्तं विना सर्वत्राप्रसिद्धे वृत्तेः। तथा ह्येकं निमित्तं विनैकत्र सङ्केतितः पूर्वशब्दो नार्थान्तरे प्रवर्तते अथास्ति पूर्वादिशब्दानां सङ्केतप्रवृत्तेः कारणमेकं यत्सद्भावादर्थान्तरेपि प्रवृत्तिरिति चेत्। सा तर्हि दिगिति। अथाविशिष्टतया दिशो परादिप्रत्यया वासनावशाद्भवन्तीति चेत्। तन्नाबाध्यमानत्वात्। अबाध्यमानं ज्ञानं निर्विषयं न भवत्येव। शुक्लादिविज्ञानवद्विषयस्य चाङ्गुल्यादिव्यपदिश्यमानस्यान्वयव्यतिरेकाभ्यां व्यापारोपलब्धेरित्युक्तम्। न च वासनैवात्र निमित्तम्। तस्याबोधकव्यतिरेकेणासंभवादिति पूर्वन्यायादतो विशिष्टप्रत्ययाः पूर्वापरादयो न विशिष्टनिमित्तमन्तरेण भवन्ति। न चान्यन्निमित्तं क्षित्यादिरूपं सम्भवतीत्यतो निमित्तान्तरासम्भवाद्यदत्र निमित्तं सा दिगिति विशेषणविशेष्यं न्यायः सर्वोत्पत्तौ कारणत्वं कालवद्द्रष्टव्यम्।

समवायित्वगुणवत्त्वप्रतिपादनार्थमाह—तस्यास्तु गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागा इति। तत्र चातिदेशं करोति—कालवदेते सिद्धा इति। तथा दिग्लिङ्गाविशेषात् विशेषलिङ्गाभावाच्चैकत्वं दिशः सिद्धम्। ननु पूर्वापरादिप्रत्ययाः परस्परं विलक्षणस्यैव निमित्तस्य प्रतिपादका इति नानात्वमेव युक्तम्। न। सहकारिवैलक्षण्येनापि प्रत्ययवैलक्षण्योपपत्तिरित्युक्तन्यायादतो द्रव्यत्वादेव संख्यायोगसिद्धौ नानात्वे प्रमाणाभावादेकत्वं सिद्धम्। तत्नैकत्वेनानुविधानात् साहचर्यादेकपृथक्त्वं चेति। पूर्वापरादिप्रत्ययानां कारणे दिगाख्येति वाक्येन परममहत्त्वम्। तथाच पूर्वापरादिप्रत्ययाः सर्वत्र निमित्तं विना न सम्भवन्तीति दिशो व्यापकत्वात् परममहत्त्वम्। तथा कारणपरत्वात् कारणापरत्वाच्च परत्वापरत्वे इति सूत्रेण संयोगः सिद्धः। तथाहि—कारणपरत्वं परत्वो-

त्पादको दिक्पिण्डसंयोगः । अपरत्वं च अपरत्वोत्पादको विवक्षित इति वक्ष्यामः परत्वपरीक्षायाम् । संयोगश्च कृतकत्वादवश्यं विनाशी त्याश्रयविनाशस्य सर्वत्रासम्भवाद्विभागादपि नश्यतीति विभागः सिद्ध इत्यतिदेशार्थः । तथा गुणवत्वादनाश्रितत्वाच्च द्रव्यम् समानासमानजातीयकारणासम्भवाच्च अकार्यत्वेन नित्यत्वं चेति द्रष्टव्यम् । अथैकस्या दिशः प्राच्यादिव्यवहारः कथं स्यादित्याह–दिग्लिङ्गाविशेषादञ्जसैकत्वेपीत्यादि । तत्र हि यद्यपि दिशो लिङ्गानामविशेषान्नानात्वाप्रसिद्धावञ्जसा मुख्यया वृत्त्यैकत्वं सिद्धम् । तथापि सवितुर्ये संयोगा लोकपालपरिगृहीतादिक्प्रदेशैः सहेति विभक्तिपरिणामः । यदि वा भगवतः सवितुर्ये सयोगास्ते केषामिति विवक्षायां संबन्धस्यापि विद्यमानत्वाद्युक्तैव षष्ठी । लोकपालपरिगृहीतदिक्प्रदेशानामिति । अन्वर्था अनुगतार्थाः प्राच्यादिभेदेन दशविधाः दशप्रकाराः संज्ञा कृताः परमर्षिभिरिति । किमर्थमित्याह–श्रुतिश्च स्मृतिश्च लोकश्चेति तथोक्तास्तेषां संव्यवहारार्थमिति । श्रौतो हि व्यवहारो 'वायव्यां गवयमालभेत' । स्मार्तस्तु 'प्राङ्मुखो भुञ्जीत' । लौकिको'प्यस्मद्वृद्धाः प्राङ्मुखा यजन्ते स्मे'त्यादि व्यवहारस्य प्रसिद्ध्यर्थमिति । अथ लोकपालपरिगृहीतादिक्प्रदेशैः सयोगो भगवतः कथं भवतीत्याह—मेरुं प्रदक्षिणमावर्तमानस्येति । प्रदक्षिणं हि यथा भवति तथा मेरुं परिभ्रमतोपि विशिष्टसयोगा तद्वशाच्च प्राच्यादिव्यवहारः, अन्वयव्यतिरेकाभ्यामुपलम्भाच्च । तथाहि—उदयसमये सवितुर्दिक्प्रदेशेन योगात्प्राचीति व्यवहारः । तत्र हि प्राक् प्रथममञ्चति इति कृत्वा । एव मध्यान्हसमये दिक्प्रदेशेन सयोगाद्दक्षिणेति व्यवहारः । तथा चापराण्हे तद्योगात् प्रतीचीति च । एवमुदीच्यादिष्वपि वाच्यम् । नन्वेवं तर्हि स एवादित्यसयोगोस्तु पूर्वापरादिव्यवहारविषयत्वे अन्यादित्यपरिकल्पनायामनवस्था स्यादिति निमित्तान्तरमेव न्याय्यम् । न चादित्यपरिवर्तनं सर्वत्र सम्भवतीति । तत्र पूर्वापरादिव्यवहाराभावप्रसङ्गः । तस्मादेकाप्यनेकसंयोगोपचिता विशिष्टव्यवहारसमर्थेत्यभ्युपगन्तव्या । अतो भक्त्योपचारेण दश दिशः सिद्धास्तासां चोपचरितदिशां देवतापरिग्रहवशात् पुनर्दश संज्ञा भवन्ति । महेन्द्रेण परिगृहीता माहेन्द्री वैश्वानरेण परिगृहीता वैश्वानरीत्येव न्यास्वपीति ।

इति दिक् ॥

(भा०) आत्मत्वाभिसंबन्धादात्मा । तस्य सौक्ष्म्यादप्रत्यक्षत्वे सति करणैः शब्दाद्युपलब्ध्यनुमितैः श्रोत्रादिभिः समधिगमः क्रियते । वास्यादीनामिव करणानां कर्तृप्रयोज्यत्वदर्शनात् शब्दादिषु प्रसिद्ध्या च प्रसाधकोऽनुमीयते । न शरीरेन्द्रियमनसामज्ञत्वात् । न शरीरस्य चैतन्यं घटादिवत् भूतकार्यत्वात् मृते चासंभवात् । नेन्द्रियाणां करणत्वात् उपहतेषु विषयासान्निध्ये चानुस्मृतिदर्शनात् । नापि मनसः करणान्तरानपेक्षित्वे युगपदालोचनस्मृतिप्रसङ्गात् स्वयंकरणभावाच्च । परिशेषादात्मकार्यत्वात् तेनात्मा समधिगम्यते । शरीरसमवायिनीभ्यां च हिताहितप्राप्तिपरिहारयोग्याभ्यां प्रवृत्तिनिवृत्तिभ्यां रथकर्मणा सारथिवत् प्रयत्नवान् विग्रहस्याधिष्ठाताऽनुमीयते प्राणादिभिश्चेति । कथम् ? शरीरपरिगृहीते वायौ विकृतकर्मदर्शनाद् भस्त्राध्मापयितेव निमेषोन्मेषकर्मणा नियतेन दारुयन्त्रप्रयोक्तेव देहस्य वृद्धिक्षतभग्नसंरोहणादिनिमित्तत्वात् गृहपतिरिव अभिमतविषयग्राहककरणसम्बन्धनिमित्तेन मनःकर्मणा गृहकोणेषु पेलकप्रेरक इव दारकः नयनविषयालोचनानन्तरं रसानुस्मृतिक्रमेण रसनविक्रियादर्शनादनेकगवाक्षान्तर्गतप्रेक्षकवदुभयदर्शी कश्चिदेको विज्ञायते । सुखदुःखेच्छाद्वेषप्रयत्नैश्च गुणैर्गुण्यनुमीयते । ते च न शरीरेन्द्रियगुणाः । कस्मात् ? अहङ्कारेणैकवाक्यताभावात् प्रदेशवृत्तित्वादयावद्द्रव्यभावित्वाद् बाह्येन्द्रियाप्रत्यक्षत्वाच्च तथाहंशब्देनापि पृथिव्यादिशब्दव्यतिरेकादिति ।

तस्य गुणाः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारसंख्यापरिमाणपृथक्त्वसंयोगविभागाः । आत्मलिङ्गाधिकारे बुद्ध्यादयः प्रयत्नान्ताः सिद्धाः । धर्माधर्मावात्मान्तरगुणानामकारणत्ववचनात् । संस्कारः स्मृत्युत्पत्तौ कारणवचनात् । व्यवस्थावचनात् संख्या । पृथक्त्वमप्यत एव । तथाचात्मेति वचनात् परममहत्परिमाणम् । सन्निकर्षजत्वात् सुखादीनां संयोगः । तद्विनाशकत्वाद्विभाग इति ॥

(से०) आत्मानमाह आत्मत्वेति । समवायेन ज्ञानाश्रयतावच्छेदकमात्मत्व जातिरीश्वरसाधारणी । सा चान्यात्मन्यप्रत्यक्षत्वेऽपि योगिव्यक्तेरात्मनि मनसा प्रत्यक्षीक्रियते, परमाणावप्रत्यक्षमपि पृथिवीत्वद्रव्यत्वादिक घटादाविव चक्षुषा । मानसप्रत्यक्षस्यापि तस्यानुमेयत्वमप्याह तस्य सौक्ष्म्यादिति । सौक्ष्म्यं बहिरिन्द्रियग्रहणयोग्यताविरहस्तस्मादप्रत्यक्षत्वेऽपि बहिरिन्द्रियाप्रत्यक्षत्वे सत्यपि करणैः श्रोत्रादिभिस्तस्याधिगमोऽनुमितिरित्यर्थः । ननु करणानां श्रोत्रादीनामतीन्द्रियत्वात्कथं तैरनुमानमित्यत आह शब्दाद्युपलब्ध्यनुमितैरिति । शब्दाद्युपलब्धिभिः श्रोत्राद्यनुमानं यथा—शब्दाद्युपलब्धयः करणसाध्याः पुरुषव्यापारत्वात् दात्रादिकरणकच्छिदादिक्रियावत् इति । श्रोत्रादिभिरात्मानुमितिस्तु यथा—श्रोत्रादीनि कर्तृव्यापार्याणि करणत्वाद्वासीवत् । वासी छिदाकरणमस्त्रविशेषः(१) । वास्यादौ साध्यहेत्वोः सहचारं दर्शयति वास्यादीनामिवेति । आत्मनि प्रमाणान्तरमपि दर्शयति शब्दादिषु प्रसिद्ध्या चेति । शब्दादिष्विति षष्ठ्यर्थे सप्तमी । शब्दादीनामित्यर्थः । शब्दादीनां प्रक-

(१) यन्त्रविशेष इति पाठान्तरम् ।

ष्टया सिद्ध्या ज्ञानेन प्रसाधको ज्ञाताऽनुमीयत इत्यर्थः। तदनुमानं यथा–ज्ञानं क्वचिदाश्रितं कार्यत्वाद्गन्धवदिति। आश्रितत्वं च समवायेन बोध्यम्। तेन न शरीरेण सिद्धसाधनम्। ननु शरीरे बहिरिन्द्रिये मनसि वा समवेतं ज्ञानमस्तु इत्यत आह न शरीरेन्द्रियेति। एषां नाधिगम इत्यनुषङ्गः। तत्र हेतुमाह अज्ञत्वादिति। तेषां ज्ञानानाश्रयत्वादित्यर्थः। तेषां प्रत्येकं चैतन्याभावं ग्राहयति न शरीरस्येति। चैतन्यमिति। चैतन्यं ज्ञानं तन्न शरीरस्य। तत्र हेतुमाह घटादिवदिति। भूतत्वात्कार्यत्वाच्चेति हेतुद्वयम्। घटादिवदिति दृष्टान्तः।

नन्वप्रयोजकमिदं भूतस्य कार्यस्य वा चैतन्याश्रयत्वे को विरोध इत्यत आह मृते चेति। यदि शरीराश्रितं चैतन्यं स्यात्तदा मृते शरीरेऽपि स्यात् तत्र तदसम्भवात् तददर्शनादशरीराश्रितं(१) चैतन्यमित्यर्थः। बहिरिन्द्रियाणां चैतन्याभावं ग्राहयति नेन्द्रियाणामिति। न बहिरिन्द्रियाणामित्यर्थः। हेतुमाह करणत्वादिति। जलानयनकरणघटादिरत्र दृष्टान्तः। अत्राप्यप्रयोजकत्वमाशंक्यान्यदाह उपहतेष्विति। अनुस्मृतिर्हि ज्ञानविशेषः। सा यदि श्रोत्रादीन्द्रियसमवेता स्यात्तदा बाधिर्यादिहेतुरोगविशेषादिना उपहतेष्विन्द्रियेषु सत्सु स्मृतिर्न स्यादाश्रयस्योपहतत्वात्, तेषूपहतेष्वपि दृश्यमाना तत्स्मृतिराश्रयान्तरमधिगमयतीत्यर्थः। स्मृतेरिन्द्रियाद्यनाश्रयत्वे हेत्वन्तरमप्याह विषयासांनिध्यादिति। इन्द्रियेण स्वेन जन्यैव स्मृतिरिन्द्रियसमवेता वान्य ऽन्यथातिप्रसङ्गात्, तथाचेन्द्रियस्य प्रतिरोधकाद्विषयविनाशात् विषयस्येन्द्रियासान्निध्यादिन्द्रियेण तदजननेऽपि दृश्यमाणा स्मृतिः आश्रयान्तरमधिगमयतीत्यर्थः। न च स्वजन्या- १

(१) तदसम्भवान्न शरीराश्रितमिति पाठान्तरम्।

नुभवजन्यसंस्कारसत्त्वात्तत्स्मृतिरिति वाच्यम् । संस्कारस्येन्द्रियावृत्तित्वात्, अन्यथा इन्द्रियस्योपघाते नाशे वा स्मृतिर्न स्यात् । नन्वेवं भूतत्वेन कार्यत्वेन वा चैतन्यस्य शरीरवृत्तित्वे उपघाते विषयासान्निध्ये च स्मृतिदर्शनात् बहिरिन्द्रियावृत्तित्वे चाभूतेऽजन्येऽनुपहते केनाप्यप्रतिबद्धे विषयसन्निकर्षे च मनोरूपेन्द्रिये चैतन्यमास्ताम् इत्यत आह मनस इति ।

अयमभिप्रायः । ज्ञानाश्रयत्वेनानुमीयमानं मनो कर्त्रैव स्यात् न ज्ञानकरणं, तथाच चक्षुरादीन्द्रियाणां युगपत्तत्तद्विषयसन्निकर्षे मनसस्तत्तदिन्द्रियसन्निकर्षापेक्षां विना युगपदनेकस्यालोचनस्य ज्ञानस्य प्रसङ्गात् करणस्यैव कर्तुरेव व्यापारमात्रजननियमाभावात् । अथ यदिन्द्रियसंयुक्तं मनस्तदीयविषयविषयकमेव ज्ञानं मनसा स्वस्मिन् जन्यते इत्युच्यते इति चेत्, तथापि ज्ञानाश्रयतयैव सिद्धं मनो न करणतयेत्यतस्तदेवात्मेति पर्यवसितम्, मन इति तस्य संज्ञामात्रभेदः स्यात् । तथा चात्मा तावतैव सिद्ध एव स्यात्, परन्तु युगपदनेकव्यापारापत्तिवारणार्थमेकमात्रव्यापारजननहेतुकरणमनुमातुमवशिष्यते । तच्च मनोग्रन्थे वक्ष्यत इति भावः । ननु करणतयैव मनोऽनुमाय तत्रैव ज्ञानाश्रयताऽनुमास्यत इत्यत आह स्वयं करणभावाच्चेति । स्वस्मिन्नित्यर्थे स्वयमिति । करणतयाऽनुमाने स्वस्मिन्मनसि ज्ञानकरणभावात् ज्ञानकरणत्वात् न ज्ञानाश्रयत्वमित्यर्थः । ज्ञानाश्रयासिद्धौ निराश्रयस्य ज्ञानस्यैवासिद्धौ तत्करणानुमानं न सम्भवति । ज्ञानाश्रयानुमाने च ज्ञानकरणभिन्न एवासौ सिद्ध इति मनसः करणतामात्रं, ततो न ज्ञानाश्रयत्वमित्यर्थः । आत्मकार्यत्वादिति । चैतन्यस्येति शेषः ।

ननु शब्दादीनां ज्ञानेनैव तदाश्रय आत्मानुमीयत इत्युक्तं

आत्मपदार्थसाधने च न स्वात्म(पदार्थ)मात्रसाधनमुद्देश्यम्, किन्तु सकलात्मसाधनमेव; तथाच परज्ञानस्याप्रत्यक्षत्वेनानुमात्राऽज्ञातत्वात्कथं तज्ज्ञानेन तदनुमानमित्यतः सकलात्मसाधकप्रत्यक्षहेतुना तत्साधयति शरीरसमवायिनीभ्यामिति । प्रयत्नवान् विग्रहस्य शरीरस्याधिष्ठाता संयोगी, स्वपरसाधारण आत्माऽनुमीयत इत्यर्थः । केन हेतुनाऽनुमीयत इत्यत्राह (स्वपरसाधारण) प्रवृत्तिनिवृत्तिभ्यामिति । प्रवृत्तिनिवृत्ती प्रयत्नविशेषौ, तत्पदद्वयस्य तज्जन्यक्रियापरत्वेन प्रवृत्तिनिवृत्तिजन्यक्रियाभ्यामित्यर्थः । क्रियामात्रस्य वाय्वादौ व्यभिचारात्प्रवृत्तिनिवृत्तिजन्यक्रिये एव प्रत्येकं हेतू । तयोः क्रिययोः प्रवृत्तिनिवृत्तिजन्यतां ग्राहयति हिताहितेति । तयोः प्राप्तिपरिहारौ यथासंख्यं बोध्यौ । तद्योग्याभ्यामित्यर्थः । वाय्वादिक्रिया तु न वाय्वादेर्हिताहितप्राप्तिपरिहारयोग्या । शरीरं प्रयत्नवत्संयुक्तं हिताहितप्राप्तिपरिहारयोग्यक्रियावत्त्वात् इत्यनुमाने हेतोः पक्षवृत्तित्वं साधयति शरीरेति । शरीरं समवायि ययोस्तादृशीभ्यामित्यर्थः । तत्र दृष्टान्तमाह रथकर्मणेति । प्रयत्नवतः सारथेः रथाधिष्ठानं यथा रथकर्मणाऽनुमीयत इत्यर्थः । हेत्वन्तरमाह प्राणादिभिश्चेति । आदिना शरीराभ्यन्तरचारिअपानादिसमस्तवायुपरिग्रहः । ननु प्राणादेः प्रयत्नवदनधिष्ठितशरीरेऽपि सम्भवोऽस्तु कथं तेषु व्याप्तिरिति पृच्छति कथमित्यनेन । उत्तरयति शरीरपरिगृहीत इति । वायोर्हि स्वाभाविकी तिर्यग्गतिस्तस्योर्ध्वाधोगतिरूपं कर्म तु विकृतं कर्म, तद्दर्शनाच्छरीरेऽधिष्ठाता प्रयत्नवाननुमीयते इत्यर्थः । अत्र दृष्टान्तः भस्त्रेति । भस्त्रा कर्मकारस्य वायुप्रेरकचर्मपुटिका तदाध्मापयिता तदीयवायुक्रियाजनकः कर्मकार इत्यर्थः । प्रयोगस्त्वेवम्—जीवच्छरीरं प्रयत्नवदाधिष्ठितं संमूर्छनरहितविकृत-

क्रियवाय्वाश्रयत्वात् भस्त्रावदिति । हेत्वन्तरमाह निमेषोन्मेषेति । नियतेन वाय्वाद्यभिघातजन्यभिन्नतया नियतेन स्वाभाविकेन निमेषोन्मेषरूपचक्षुःपक्ष्मकर्मणा विग्रहस्याधिष्ठाता प्रयत्नवाननुमीयत इत्यर्थः । दारुयन्त्रनिमेषोन्मेषकर्मणा दारुयन्त्रप्रयोक्ता शिल्पीव । प्रयोगस्त्वेवं- जीवच्छरीरं प्रयत्नवदधिष्ठितं वाय्वाद्यभिघातजन्यभिन्ननिमेषोन्मेषवत्त्वात् तादृशनिमेषोन्मेषविशिष्टदारुयन्त्रवदिति । हेत्वन्तरमाह देहस्येति । देहस्य वृद्धिः पुष्टिः, क्षतभग्नयोः संरोहणम् पूर्वावस्थावत्करणम्, आदिना चेष्टापरिग्रहः । तन्निमित्तत्वादित्यर्थः । प्रयत्नवान् देहस्याधिष्ठातानुमीयत इत्यनुषङ्गः । अत्र दृष्टान्तो गृहपतिरिवेति । आदिपदग्राह्येण हेतुनाऽनुमाने तु न गृहपतिर्दृष्टान्तः, गृहस्य चेष्टाभावात्, प्रयत्नाधानशरीरक्रियाया एव चेष्टात्वात् । प्रयोगस्त्वेवं–जीवच्छरीरं प्रयत्नवदधिष्ठितं वृद्ध्यादिमत्त्वात् वृद्ध्यादिमद्गृहादिवदिति । हेत्वन्तरमाह अभिमतेति । बहुषु वस्तुषु पुरःस्थितेष्वपि यत्र वस्तुनि दिदृक्षा सोऽभिमतो विषयस्तद्ग्राहकं करणं चक्षुस्तत्सम्बन्धनिमित्तेन मनःकर्मणा विग्रहस्याधिष्ठाता प्रयत्नवाननुमीयत इत्यर्थः । विषयेन्द्रियसंयोगहेतोर्मनःकर्मणः प्रयत्नवन्तं विनाऽन्याप्रयोज्यत्वादन्यथा सुषुप्तस्यापि मनसा तादृशसंयोगजननापत्तेः, गृहकोण इत्यादिरत्र दृष्टान्तः । पेलकं खेलाविशेषं शिशूनां जतुगुटिका । गृहकोणेषु व्यवस्थितं गुटिकान्तरे वस्त्वन्तरे वा पेलकप्रेरको दारकः शिशुरिवेत्यर्थः । अभिमतविषयगुटिकासंयोगहेतुगुटिकाकर्मणापि तत्प्रेरकः शिशुरनुमीयते । प्रयोगस्त्वेवम्- मनः प्रयत्नवदधिष्ठितम् अभिमतविषयसंयोगहेतुगतिमत्त्वात् यथोक्तदारकप्रेरितपेलकवदिति । अभिमतसंयोगस्तु चक्षुषस्तद्धेतुक्रियमनसः, पेलके त्वभिमतः संयोगः स्वस्यैवेति विशेषो बोध्यः । रसनेन्द्रियवि-

कारेणापि तदनुमानमाह नयनविशेषेति । नयनविषयस्तिन्तिडयाद्यम्लद्रव्यं तस्यालोचनं चक्षुषा ग्रहणं तदनन्तरं रसानुस्मृतिः तदीयाम्लरसस्मरणम् । तत्क्रमेणेति । तत्क्रमेण रसनेन्द्रियस्य विक्रियाया रसनायामुदकाविर्भावरूपस्य(१)विकारस्य दर्शनादुभयदर्शी अम्लद्रव्यतद्रसद्वयदर्शी तदुभयज्ञाता आत्मा यथाऽनुमीयत इति परत्रान्वयः । क्रमेणेत्यत्र क्रमश्च अम्लरसस्मरणानन्तरं तद्ग्राहकस्यातीन्द्रियस्यानुमानम् , ततस्तदिन्द्रियस्य विकारदर्शनादित्यर्थः । रसनेन्द्रियविकारस्याम्लद्रव्यरसतदुभयज्ञानं विनाऽनुपपत्तेः, तदुभयज्ञानस्य तदुभयज्ञातारं तच्छरीराधिष्ठातारं विनाऽनुपपत्तेरिति क्रमेण तच्छरीराधिष्ठाता तदुभयदर्शी अनुमीयत इत्यर्थः । अत्रोभयदर्शित्वमात्रे दृष्टान्तमाह अनेकगवाक्षेति । गवाक्षो गृहाच्छादनजालमार्गः अनेकगवाक्षैः प्रेक्षकपुरुषवदित्यर्थः, तस्याप्युभयदर्शित्वात् । सुखादिगुणैरपि तदनुमानमाह सुखदुःखेत्यादि । सुखादिकं द्रव्यसमवेतं गुणत्वादित्यनुमानेन गुणैर्गुण्यनुमीयत इत्यर्थः । नन्वत्र शरीरसमवेतत्वेनार्थान्तरं स्यादित्यत आह ते च गुणा इति । कस्मादिति । शरीरेन्द्रियगुणत्वाभावः कस्मादिति पृच्छति । अहङ्कारेणेति तदुत्तरम् । अहमिति बुद्धिविशेषेणेत्यर्थः । तदेकवाक्यताभावादित्यर्थः । अत्राभावपदं विरोधपरम् । एकवाक्यतापदं च समानाधिकरण्यानुभवपरम् , तथा च अहंकारेण सह सामानाधिकरण्यानुभवविरोधादित्यर्थः। तथाहि योऽहं जन्मान्तरे कृतपुण्यकर्मा सोऽहमिदानीं सुखी योऽहं कृतपापकर्मा सोऽहमिदानीं दुःखी योऽहं पुण्यकर्म करोमि सोऽहं जन्मान्तरे सुखमिच्छामि दुःखं च द्वेष्मि योऽहं जन्मान्तरे सुखमिच्छामि सोऽहं धर्मार्थं यज इत्येवमहन्त्वेन येषां सुखादीनां सामानाधि-

(१) रसनायाः सृणिकाविर्भावणरूपस्येति पाठान्तरम् ।

करणयमनुभूयते तेषां सुखादीनां शरीरवृत्तित्वविरोधादित्यर्थः । न ह्यहन्त्वसामानाधिकरण्येनानुभूयमानयोर्जन्मद्वयीयपुण्यसुखाद्योः शरीरवृत्तित्वं, सम्भवति जन्मद्वये शरीरभेदात् जन्मद्वयवर्तिअभिन्नपदार्थेनैवोपपत्तेः, स एव सुखाद्याश्रयः । ननु योऽहं गौर आसं सोऽहमिदानीं दुःखात् कृष्णः योऽहं कृश आसं सोऽहमिदानीं स्थूल इत्यत्राहंपदार्थसमानाधिकरणगौरत्वकृशत्वादीनां बुद्धिः शरीरभेदमेवावगाहत इति नात्माभेदं गौरत्वादेरात्मन्यभावात् इति चेन्न । तत्र शरीरेऽहंपदार्थबुद्धेर्भ्रमत्वात् पूर्वदर्शितप्रतीत्या बाधितत्वेन प्रमात्वात् अवस्थाभेदेन शरीरभेदात् शरीराभेदबुद्धेरपि तत्र भ्रमत्वात् । न चैवं चैत्रगृहे जातस्य शिशोरवस्थाभेदेन शरीरभेदे चैत्रपुत्रत्वव्याघात इति वाच्यम् । चैत्रपुत्रशरीरारम्भकारब्धशरीरान्तरस्यापि चैत्रपुत्रत्वस्वीकारात् । एवमिन्द्रियगुणत्वाभावोपि बोध्यः । इन्द्रियाणामपि जन्मद्वये भेदात् । सुखादीनां शरीरेन्द्रियगुणत्वाभावे हेत्वन्तरमप्याह प्रदेशेति । एकदेशमात्रवृत्तिगुणत्वादित्यर्थः । इदं च शरीरेन्द्रियसंयोगविभागयोर्व्यभिचारि अतो न शरीरेन्द्रियगुणा इत्यत्र न स्पर्शवद्विशेषगुणा इत्यर्थः । तेनोक्तसंयोगे श्रोत्रेन्द्रियनिष्ठशब्दे च न व्यभिचारः । हेत्वन्तरमाहायावद्द्रव्येति । सुखादयो न शरीरस्येन्द्रियस्य वा गुणा अयावद्द्रव्यभावित्वात् आश्रयद्रव्ये सत्यपि तत्र स्वसमानजातीययावतामभावादित्यर्थः । सुखादीनामाश्रयो हि कदाचित् सुखादिजातीययावतामभाववान्, शरीरमिन्द्रियं वा न कदाचिदपि स्वगुणरूपादिजातीयानां यावतामभाववदित्यर्थः । अत्र चोत्पत्तिक्षणं विनेति बोध्यम्, तत्क्षणे शरीरेन्द्रिययोरप्यगुणत्वात् । हेत्वन्तरमाह बाह्येन्द्रियेति । बाह्येन्द्रियप्रत्यक्षवृत्तिगुणत्वव्याप्यजातिराहित्यादित्यर्थः । तेनेन्द्रियगुणस्य

बाह्येन्द्रियाप्रत्यक्षत्वेपि न तत्र व्यभिचारः । यथोक्तजातिराहि-त्याभावात् । सुखादिकं तु तद्रहितमेवात्मसाधकम् । प्रत्यक्षमाह अहंशब्देनेति । अत्र विषयीकृतत्वादिति पूरणीयम् । अहंशब्द-पदं च अहमित्येवं प्रत्यक्षपरम् । तथा चाहमितिप्रत्यक्षविषय-त्वादित्यर्थः । ईदृशप्रत्यक्षस्य च न शरीरं विषयः, अहं शरीरीति भेदेन प्रतीतेरिति भावः । नन्वहमिति प्रत्ययः पृथिव्यादिक-मेव विषयीकरोत्वित्यत्राह पृथिव्यादिशब्देति । अहं पृथिवीत्येवं शब्दप्रयोगाभावादित्यर्थः ।

आत्मनो गुणानाह तस्य गुणा इति । एषु गुणेषु सूत्र-कारसम्मतिमप्याह आत्मलिङ्गेति । आत्मनो लिङ्गानि साधकानि तेषामधिकारे कथने बुध्यादयः सिद्धा इत्य-र्थः । बुध्यादीनां तद्गुणत्वाभावे तल्लिङ्गवचनानुपपत्तेरिति भावः । धर्माधर्मसिद्धौ तत्सम्मतिमाह धर्माधर्माविति । विहितनिषिद्धकर्मभ्यां धर्माधर्मौ जन्येते कालान्तरभाविनोः सुखदुःखयोर्विहितनिषिद्धकर्मभ्यां साक्षाज्जनयितुमसामर्थ्येन त-द्व्यापारौ स्थिरौ धर्माधर्मौ कल्प्येते । तत्र व्यधिकरणावपि धर्माध-र्मौ भिन्नात्मनि सुखदुःखे जनयेतामित्यत्र सूत्रकारेणोक्तम् आत्मा-न्तरगुणानामात्मान्तरगुणेष्वकारणत्वादिति । व्यधिकरणधर्माध-र्मात्मकगुणानां व्यधिकरणसुखदुःखात्मकगुणाजनकत्वादिति तदर्थः । ततो धर्माधर्मौ सिद्धावित्यर्थः । धर्माधर्माभावे ईदृशा-काङ्क्षासमाधानयोरसम्भवादिति भावः । संस्कारसिद्धौ सूत्रकार-संमतिमाह संस्कारः स्मृत्युत्पत्ताविति । 'आत्ममनसोः संयोगात् संस्काराच्च स्मृति'रिति सूत्रम् स्मृत्युत्पत्तौ संस्कारस्य हेतुत्व-कथनात् संस्कारस्तद्वचनात्सिद्ध इत्यर्थः । संख्यायां सूत्रकार-संमतिमाह व्यवस्थावचनात्संख्येति । 'नानात्मानो व्यवस्थात'

इति सूत्रम् । अहमयमित्यादि व्यवस्थावशादात्मानो नानेति तदर्थः । नानात्वं च बहुत्वसंख्या इत्यतस्तद्वचनात् संख्या सिद्धेत्यर्थः । तद्वचनादेव पृथक्त्वसिद्धिरित्याह अत एवेति । अत एव–बहुत्वसंख्यायाः पृथक्त्वाभावेऽसम्भवादित्यर्थः । आत्मनि परममहत्त्वपरिमाणे सूत्रकारसंमतिमाह तथा चात्मेति । विभवान्महानाकाशस्तथा चात्मेति च सूत्रम् । तथाचेति । आकाशतुल्य एवेत्यर्थः । आकाशतुल्यत्वेनात्मकथनात् परममहत्त्वमित्यर्थः । नन्वात्मनो विभुत्वं कुत इति चेन्न । अविभुत्वे शरीरावच्छिन्नत्वं वाच्यम्, अवच्छिन्नद्रव्यत्वे च मूर्तत्वं वाच्यं, तच्च मूर्तत्वं यदि नित्यं तदा परमाणुत्वनियमात् । अथास्त्वसौ परमाणुरिति चेत् । न । प्रत्यक्षज्ञानादिगुणाश्रयत्वबाधात् । अथास्त्वसावयवीति चेन्न । अवयविनोऽनित्यत्वनियमेन उत्पत्तिविनाशप्रसङ्गात् , तथाच तस्मिन्नष्टे शुभाशुभकर्मफलभोक्ता कश्चिन्न स्यादित्यर्थः । तत्र संयोगविभागौ साधयति संनिकर्षजत्वात्सुखादीनामिति । संनिकर्षः–संयोगः, सुखादीनां तज्जन्यत्वादित्यर्थः । स च संयोगः शरीरात्मनोः, तदनपेक्षत्वे शरीरानवच्छिन्नात्मभागेपि सुखाद्युत्पत्तिप्रसङ्गात् । एवमात्मनः संयोगश्च, तदनपेक्षत्वे सर्वदा सुखाद्युत्पत्तिप्रसङ्गात् । तद्विनाशकत्वादिति । तादृशसंयोगस्य तावन्न सार्वदिकत्वं तथात्वे नित्यतापत्तेः सदैव सुखाद्युत्पत्तिप्रसङ्गाच्च । ततस्तस्य विनाशो वाच्यस्तस्य च विभागेनैव नाश इत्यतस्तद्विनाशकत्वाद्विभागसिद्धिरित्यर्थः ॥

इत्यात्मा ।

(से०) अथावसरप्राप्तमात्मानं निरूपयति आत्मत्वेति। ननु आत्मत्वजातौ किं प्रमाणम्? न तावदनुगताकारा बुद्धिः परात्मनः परस्याप्रत्यक्षतया घटो घट इतिवदात्माऽऽत्मेति प्रत्यक्षाभावात्। नापि सुखसमवायिकारणतावच्छेदकतयाऽऽत्मत्वसिद्धिः ईश्वरे सुखसमवायिकारणतापत्तेः। न चेष्टापत्तिर्भवति तु न तत्रानन्दो धर्माभावादिति वाच्यम्। नित्यस्य स्वरूपयोग्यस्य फलोपधाननियमात्। न च देवदत्तस्यात्मा यज्ञदत्तस्यात्मेत्याद्यनुगमबलात् आत्मत्वावगम इति वाच्यम्। अस्यात्मशब्दस्य स्वरूपवचनत्वेन घटादिसाधारण्यात्। न चात्मशब्दप्रवृत्तिनिमित्ततया तदवगमः, प्रवृत्तिनिमित्तस्य जातौ पक्षपाताभावात् तस्मान्नात्मत्वं जातिरिति चेत्।आत्मशब्दस्य द्रव्यत्वादि प्रवृत्तिनिमित्त पृथिव्यादिसाधारण्यात्, न सुखवत्त्वं भगवत्यभावात्,न ज्ञानवत्त्वमिच्छाप्रयत्नाभ्यां विनिगमनाविरहात्। विनिगमनाविरहेण सर्वेषां प्रत्येकं प्रवृत्तिनिमित्तत्वे नानार्थत्वापत्तेः।मिलितस्य तथात्वे गौरव ग्रासादिति, विनिगमनाविरहस्य सर्वेषामप्रवृत्तिनिमित्तत्वपर्यवसानात् प्रवृत्तिनिमित्ततयाऽऽत्मत्वजातिसिद्धिरिति सङ्क्षेपः।

ननु जातौ साधकमिव बाधकमप्यस्ति अनेकवृत्तित्वाभावात्, न च परात्मवृत्तितया न तदभावः, परात्मनाः परस्याप्रत्यक्षत्वात् प्रमाणान्तरस्य चाभावात् अत आह तस्येति। ननु कथमात्मनः सौक्ष्म्यं विभुत्वादिति चेत्। न। सौक्ष्म्यपदेन इन्द्रियग्रहणयोग्यताविरहस्य विवक्षितत्वात् तस्य चात्र सुलभत्वात्। मनसः स्वाकर्षकादृष्टवत् एकद्रव्यस्य ग्राहकत्वात् त्वक्चक्षुषो रूपवत्येव द्रव्ये प्रवृत्तेः इन्द्रियान्तरस्य द्रव्याग्राहकत्वात्। तथा चाप्रत्यक्षस्यात्मनः पक्षीभूय श्रोत्रादिभिः करणैरनुमानं क्रियते। करणान्यपि यद्यपि न प्रत्यक्षाणि, तथापि शब्दाद्युपलब्धिभिः क्रियाभिः पक्षीभूयैवानुमीयते पक्षज्ञानमात्रस्य कारणत्वादिति। प्रयोगस्तु-श्रोत्रादीनि कर्तृप्रेयाणि करणत्वात् वास्यावत्। शब्दाद्युपलब्धयः सकर्तृकाः क्रियात्वाच्छिदिक्रियावत् इति च। प्रथमप्रयोगे व्याप्तिं दर्शयति वास्यादीनामिति। ननु सहचरदर्शनमात्रेण व्याप्तौ कुठारादीनां करणानां पाण्यादिकरणप्रयोज्यत्वदर्शनात् करणमात्रे तथा स्यादिति चेत्। अनवस्थालक्षणप्रतिकूलतर्कपराघातेन यत्र यत्र

करणत्वं तत्र तत्र करणप्रयोज्यत्वमिति व्याप्तेरभावात् । यत्र करण-त्वं तत्र कर्तृप्रयोज्यत्वमिति व्याप्तौ तु न कोऽपि प्रतिकूलस्तर्कः । किञ्च चक्षुरादीनामेकानधिष्ठितत्वे योऽहं चक्षुषा स्वर्धुनीस्रोतः पश्यामि सोऽहं श्रवसः श्रुनीः शृणोमि इति प्रतिसन्धानं न स्यात् प्रतिसन्धातुरभावादिति । ज्ञानं क्वचिदाश्रितम् गुणत्वाद्रूपादिवदिति प्रकारेणाप्यात्मसिद्धिरित्याह शब्दादिष्विति । शब्दादिषु प्रसिद्धा शब्दादिज्ञानेन प्रसाधको ज्ञानाश्रयः पक्षीभूयानुमीयते इत्यर्थः । अनुमानप्रकारस्तु दर्शित एव ।

ननु ज्ञानं शरीरादिष्वेव स्थास्यतीत्यत आह न शरीरेति । चैतन्यमिति शेषः । शरीरादयो न चैतन्याश्रयतया व्यवहर्तव्या अज्ञत्वादित्यर्थः । एतदेव विवृणोति न शरीरस्येति । शरीरं न चैतन्याश्रयो भूतकार्यत्वात् । घटवत् । कार्यपदोपादानं तु अनुकूलतर्कसूचनाय । सचेत्थं शरीरस्य चैतन्यत्वे जातस्य स्तन्यपानादौ प्रवृत्तिर्न स्यात् इष्टसाधनताज्ञानविरहात् । पूर्वजन्मानुभूतव्याप्तिस्मृत्या हीष्टसाधनतामनुमाय बालस्तत्र प्रवर्तते । न च पूर्वापरजन्मनोश्चेतनस्य भेद एतदुपपद्यते देवदत्तानुभूतस्य यज्ञदत्तेनास्मरणात् । अभेदस्तु चेतनस्य शरीरभिन्नत्वे एव घटते पूर्वापरजन्मनोः शरीरभेदादिति । शरीरं पक्षीकृत्यानुमाय चैतन्यपक्षकमनुमाह मृत इति । चैतन्यं न शरीरविशेषगुणो यावद्द्रव्याभावित्वात् शब्दवत् इत्यर्थः । शरीररूपवदिति व्यतिरेकी वा । न इन्द्रियाणामिति । इन्द्रियाणि न चैतन्याधिकरणानि करणत्वात् कुठारवदित्यर्थः ।

अत्रानुकूलतर्कमाह उपहतेष्विति । स्मृतिस्तावदनुभवकार्याऽननुभूते स्मृतेरदर्शनात् । चक्षुषश्चानुभवाश्रयत्वे तस्मिन्नष्टे रूपादिस्मरणं न स्यात् अनुभवितुरभावात् । ननु अनुभवेन यथा मीमांसकानां मते ज्ञातता विषयः आधीयते तथा मतान्तरे संस्कारस्तत्रैवाधीयते, तथाच विषया एव स्मर्तार इत्यत उक्तं विषयासान्निध्ये चेति । असांनिध्यं—नाशः । एवं च विषया अपि न स्मर्तारः स्मृतिदशायामसत्त्वादित्यर्थः । किञ्च अन्यनिष्ठेनानुभवेनान्यत्र स्मरणाधायकसंस्काराधाने देवदत्तानुभूतस्य यज्ञदत्तेन स्मरणप्रसङ्गः, तथा चानुभवसंस्कारस्मरणानामेकाश्रयतया नित्येन्द्रियव्यतिरिक्तश्चेतन इत्यर्थः । अनुस्मृतिपदं चानुभवात्पश्चाद्भावितया

स्मृतिपरमेव। यद्वा विषयोपघातादेरनु पश्चात्स्मृतिदर्शनादित्यर्थः। यद्वा इन्द्रियाणां न स्मरणं तेषां विषयसान्निध्य एव ज्ञानजनकत्वदर्शनात् स्मृतेश्च तदसान्निध्येऽपि जायमानत्वादित्यर्थः। आचार्यैस्तु विषयाणां न चैतन्यं जीवनाविरहात् इत्याद्यध्याहृत्य तत्रानुकूलतर्कतया विषयनाशे स्मृतिदर्शनादिति योजितम्। तदेकदेशिमतसन्दर्भाशुद्धेर्न युक्तम् शरीरन्द्रियमनसामित्येवोपक्रमात्, विवरणे तेषामेवैचित्यादध्याहारं विनैव मदुक्तनयो न ग्राम्यः शुद्धश्च। स्मृतिजनकतया कल्पमानः संस्कारलक्षणोऽनुभवव्यापारस्तु स्मृतिसमानाधिकरणे एव कल्पते संस्कारस्मरणवतोः स्मरणे जनयितव्ये परस्परसहकारिणोः साक्षात्प्रत्यासत्तौ लाघवात्। तस्मादनुभवसंस्कारस्मरणानां सामानाधिकरण्यानुसारेण न शरीरेन्द्रिययोश्चैतन्यमिति सिद्धम्। किञ्च चक्षुरादीनां चैतन्ये रूपादिविषयं प्रति नियमेन प्रतिशरीरं बह्वात्मानः स्युः तथा चैकमत्यं न स्यात्।

ननु मनसि नैते दोषास्तस्य नित्यतया पूर्वापरजन्मनोरेकतया प्रवृत्त्याद्युपपत्तेः, सर्वविषयतया च विषयप्रतिनियमाभावात्, तत्र भूतत्वमिवात्र मूर्तत्वं बाधकं भविष्यति इति चेत्, ना, अप्रयोजकत्वात् इत्यत आह नापीति। मनसा हि ज्ञानाश्रयत्वे कर्तृना स्यात्, तथा च तत्कारणसापेक्षं ज्ञानं जनयति तन्निरपेक्षं वा? नान्त्यः, क्रियायाः करणनिष्पाद्यत्वनियमात्। चक्षुरादीनि करणानि सन्तीति आद्य एव पक्ष इति चेत्, तेषामनेकतयैकं करणमेकदा एकामेव क्रियां जनयति इति नियमानुपप्लवेन चक्षुरादिषु युगपद्विषयसन्निहितेषु युगपन्निर्विकल्पकादिप्रसङ्गस्मृतेः। अपि च पूर्वानुभवानामेव करणत्वे तेषामनेकतया स एव दोषः, तस्माद्यासङ्गावर्जितैकज्ञानजनिमनुरुद्ध्य किञ्चिदेकं करणान्तरं कल्पनीयम्। एवं च ज्ञानाश्रयः कर्ता तदुपकरणं च करणं मनः, तच्च न ज्ञानाश्रयः करणत्वेनैव सिद्धेरित्याह स्वयमिति। मनो न ज्ञानाश्रयः करणत्वात् कुठारादिवदित्यर्थः। येन प्रमाणेन मनः सिद्ध्यति तेन प्रमाणेन करणत्वेनैव सिद्ध्यति, तथा च क्रियाश्रयत्वलक्षणं कर्तृत्वं न धर्मिग्राहकमानबाधितमिति भावः। गौरोऽहं जानामीति शरीरधर्मसामानाधिकरण्यानुभवाच्छरीरधर्मत्वं ज्ञाने प्रसक्तमिन्द्रियमनोधर्मत्वमपि ज्ञानजनकतया सिद्धानां तेषां ज्ञानाश्रयत्वस्यापि सम्भवा-

दाकाशादिषु तु प्रसक्तिरेव नास्तीत्यभिप्रेत्याह अत इति । आत्मकार्यत्वात् पृथिव्याद्यसमवेतत्वे सति भावकार्यत्वात्तैश्चैतन्यैः(१) ज्ञानं पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितं पृथिव्याद्यसमवेतत्वे सति भावकार्यत्वात् गन्धवदिति व्यतिरेकीति भावः। ननु ज्ञानेन कथं परात्मसिद्धिस्तस्यापि अतीन्द्रियत्वात् अत आह शरीरेति । ननु शरीरसमवायिनीभ्यामिति व्यर्थं प्रवृत्तिनिवृत्तिभ्यामित्यत्र चैकस्य वैयर्थ्यमेकेनैवोपपत्तेः, हिताहितप्राप्तिपरिहारयोग्याभ्यामिति च तथा । न च नोदनाजन्यायां शरीरक्रियायां व्यभिचारवारणाय तत् प्रयत्नवत् संयोगजन्यत्वाभावादिति वाच्यम् । परप्रेरितशरीरस्यापि कदाचिद्गङ्गाजलादिसंयोगयोः सम्भवेन तस्या अपि हिताहितप्राप्तिपरिहारार्थत्वात् । न च प्रत्येकं हेतुता तथा च नैकवैयर्थ्यम्, योग्याभ्यामित्यनेन च चेष्टाया हेतुत्वमादर्शितं तत्र तस्या एव प्रायेण हिताहितप्राप्तिपरिहारार्थत्वात्, शरीरसमवायिनीभ्यामिति स्वरूपकथनं तादृशक्रियायाः शरीरतदवयवैरेव समवायादिति वाच्यम् । चेष्टाया हेतुत्वे प्रत्येकं हेतुताव्याघातात् अन्यप्रसङ्गेऽन्यस्वरूपकथनस्यानुपयोगात्, रथे चेष्टाया अभावेन दृष्टान्तत्वानुपपत्तेश्चेति चेन्न । शरीरं प्रयत्नवत्संयुक्तं चेष्टावत्त्वात्, यन्नैवं तन्नैवमिति व्यतिरेकिणि तात्पर्यात् । शरीरसमवायिनीभ्यामिति च पक्षधर्मतोपदर्शनात् रथकर्मणा सारथिवदिति त्वनुमाने दृष्टान्तः, यथा रथस्य कर्मविशेषे कदाचिददृश्यमानसारथ्यनुमानं तथा प्रकृतानुमानमित्यर्थात्।एवं च यज्ञदत्तादिचेष्टा प्रयत्नवदात्मसंयोगजन्या चेष्टात्वात् मच्छरीरचेष्टावदित्यनुमानं सम्भवति । चेष्टात्वं चेष्टतेत्यनुगतदृष्टिसाक्षिको जातिविशेष एव. प्रयत्नवदात्मसंयोगसमवायिकारणकत्वेसाध्याविशेषात् । प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्च आत्मनो लिङ्गानीति सूत्रार्थमाह प्राणादिभिश्चेति । प्राणस्य लिङ्गताप्रकारं पृच्छति कथमिति । उत्तरं शरीरेति । शरीरं भोक्तृप्रयत्नवदधिष्ठितं मूर्छनाजन्यतिर्यक्जायमानातिरिक्तकर्मवत्पवनत्वात् भस्त्रावत् । शारीरो वायुः भोक्तृप्रयत्नवदधिष्ठितः संमूर्छनाजन्यतिर्यग्गत्यातिरिक्तकर्मवत्पवनत्वात् भस्त्राव-

(१) एतद्व्याख्यानुसारेण तैरात्मेति भाष्यपाठोऽनुमीयते किन्तु सर्वत्रैकवचनान्त एवोपलभ्यत इति एकवचनान्त एव मुद्रितः । स० ।

दित्यनुमानं तु सूत्रविरुद्धम् प्राणस्यालिङ्गत्वाप्रतीतेः। ननु भस्त्रा-याः दृष्टान्तत्वमनुपपन्नं तत्रापि लोहकारात्मनोऽसिद्धेः, सिद्धौ वा तेनैवात्मत्वसिद्ध्यर्थमनुमानमतः सूत्रकृता लिङ्गान्तरस्य परामृष्टं प-रामृशति निमित्तेति। ननु नयने स्पन्दो निमेषादिः, न च स सर्वप्र-यत्नकार्यो वातविकारजनिते व्यभिचारात् अत उक्तम् नियतेनेति। सहजो निमेषादिः, न च स अनुमापक इत्यर्थः। निमेषत्वादिकं जा-तिः अनुगतव्यवहारात् प्रकृते तु न निमेषत्वमित्यपि वदन्ति। प्रयो-गस्तु इदं शरीरमसाधारणप्रयत्नवदधिष्ठितं निमेषवत्त्वात् दारुयन्त्र-वत् इत्यत्रेश्वरेणार्थान्तरमपाकर्तुमसाधारणेति भोक्तृपदं वा देयम्। यद्यपि भगवत्सिद्ध्याप्यात्मत्वस्यानेकवृत्तित्वं सिद्ध्यत्येव, तथापि नानाजीवसिद्ध्यर्थमयमारम्भः। नन्वत्र दृष्टान्तासिद्धिः दारुयन्त्रे निमे-षोन्मेषयोरभावात् अत आह देहस्येति। वृद्धिश्च क्षतभग्नयोर्विघ-टितविश्लिष्टयोः संरोहश्च ताभ्यामित्यर्थः। ईषच्छिन्नं विश्लिष्टमेतच्च मृते नास्तीति जीवनदशायां तद्वैलक्षण्यमायातीति भावः। प्रयो-गस्तु भोक्तृप्रयत्नवदधिष्ठितं वृद्धेरित्यादि। वृक्षादेः पक्षसमत्वान्न व्य-भिचारः। ननु सूत्रे जीवनपदं श्रूयते भाष्ये तु आदिपदेन तदुपगृह्य वृद्ध्यादिलिङ्गत्वं कथयताऽन्यथा कथं गतमिति चेन्न। आत्मविशेष-गुणकारणात्ममनःसंयोगस्य जीवनपदशरीरेऽसिद्ध्या तदुपेक्षासम्भ-वात्। ननु वात्यानीतधूल्यादिपातेन स्थलवृद्ध्या व्यभिचार इत्यत आ-ह अभिमतेति। मनो जन्यप्रयत्नवदधिष्ठितं जन्यप्रयत्नासमवाहितसा-मग्र्यजन्यकर्मवत्त्वात् बालकप्रेरितजतुगुलवत्।

ननु यत्र सुप्त्यनन्तरं ज्ञानं भवति तत्र यथाऽदृष्टादेव मनसः क्रिया तथाऽन्यत्रापि प्रयत्नं विनैव स्यादिति चेत्। इच्छानुविधायिनि कर्म-णि प्रयत्नस्य हेतुत्वात्। ननु साक्षात्प्रयत्नाधिष्ठानं प्रत्यक्षगुणवत एव भवति वायवीयशरीरस्याप्रत्यक्षत्वेऽपि प्रत्यक्षगुणवत्त्वात् मनस्तु न-वमिति कथं साक्षात्प्रयत्नाधिष्ठितत्वमिति चेत्। साक्षात्प्रयत्नाधि-ष्ठितत्वस्यासाध्यत्वात् दृष्टान्तेऽपि तदभावात्। एवं चादृष्टविशेष-सहकृतानागन्तुकसंयोगवतामेव मनोवहनाडीप्रत्यक्षं तद्विषयकः प्रयत्नः तेन तत्र क्रिया तया स्पर्शवद्वेगवन्नाड्या सम्बन्धान्मनसि क्रियोत्पत्त्यभिप्रायात्। एतेन त्वचा कथं नाडीज्ञानमनागन्तुकसंयो-गस्याहेतुत्वात् अन्यथा शरीरस्य नित्यप्रत्यक्षापत्तेरित्यपास्तम्।

अनन्यगत्याऽदृष्टविशेषसाहाय्येन कदाचिन्नाडीप्रत्यक्षस्यानागन्तुकहेतुसंयोगेनापि जननात्, अन्यथा मलादिक्रियानुपपत्तेरिति दिक्। अक्षरार्थस्तु अभिमतो विषयो रूपादिः तद्ग्राहकं करणं चक्षुरादि तेन यो मनःसम्बन्धस्तन्निमित्तेन मनःकर्मणा प्रयत्नवान् सिद्ध्यति। कर्मविशेषस्य प्रयत्नानुविधानदर्शनात् गृहकोणव्यवस्थितजतुगुलककर्मणोऽर्भकजन्यत्वादिति। नन्वत्रापि दृष्टान्तासिद्धिः स्वाभिमतस्य बालकस्य प्रयत्नवत्त्वासिद्धेरत आह नयनेति। चक्षुषा जम्बीरफलादे रूपग्रहणानन्तरं रससमृतिर्भवति एकसम्बन्धिज्ञानं सत्यपरस्मारकसंस्कारोद्बोधात्। एवं चक्षूरसनाभ्यां रूपरसनाभ्यां रूपरसग्राहक एक एव अन्यस्य सम्बन्धिज्ञानेऽन्यस्य संस्कारानुद्बोधात्। यथैकगवाक्षेण सम्बन्धिन दृष्ट्वा परगवाक्षस्मृतेरित्यर्थः। रसनाविक्रिया दन्तोदकसम्भवलक्षणा। अनुमान चेन्द्रियाणि चेतनाद् भिद्यन्ते नियतविषयत्वाद्गवाक्षवत्। नन्विन्द्रियाणामचैतन्यं प्रागेव सिद्धम् आत्मसाधनं तु प्रस्तुतमनेन न भवत्येवेत्यत आह सुखेति। मुखप्रसादादिसुखाद्यनुमापितेन सुखादयो द्रव्याश्रिता गुणत्वात् रूपादिवदित्यनुमानमित्यर्थः। सुखादयो न सामान्यात्मका अभूत्वाभावित्वात्, न कर्मात्मकाः संयोगाजनकत्वात्, न नित्यद्रव्याणि कार्यत्वात्, नानित्यद्रव्याणि स्पर्शशून्यत्वात् गुणत्वमेषां सिद्धमिति भावः। ननु द्रव्याश्रितत्वासिद्धावपि शरीरादिनार्थान्तरमत आह ते चेति। शिष्याकांक्षामाह कस्मादिति। उत्तरं अहङ्कारेणेति। अहङ्कारेणैकवाक्यता अहन्त्वसमानाधिकरण तद्भावानधिकरणादित्यर्थः। सुखादयो न शरीरादिविशेषगुणाः अहन्त्वसामानाधिकरण्यात् रूपवदिति व्यतिरेकिणा ज्ञानवद्भिन्नत्ववारणाय वा प्रयोगः। अत्रानुमानविशेषपदस्याखण्डाभावः शरणम्। विशेषगुणत्वं च सुखादेः स्वाश्रयसमानाधिकरण द्रव्यविभाजकोपाध्यत्यन्ताभावसमानाधिकरणवृत्तिगुणत्वन्यूनवृत्तिजातिशून्यत्वेन स्नेहवत् साधनीयम्। न च स्पर्शादौ तादृशजातिमत्यपि विशेषगुणत्वं व्यापकव्यभिचारस्यादोषत्वात्। न चाहं गौर इत्यादिप्रतीतेरहन्त्वमपि शरीरवृत्त्येव भवत्विति वाच्यम्। शरीरस्यात्मतायां तस्य परिमाणभेदेन भिन्नतया बाल्येऽनुभूतस्य यौवने स्मरणानुपपत्तेः इत्यस्वरसादपि चाह प्रदेशेति। समानाधिकरणात्यन्ताभावप्रतियोगित्वादित्यर्थः। अत्र विशेषपदाभावे संयोगादौ

व्यभिचारः। एवं च सुखादयो न शरीरेन्द्रियविशेषगुणाः स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वात् संयोगादिवदिति प्रयोगः। न च शब्दे व्यभिचारः तस्य श्रोत्रेन्द्रियगुणत्वादिति वाच्यम्। शब्दान्यत्वेन विशेषणात्। एवमयावद्द्रव्यभावित्वादित्यत्रापि बाह्यत्यादावपि। श्रोत्रगुणस्य शब्दस्य कदाचिदतीन्द्रियस्य सम्भवादनुद्भूतत्वादिति। वस्तुतस्तु बाह्येन्द्रियाप्रत्यक्षत्वं चक्षुरादिरूपादौ व्यभिचारीति। मानसप्रत्यक्षत्व तदर्थज्ञानं च दृष्टान्तः तस्य शरीरेन्द्रियगुणत्वस्य प्रागेव निषेधात्। व्यतिरेके शरीररूपादिर्वा दृष्टान्तः। आचार्यास्तु न शरीरेन्द्रियगुणा इत्येव प्रथमसाध्यमुक्तवन्तः। तत्र शरीरात्मसंयोगादौ व्यभिचारवारणाय मात्रगुण इति साध्याहारस्तु तेषामेकदेशिनमनुगृह्य अन्यथा सन्दर्भविरोधात्। ननु ज्ञानसंस्कारौ शरीरगुणौ मा भवतः सुखादयस्तु तद्गुणा भवन्ति प्रतिसन्धानं च योऽहमिदानीं कृष्णः पूर्वं गौरः इति वद् भविष्यतीति चेत्। न। ज्ञानेच्छाप्रयत्नानामसामानाधिकरण्ये देवदत्तस्येष्टसाधनताज्ञाने यज्ञदत्तस्य चिकीर्षायां विष्णुमित्रो यजेत। एवं द्वेषेऽपि नासामानाधिकरण्यम्। अन्यस्मिन्ननिष्टसाधनताज्ञानवत्यन्यस्मिन् द्वेषप्रसङ्गात्। सुखदुःखे अपि न तथा अन्यस्मिश्चन्दनकण्टकस्य स्पर्शमनुभवति परस्य सुखदुःखोत्पादप्रसङ्गात्। ननु यथात्मसंयोगस्य साधारण्येऽपि यददृष्टाकृष्टं यच्छरीरं तदवच्छेदेनैव तस्य तत्र ज्ञानं तथा तददृष्टाकृष्टशरीर एव ज्ञानादिच्छाद्युत्पत्तिरिति वैयधिकरण्येऽपि नातिप्रसङ्ग इति चेत्। न। ज्ञानेच्छाद्याश्रययोः करणयोः साक्षात्प्रत्यासत्तौ सम्भवन्त्यां परंपराप्रत्यासत्तिकल्पनाया अकल्पत्वात्। किन्तु सुखादीनां शरीरादिगुणत्वे मनोवेद्यत्वापत्तिः तद्गुणानामपि मनोवेद्यत्वे अन्धादिभी रूपादयोऽपि गृह्येरन्। न च यथा किञ्चिच्छरीरगुणेषु चक्षुर्वेद्य यथा रूपं किञ्चिज्ज्ञानेन्द्रियवेद्यं यथा स्पर्शादि तथा किञ्चिदेव मनोवेद्यमस्त्विति वाच्यम्। चक्षुरादीनां प्रतिनियतविषयत्वेन तथा सम्भवात् मनसस्तु सर्वविषयत्वात्। ननु स्वातन्त्र्येण बहिःपदार्थविषयत्वे मनसोऽपि नियमो भविष्यतीति चेत्। मनसो बहिः पदार्थे स्वातन्त्र्ये प्रमाणाभावात् लाघवेन सामान्यत एव मनसो बहिः पदार्थेऽस्वातन्त्र्यकल्पनात् अन्यथाऽन्योन्याश्रयात्। सुखादीनां शरीरगुणत्वसिद्धौ तद्भिन्ने बहिर-

र्थे स्वातन्त्र्यं तस्मिंश्च तद्गुणत्वमिति ।

ननु ज्ञानादयोऽपि शरीरगुणा एव । न चान्येनानुभूतस्यान्येनास्मरणात् प्रतिशरीरभेदाद्भेदेऽपि वा तथात्वे चैत्रमैत्रयोरतिप्रसङ्ग इति वाच्यम् । कार्यकारणभावस्य नियामकत्वादिति चेत् । मात्राऽनुभूतस्य पुत्रेण स्मरणप्रसङ्गात् । समवायसम्बन्धेन कार्यकारणभावस्तथेति चेत् । पूर्वापरशरीरयोः कार्यकारणभावाभावात पूर्वशरीरनाशानन्तर परशरीरोत्पत्तेः खण्डपटमहापटपरिपाटीपाटनात् । किञ्च बाल्येऽनुभूतस्य वार्धके स्मरणानापत्तिः, अन्तरा तरुणतनुसम्भवेन वृद्धविग्रहस्य बालकलेवरानारब्धत्वात्। न च परस्परकार्यकारणभावोऽस्त्येव वृद्धस्थविरयोरिति वाच्यम् । शरीरयोः कार्यकारणाभावात् । न च क्षणिकत्वपक्षमाश्रित्य संयोगसन्निधिस्वीकारेण शरीराच्छरीरोत्पत्तिरिति वाच्यम् । तस्यानुपदमेव निरस्यत्वात् । इन्द्रियगुणत्वेऽपि प्रत्यक्षत्वाविरोधात् । न च शब्देतरेत्यादीन्द्रियलक्षणव्याघातः स्मृत्यजनकेत्यादेस्तल्लक्षणस्य करणात्। न चातीन्द्रियनिष्ठतयाऽतीन्द्रियत्वं वायुस्पर्शस्येन्द्रियकत्वात् सामान्यगुणानामेवातीन्द्रियनिष्ठानामतीन्द्रियत्वात्। न च गौरोऽहं सुखीत्यादिप्रत्ययाच्छरीरधर्मत्वं प्रसक्तं शरीरधर्मेण गौरत्वेन सामानाधिकरण्यानुभवात इन्द्रियधर्मत्वस्य तु किं प्रसक्तमिति वाच्यम् । मनो मे दुःखितं मनो मे हृष्टं स्पर्शानुसुखो वायुः रसनदुःखानि निम्बपत्राणि इत्यादिप्रत्ययानामिहापि सत्त्वादिति चेत्।

न। इन्द्रियाणां मिथो यथोचितानां सुखाद्याश्रयत्वे योऽहं रूपसुखवान् सोऽहं स्पर्शसुखवानिति प्रत्यभिज्ञानानुपपत्तेः । न च विना बाधं बोधः प्रामाण्यमनुभवति प्रामाण्यस्यैवौत्सर्गिकत्वात् इति । किञ्चाहंशब्दः सार्थकः शब्दविशेषत्वात् घटादिशब्दवदिति ततोऽपि परात्मा सिध्यतीत्याह तथाऽहंशब्देनेति । ननु पृथिव्यादिभिरेवासावर्थवान् भविष्यतीत्यत आह पृथिव्यादिव्यतिरेकादिति । यदि पृथिव्येवाहंशब्दार्थः स्यात् तदाऽहं पृथिवीति सामानाधिकरण्यं स्यात् तच्च नैवमिति भावः । ननु अहं गौर इति सामानाधिकरण्यभानात् गौर शरीरमेवाहंपदार्थो भविष्यतीति चेत । बाल्यानुभूतस्य यौवने स्मरणानुरोधेन बाल्ययौवनयोरेकस्याहंपदार्थत्वात् ।

नन्वयुक्तमेतत् क्षणिकतायां सिद्धायामनुभवितृस्मर्त्रोरेकस्यापह-

स्थितत्वात्। न चातिप्रसंगोऽनुभवितृभिन्नेनापि समर्थेन स्मरणार्जनाद् असमर्थेन चानर्जनात्। न च चिरविनष्टोऽनुभवः संस्कारं विना कथं स्मरणं सूते संस्काराङ्गीकारे च तस्य स्थिरत्वे कथं सर्वक्षणिकतेति वाच्यम्। विनष्टस्याप्यनुभवस्य निर्व्यापारस्यापि समर्थतया स्मरणजनकत्वात्, सुषुप्त्या प्रहराद्यन्तरितस्यापि प्रथमजागरान्त्यज्ञानस्य द्वितीयजागरीयाद्यज्ञानजनकत्वस्य बौद्धाचार्यैरङ्गीकारात्। तत्र क्षणिकत्वे विप्रतिपत्तिर्घटः स्वोत्पत्त्यव्यवहितोत्तरक्षणवर्तिध्वंसप्रतियोगी न वा? अत्र विधिकोटिः नास्तिकानां निषेधकोटिः आस्तिकानाम्। विधिकोटिप्रसिद्धिः एतद्घटोत्पत्त्यव्यवहितोत्तरक्षणवर्तिध्वंसप्रतियोगिनि तत्कालनष्टे एतत्कालनष्टे पूर्वकालनष्टे पूर्वोत्पन्ने कस्मिंश्चित् पदार्थे स्वपदेन पक्षीकृतस्यैतद्घटस्यैव ग्रहणात्। एतद्घटे चैतस्य सिद्धौ क्षणिकत्वमक्षतमेव। तदुत्तरकालोत्पन्ने निषेधप्रसिद्धिः, तत्र तदुत्पत्त्यव्यवहितोत्तरक्षणवर्तिध्वंसप्रतियोगित्वाभावादिति बौद्धाधिकारवर्धमानटीकाव्याख्यायामस्मत्पितरः॥

कार्यं स्वसमवायिकारणसमानकालीनं न वेति विप्रतिपत्तिः। अत्र विधिकोटिरास्तिकानाम्। कार्यस्य स्वसमवायिकारणसमानकालीनत्वेनाशंकाभावाद् अग्रेऽपि कार्यावस्थिते स्थैर्यस्थैर्यात्। निषेधकोटिर्नास्तिकानाम्। कार्यकाले समवायिकारणाभावे कारणभावः, उत्तरकाले कार्यनाशाद्विधिप्रसिद्धिः पक्षीकृतकार्यसमवायिकारणसमानकालीने तत्वान्तरेऽसमानकालीने तु निषेधप्रसिद्धिः। अनुमानं च तत्कालवृत्तिस्स एतद्व्यवहितोत्तरक्षणवर्तिध्वंसप्रतियोगी यथोभयसम्प्रतिपन्नः कश्चिदेतत्कालवृत्तिश्चैतत्कालोत्पन्न इति बौद्धानामुपनयोदाहरणयोरवावयवत्वादेतत्कालवृत्तेः कस्यचिदग्रिमद्वितीयक्षणे नाशस्य बौद्धैरपि अङ्गीकारात् पूर्वमपि परसत्त्वाऽङ्गीकारादिति चेत्। न, अप्रयोजकत्वात्। न च अहेतुको विनाश इति विलम्बप्रयोजकविलम्बप्रतियोगिनोऽभावात् जातस्य द्वितीयक्षण एव विनाश इति वाच्यम्। एवंसति प्रतियोगिनोऽपि अनपेक्षणे प्रतियोगिकाले तत्प्राक्काले च विनाशस्य सदातनतायां सर्वदा भावासत्त्वे सर्वशून्यतावादापत्तेः। विनाशकालेऽपि कदाचिद्भावास्तिष्ठति तयोरविरोधादिति चेत्। विनाशस्य भावसत्त्वाविरोधित्वेऽन्यस्य विरोधिनो भावात् सर्वदा भावसत्ताया तस्यापि सदातनत्वापत्तेः। प्रागभावदशायां न भाव इति

सदातनत्वमिति चेत् । कालमादाय ध्वंसव्यापकतापत्तेः । ध्वंसो ऽहेतुकोऽविनाशित्वादिति चेत् । ध्वंसः सहेतुक उत्पत्तिमत्त्वादिति विरोधात् । न चात्र भावत्वमुपाधिर्घटादौ ध्वंसे च साध्यसाधनव्यापकाव्यापकत्वादिति वाच्यम् । भवदनुमानेऽप्युपाधेः सम्भवात् । प्रागसत्ताराहित्यस्य गगनप्रागभावादौ साध्यव्यापकस्य ध्वंसे साधनाव्यापकत्वात् । ननु जायमानस्य भावस्य विनश्वरत्वमविनश्वरत्वं वा ? न कदापि विनाशो नाश्यात् स्वभावव्ययाभावात् गोरश्वत्ववत् नहि कारणकार्यसहस्रेनापि गोरश्वो भवति । प्रथमे तु नाशस्य कारणान्तरसापेक्षत्वञ्च स्यात्, गोत्वे कारणान्तरापेक्षायाः अदर्शनात् । तथा च विलम्बाभावादुत्पन्नस्य द्वितीयक्षण एव विनाश क्षणिमेव क्षणिकत्वम् । किञ्च विनाशस्य सकारणकस्य भावाभेदो नोचित एव विरोधात् सामग्रीभेदात् विनाशकालेऽपि भावोपलम्भापत्तेश्च । घटतद्विनाशयोर्भेदे तु विनाशे जातेऽपि घटोपलम्भापत्तिरन्यस्मिन् जातेऽपि अन्योपलम्भस्य गवाश्वादौ दर्शनात् । जातेनाप्यश्वेन गौर्न तिरोधीयते नाशेन तु न खरस्तथा क्रियते इति चेत् । तिरोधानस्य भावाभिन्नत्वाभिन्नत्वाभ्यां दोषस्य निरुक्ताभिन्नत्वात् । अपरञ्च ध्रुवभावित्वं नियतत्वम् । नियते च कृपाणस्यायोमयत्वे हेत्वन्तरापेक्षा न कस्यचिद् अध्यक्षाऽनियते च स्वारुणिमादाविव तन्निरीक्षणात् । तथा च नियतानां भावविनाशानां न हेत्वन्तरापेक्षत्वमित्यपि लोकस्य विनाशस्य न सकारणकत्वम् । अभावं करोति इत्यस्य भावं न करोतीत्यर्थकत्वादिति चेन्न । भावस्य विनश्वरता यदि विनाशात्मकता स्यात्, तदा विनाशस्य भावकारणभिन्नकारणापेक्षा न स्यादभेदे कारणभेदाभावात् । न चाभेदः प्रामाणिको, घटस्य विनाश इति भेदानुभवात् विनाशार्हवस्तुनि विनश्वरत्वं सम्भवति । न चैतावता विनाशस्य कारणानपेक्षा तण्डुलानां पाकानाश्रयत्वे पाके कारणानपेक्षापत्तेः । स्वोत्पत्त्यव्यवहितोत्तरक्षणवर्तिध्वंसप्रतियोगि विनश्वरत्वमीदृशि च स्वभावे विनाशोऽहेतुक एवायाति, हेत्वपेक्षायां कदाचित् विलम्बापत्तेः हेतुसमवधानस्यानियतत्वादिति चेत् । एतादृशस्य विनश्वरत्वस्य अस्माभिरनभ्युपगमात् । न चाश्वोत्पत्तौ गौरिव विनाशोत्पत्तौ घटानुवृत्तिः स्यादिति वाच्यम् । अश्वस्य गोनिवृत्तिरूपत्वाभावाद्विनाशस्य घटनिवृत्तिरूपत्वात् निवृत्तौ जातायामनुवृत्तेरसम्भवात् । अन्यः कथ-

मन्यनिवृत्त्यात्मेति चेत् । स्वभावस्य नियोगपर्यनुयोगानर्हत्वात् । अन्यथा प्रागभावनाशे प्रतियोग्यात्मनि प्रागभावोऽनुवर्तेत । तत्रेष्टापत्तौ प्रागभावप्रतियोगिनोः समानकालत्वे तयोः सामयिको विरोधो भज्येत । ध्रुवभावित्वं च न प्रतियोग्युत्पत्त्यव्यवहितोत्तरक्षणभावित्वमहेतुकत्वं वाऽस्माकं तयोरसिद्धेः, न ह्यस्माकं दर्शने ध्वंस उत्पत्तेरव्यवहितोत्तरक्षणे जायतेऽहेतुको वाऽऽवश्यकत्वत्तादिति चेत् । व्यभिचाराद्घाते रावशक्या अपि (?) मुद्गरपातादिसापेक्षतया सहेतुकतया व्यभिचारात् सहेतुके घटादावावश्यके व्यभिचाराच्च । घटादेरनावश्यकत्वे ध्वंसस्याप्यनावश्यकत्वमित्य सिर्पति(?) प्रतियोग्यन्यानपेक्षत्वं ध्रुवभावित्वमिति चेत् । अन्यतरासिद्धेः अस्मन्मये प्रतियोग्यन्यस्यापि कारणत्वाद्भावतादात्म्यम् । अभावे ध्रुवभावित्वमिति चेत् । भावाभावयोरभेदे भावस्यापि निरुपाख्यतापत्तौ शून्यवादापत्तेः, अभावस्यापि सहेतुकभावाभेदेन सहेतुकतापत्तेश्च । प्रतियोगिकारणकत्वलक्षणेन ध्रुवभावित्वं नतु सकारणकत्वं सिध्यति मातृत्वेन वन्ध्यात्वसिद्धिप्रसङ्गात् ।

नन्वस्तु नवीनसौगतागतादनुमानात् क्षणिकत्वसिद्धिः । तथाहि यत्सत् तत् क्षणिकं यथा जलधरः सन्तश्च घटादय इति । न च दृष्टान्तासिद्धिः, प्रसाध्यङ्गकस्यापि(?) अनुमानस्य प्रामाणिकत्वात् । न च व्याप्तिग्राहकप्रामाण्यादेव सत्त्वसाध्यसिद्धेरनुमानवैयर्थ्यम्, सत्त्वस्य पक्षतानवच्छेदकत्वात् घटादित्वेनैव पक्षतावच्छेदकसाध्यसामानाधिकरण्यस्यानुमितिविषयस्याप्रतीतेः । ननु क्षणिकत्वव्याप्तिः सत्त्वे नास्तीति यद्यपि वक्तुं न शक्यते क्षणिकत्वस्वीकारापत्तेः खपुष्पव्याप्तिर्नास्तीत्यभिलापस्य प्रामाणिकानामभावः, तथापि स्वोत्पत्त्यव्यवहितोत्तरक्षणवर्तिध्वंसप्रतियोगित्वव्याप्तिः सत्त्वे नास्तीति वक्तुं शक्यते एव स्वपदेनैकघटग्रहणे तदितरत्र कस्मिंश्चित्प्रसिद्धेः । न ह्येतद्घटोत्पत्त्यव्यवहितोत्तरक्षणे कोऽपि नश्यतीति तार्किकानामपि साम्प्रतम् । तथाच विपक्षबाधकाभावात् व्याप्तेरग्रहात् कथमनुमानम् ।

अपि चाऽर्थक्रियाकारित्वं सत्त्वमनुगतमननुगतं वा ? अनुगतत्वे तुच्छतापत्तौ कथं हेतुता ? अननुगतत्वे च धर्म्यभेदपर्यवसानेन कथं पक्षधर्मता स्वस्य स्वस्मिन्नवृत्तेरिति चेन्न । विकल्पोपस्थितस्यालीकस्यापि अस्मन्मये हेतुत्वात्, हेतुज्ञानमात्रस्य कारणत्वात्,

हेतुज्ञानस्य सर्वत्र सविकल्पकतया प्रमाणत्व एव पर्यवसानात् । अलीके च स्वलक्षणप्रत्यासत्तिसत्त्वेन पक्षधर्मत्वान् स्वलक्षणालीकयोः प्रत्यासत्तिरलीकाऽनलीका वेति तु विचारान्तरम् । अलीकत्वेऽपि हेतुवद्दोषाणां व्यापकत्वात् । अर्थक्रियाकारित्वग्रहस्तु प्राक्सत्त्वेन प्राक्सत्त्वग्रहस्तु बीजत्वादिना न त्वर्थक्रियाकारित्वेनैव येनान्योन्याश्रयः स्यात् । न चाप्रयोजकत्वं नोद्धृतमिति वाच्यम् । अर्थक्रियाकारित्वरूपस्य सत्त्वस्य हेतुत्वे सति तदुद्धारस्यातिस्फुटत्वात् । भवतापि सत्प्रत्ययालम्बनस्यार्थक्रियाकारित्वरूपत्वौचित्यात्, सत्ताजातेः सामान्यादावभावात् । प्रामाणिकत्वस्य तत्त्व ध्वंसे सत्प्रत्ययानुदयप्रसङ्गः । उद्धारः कथमिति चेत् । तृतीयप्रकाराभावेनार्थक्रियाव्यापकयोः क्रमाक्रमयोः स्थिरेऽसम्भवात् । कथमसम्भव इति चेत् । क्रमपक्षे प्रथमार्थक्रियाकरणकाले द्वितीयार्थक्रियासामर्थ्ये तस्या अपि तदैव करणापत्तिः । असामर्थ्ये तु यदि सर्वदा तदाऽग्रेऽपि करणापत्तिः । इदानीमसामर्थ्येऽग्रे सामर्थ्ये विरुद्धधर्माध्यासाद्भेदापत्तिरिति क्रमपक्षः स्थिरेऽस्थिरः । अक्रमेऽपि तथैवैकदा सर्वा अर्थक्रिया उत्पाद्य स्थितस्य भावस्य पुनस्तासु सामर्थ्ये पुनस्ता जनयेदेव पूर्ववत्सामर्थ्याविशेषात् । असामर्थ्ये तु विरुद्धधर्माध्यासः । क्रमपक्षे क्रियाकर्मानुपलम्भापत्तिश्च । क्षणिके तु नोभयोरसम्भवो यत्र सामर्थ्यं तत्राक्रमस्यैव स्वीकारात्, क्रमिकास्वर्थक्रियासु कारणानामपि क्रमिकत्वात् । नन्वक्षणिकाप्रसिद्धेः कथं यन्न क्षणिकं तन्न सदिति व्यतिरेकव्याप्तिग्रह इति चेत् । अलीक एवालीकयोरेवाक्षणिकत्वासत्त्वयोर्व्याप्तिविकल्पात् ।

यद्वा सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्मसंसर्गात् कुसूलक्षेत्रवर्तिनोर्बीजयोर्भेदसिद्धौ क्षणिकतायां पर्यवसानम् । सामर्थ्यासामर्थ्ये एवासिद्धे इति चेत् । प्रसङ्गविपर्ययाभ्यां च तयोः सिद्धेः । कुसूलस्थं बीजं यदि समर्थं स्यात् तदेतत्क्षणाव्यवहितोत्तरक्षणे कुर्यात् सामग्रीनिविष्टबीजवत्, न च करोति तस्मान्न समर्थमिति कुसूलस्थे स्पर्शसामर्थ्यासिद्धेः । क्षेत्रस्थं बीजं यद्यसमर्थं स्यात् तदा न कुर्यात् सामग्रीनिविष्टबीजवच्छिलाशकलवद्वेति क्षेत्रस्थस्य सामर्थ्यसिद्धेः । न च प्रथमप्रसङ्गे सामग्रीनिविष्टत्वमुपाधिः, तस्या अव्यापाद्यत्वात् ।

ननु सामर्थ्यपदेन फलोपधानग्रहणे यदि फलोपहितं स्यात्तदा फलं स्यात्, न च फलोपहितमिति प्रसङ्गविपर्ययोः पर्यवसान

आपाद्यसाध्याविशेषादसमर्था व्यावृत्तिः सामर्थ्यं कारी व्यावृत्तिश्च कारित्वमिति व्यावृत्तिभेदाददोष इति चेत् । स्वरूपतो व्यावृत्तौ भेदेन लोकत्वप्रसङ्गात्(?) स्वरूपवत्त्वात् । न ह्यत्र घटत्वपटत्वयोरिव स्वतो व्यावृत्तिस्तद्भेदस्तत्र घटपटयोरिवात्रासामर्थ्यकारिणोः भेदाभावात् । अश्वत्थत्ववृक्षत्वयोरपि भेद सम्भवति अश्वत्थत्वस्य घटादेरपि व्यावृत्तिरूपत्वात् वृक्षत्वस्याश्वत्थत्वादेरेव तद्रूपत्वात् । न च कारी समर्थ इति शब्दभेदात् ज्ञानव्यक्तिभेदात् वा भेद इति वाच्यम् । घटत्वकुम्भत्वयोरपि भेदापत्तेः । ननु सहकारिसाहित्यं सामर्थ्यं फलोपधान तु कारित्वमिति तयोर्भेद इति चेत् । कुसूलस्थ आपादकस्य पराभिमतत्वासिध्याऽऽपादकासिद्धेः तर्क आपादकस्य पराभिमतत्वसिद्धयैव सिद्धे । असहकारिसहिते कारित्वप्रसञ्जन इष्टापत्तेश्च । ननु स्वरूपयोग्यता सामर्थ्यम्, तथा च कुसूलस्थं बीजं यदि स्वरूपयोग्यं स्यात् तदा फलोपहितं स्यात् इति न प्रसङ्गासङ्गतिरिति चेत् । स्वरूपयोग्यतापदेन बीजत्वग्रहणे विपर्ययपर्यवसानस्य न च करोति,(?)तस्मान्न बीजमिति पर्यवसाने बाधापत्तेः, तत्र बीजत्वस्य त्वयापि अभ्युपगमात् । कुर्वद्रूपत्वग्रहण वाऽसिद्धिर्मया तदनङ्गीकारादिति चेन्न। अङ्कुरकारणतावच्छेदकरूपत्वेन विशिष्यानिर्द्धारितेनापादनात् । ननु समर्थोऽपि भावः सहकारिवैधुर्यान्नाजयतीति चेत् । सहकारिण उपकारकत्व उपकारकस्यापि सहकारितयोपकारपरम्परापत्त्याऽनवस्थित्यापत्तेः, अनुपकारकानां तु सहकारित्वेऽतिप्रसङ्गात् । ननु नातिप्रसङ्गः स्वभावात् केषांचिदेव सहकारित्वात् कारणत्वं, तथा च सकलसमवधाने कार्यमिति चेत् । समवधानस्यैव जनकत्वापत्तेः स्वोत्पत्त्यव्यवहितोत्तरक्षणे फलोपहितस्यैव जनकत्वादवश्यकल्पमानेन समवधानेन घटकानामनन्यथासिद्धेश्च । समवधानस्याजन्यत्वे च प्रागपि कार्यापत्तिः । जन्यत्वेन च जन्यधर्मानाश्रये गुणादौ कथ तदवस्थितिः। समवधानस्यासहकारित्वे कथं कार्यजनकत्वम् । सहकारित्वेऽपि तत्समवधानापेक्षायां समवधानपरम्परापत्त्याऽनवस्थित्यापत्तेः । सहकारिणोऽपि तस्यासमवहितस्यैव जनकत्वे बीजस्यापि तथात्वापत्तौ केवलादपि कार्यापत्तिः । ननु विलम्बकारिता भावस्य स्वभावः, तथा च कथमुत्पत्तेरनन्तरमेव कारित्वमिति चेत्। यदा जनयति तत्पूर्वमस्य स्वभाव-

स्य स्थितौ तदार्थजननापत्तिः । निवृत्तौ च स्वभावनिवृत्तौ कथमव स्थितिः । तस्मात् स्वोत्पत्त्यव्यवहितोत्तरक्षणकारित्वमेव भावस्य स्वभाव इति भावनीयम् ।

ननु बीजानि प्रतिक्षणं भिन्नानि तेषु च किञ्चिदङ्कुरप्रसव समर्थमिति तवाभिप्रायः, तथासति केवलादपि बीजादङ्कुरापत्तिः यः समर्थः स सहकारिसमवहित एवोत्पद्यते इति चेत् । तेषां प्रत्येकं कार्ये सामर्थ्ये नानाकार्योत्पादापत्तिः । मिलितस्य तथात्वे मिलितस्य स्वरूपाद्भेदे भवतोऽपि समवधानपक्षोक्तदोषापत्तिः, अभेदे तु स्वरूपानां भेदेन कार्यभेदापत्तिस्तदवस्थैवेति चेत् । बीजपृथिव्यादीनां प्रतिक्षणं भिन्नानां किञ्चिद्बीजादिस्तथोत्पद्यते यथा स्वाव्यवहितोत्तरक्षण एव करोति । स्वभावश्च भिन्नानामपि तेषामेककार्यजनकत्वमेव दर्शनानुरोधेन स्वभावकल्पनावकल्पनात्। अङ्कुरप्रसवसमर्थाश्च बीजादयः परस्परं प्रत्यासन्ना एव भवन्तीत्यपि स्वभावः । प्रत्यासत्तिश्चास्मिन्नये सर्वेषां तत्कार्यकुर्वद्रूपाणामुत्पाद्यवस्तुसंयोगः तस्य तत्कार्यस्य स्वीकारे तत्कालेभावात् । एवञ्च ये समर्थास्ते सहिता एव भवन्ति कुर्वन्ति च । ननु समर्थाः सहकारिविलम्बेन सन्तोऽपि कार्यं नार्जयन्तीति पक्षस्सहकारिसमवहिताः कुर्वन्ति तद्रहिताश्च न कुर्वन्तीति कारणस्वभावे स्थैर्यमेवायात्विति चेत् । स्वभावभेदेन भेदापत्तेः । सहकारिविरहे न कुर्वन्तीति स्वभावे स्वकारणोद्भूतानपि सहकारिणो निराकृत्य न कुर्युः स्वभावभङ्गप्रसङ्गात् । सहकारिसमवधाने कुर्युरिति च स्वभावे सदा सहकारिणः परिरभ्य तिष्ठेयुः कुर्युश्च, अन्यथा स्वभावभङ्गप्रसङ्गः । अस्माकं च ये समर्थास्ते समवहिता एव कुर्वन्त्येव च । येऽसमर्थास्तेऽसमवहिता एव न कुर्वन्त्येव चेति पूर्वदोषः। किञ्च कारणानां फलोपधाने कारणत्वमेव प्रयोजकं न तु सहकारिसमवहितकारणत्वं गौरवात् । एवं च कुसूलस्थस्य बीजस्य कारणत्वे फलोपधानं स्यादेव, तस्मात्कारणीभूतं बीजं पृथगेव । ननु कुसूलस्थबीजस्य प्रतिक्षणभिद्यमानस्य न काचिदर्थक्रिया दृश्यते इत्यसत्त्वापत्तौ तत्सन्ताने कथमङ्कुरकारिबीजजन्मेति चेत् । द्विविधा अर्थक्रिया समभागा विषमभागा च । तत्र कुसूले पूर्वपूर्वबीजनाग्रिमाग्रिमबीजारंभ एवेति समभागैवार्थक्रिया, क्षेत्रपतिता त्वङ्कुरोत्पत्तिरिति विषमभागा । तस्मा·

त्सर्वेषामर्थक्रियासत्त्वात् सत्त्वमेव। ननु कुसूले यावद्बीजं तिष्ठति तावदेकमेव भवत्वकार्यैकस्वभावात्, अङ्कुरजनकं तु ततो भिन्नं भवतु, भिन्नस्वभावत्वात्। तथाच कथं कुसूलस्थबीजं प्रति क्षणभेदो विरुद्धधर्मासंसर्गादिति चेत्। अङ्कुर इवाङ्कुरप्रसवक्षमबीजेऽपि तावद्बीजापेक्षाऽऽवश्यकी। तत्र स्थिरस्य कुसूलस्थितबीजस्य तत्र सामर्थ्ये उत्पत्त्यनन्तरमेव तदुत्पत्त्यापत्तिः। एवं च किञ्चिदेव बीजं तत्र समर्थं तत्रापि बीजं न स्थिरस्य सामर्थ्यं तदेवार्जनापत्तेरिति अग्रिमाग्रिमबीजपरम्पराप्रापिका पूर्वपूर्वबीजपरम्परा सिद्ध्यति। तया च क्षणिकत्वपर्यवसानात् किञ्च क्षणलक्षणविरोधिसंसर्गादपि भेदः। न च क्षणभेदात् कोऽपि भेदो न सिद्ध इति वाच्यम्। अस्माकं मते सर्वत्रैव सिद्धेः। एवं चान्यविरुद्धधर्मसंसर्गादिव क्षणभेदादपि भेद इति क्षणिकत्व एव पर्यवसानम्। एकक्षणस्थायिषु कथं भेद इति चेन्न। विरुद्धधर्मान्तरसंसर्गात्। बीजक्षित्यादीनां नैरन्तर्यं च सान्तरत्वाभाव एव। स चालीकोऽपि विशेषको तद्व्याप्यावृत्तिवत्। एवं च सिद्धे क्षणिकत्वे कथं ज्ञानात्मनोर्गुणगुणिभावः समकालत्वाभावात् कार्यकारणभावात्। तथा च पूर्वं ज्ञानमेवाग्रिमाग्रिमज्ञानकारणं, ज्ञानप्रवाह एव चात्मा। तथा च वैशेषिकदर्शनमसद्दर्शनमेवेति चेत्।

अत्राहुः। यथा क्रमाक्रमयोर्व्यापकयोर्निवृत्तौ स्थिरेऽर्थक्रिया न सम्भवति तथा सापेक्षत्वनिरपेक्षत्वयोर्व्यापकयोर्निवृत्तौ क्षणिकेऽपि न सम्भवति। अत्रापि तृतीयप्रकाराभावेन तयोरेव व्यापकत्वात्। तन्निवृत्तिः कथमिति चेत्। इत्थम्। बीजं क्षणसहकारिसापेक्षमङ्कुरं सूते तन्निरपेक्षं वा? सापेक्षत्वे कारणमपेक्षणीयासन्निधेर्न करोतीति मयेव त्वयाप्यनुमतम्। मम तु कारणमपेक्षणीयं विना तिष्ठति न च तवेति परं विशेषः। निरपेक्षत्वे कृषीवलो बीजं क्षेत्रादिना किमिति संयोजयतीति वाच्यम्। समर्थबीजोत्पादनायेति चेत्। समर्थबीजकरणेऽपि बीजस्य सापेक्षत्वनिरपेक्षत्वयोरुक्तदोषात्। नन्वनपेक्षत्वे भवतु दोषः सापेक्षत्वे तु न। न च सहकारिविलम्बेन कार्यकारित्वे स्थैर्यापत्तिः। सतः सहकारिविलम्बप्रयुक्तकार्याविलम्बकत्वे स्थैर्यात्, अस्माभिस्तु सहकारिण इव तस्यापि विलंबाविलम्बनात्। सापेक्षत्वे तु तैः सह कार्यकारित्वं न तु तद्विलम्बेन सतः कार्याजनकत्वम्, तत्प्राप्य च ज-

नकत्वं येन सहकारिसत्त्वसत्त्वक्षणयोः सत्त्वात्तेषां क्षणावस्थायित्वं स्यात् । तथा च व्यापकनिवृत्त्या क्षणिकार्थक्रियानिवृत्तिरिति चेत् । एवं हि कारणस्य सहकारिणः समवधानस्यावश्यकत्वे यदेव कुसूलपतितं क्षेत्राद्यसमवहितं नाङ्कुरकारि तदेव क्षेत्रादिसमवहितमङ्कुरं करोतीति तथैव स्वीक्रियतामापामरं तथैव व्यवहारात्, किं स्वदर्शनानुरतकतिपयव्यवहारानुस्मरणेन । अन्यथा अतिप्रसङ्गादेकवाक्यतापन्नद्वित्रिव्यवहृतव्यवहारस्यापि संभवात् तदनुसरणानौचित्यात् । किञ्च कुसूलस्थबीजस्याङ्कुरं प्रति शिलाशकलवदसामर्थ्ये कथं बीजे क्षेत्रपतितेऽङ्कुरो भवति न शिलाशकले । बीजे साक्षात्परम्पराङ्कुरजनने सामर्थ्यमस्ति न शिलाशकले तस्मात् क्षेत्रपतितादपि तदनुत्पत्तेरिति चेत् । बीजजातीययोः साक्षात्परम्परासामर्थ्यद्वयकल्पनागौरवात्, एकस्मिन्सामर्थ्ये साक्षात्कृतयोः सहकारिसमवधानासमवधानयोरेव मन्तुमुचितत्वात् । अपि च किञ्चिदेककुसूलस्थमेवाल्पसमयेऽतीते क्षेत्रादियोगे सति स्वल्पसमयोत्तरमेवाङ्कुरं सूते किञ्चित् भूयसि काले गतेऽङ्कुरं सूते तथा क्वचित्परम्पराया. स्वल्पत्वं क्वचिच्चानल्पत्वमिति कल्पनाच्च यस्य शीघ्रं सहकारिलाभः स शीघ्रमेव सूते यस्य तु चिरेण स चिरेणेत्येव श्रेयः । सहकारित्वं च यथा तव मते नोपकारकत्वम्, किन्तु सहैर्यजनकत्वं तथा ऽस्मन्नयेऽपि । अन्यच्च पुञ्जात्पुञ्जोत्पत्तिपक्षे येनैव स्वभावेन बीजस्याङ्कुरजनकत्वं तेनैव क्षित्यादिजनकत्वं स्वभावान्तरेण वा? आद्ये कार्याभेदापत्तिः कारणाभेदात् । न च बीजस्यैकत्वेऽपि सहकारिभेदमादाय सामग्रीभेदेन कार्यभेदे नैकत्वमिति वाच्यम् । पश्चात् प्रतिपक्षे(?) सर्वेषां सर्वत्र कारणत्वेन सहकारिभेदाभावात् । न च यत्र बीजमुपादानत्वेन जनकं सोऽङ्कुरः क्षित्यादौ तु निमित्ततया जनकत्वं तत्र क्षित्यादावेवोपादानत्वादिति वाच्यम् । एकत्र निमित्तत्वोपादानत्वविरुद्धधर्मसंसर्गापत्तेः । कार्यतदभावयोर्न विरोध इति चेत् । कालभेदेन सहकारिलाभालाभयोरप्यविरोधे स्थैर्यपर्यवसानात् । स्वभावभेदेन बीजस्य क्षित्यङ्कुरजनकत्वे नित्यत्वापत्तिः स्वभावेनापि अभेदे बीजशिलाशकलयोरपि अभेदापत्तिः । कार्यभेदेन रूपभेदो न विरुद्ध इति चेत् । कालभेदेन सहकारिलाभालाभयोरपि तथात्वात् । एवं च स्थिर एव सहकारिसमवधाने करोति तदसमव-

धाने न करोतीत्येतावन्वयव्यतिरेकौ क्षणिकेऽपि नाक्षतौ सहकारिसमवधाने करोतीति त्वया स्वीकारे सहकारिविनाकृतो न करोतीति पर्यवसानात्, अन्यथाऽन्वयस्यैव भङ्गापत्तेः. तथा चानयोर्भेदात् भेदे क्षणिकस्यापि भेदापत्तिः, अन्यथा तु स्थैर्यस्थैर्यापत्तिः। अपरञ्च सामग्र्यसमवधानदशायां यद्बीजे सामर्थ्यमुच्यते तत्कुतः ? न तावद्बीजत्वाभावस्य सत्त्वात् । नापि शिलाशकलवत् कार्याजनकत्वात् क्षित्यादिसमवधानेऽपि शिलाशकलात् कार्यानुत्पत्तेः। अस्माच्चोत्पत्तेर्वैलक्षण्यात् कुर्वद्रूपत्वाभावादसामर्थ्यमिति चेन्न। अस्याप्रामाणिकत्वात्। जनकत्वाजनकत्वयोर्विरोध इति चेत्, एककार्यं प्रति स्वरूपयोग्यत्वायोग्यत्वयोः अनङ्गीकारात् । कालविरोध इति चेत् । अद्य काले तयोर्विरोधात् कालभेदेन चाविरोधात् । अस्माकं मते एकस्य कालभेदाभावात् । कालभेदेनाविरोधो नोभयसंमत इति चेत्, यद् बीजं यस्मिन् काले सहकारिसमवहितं न तदन्यस्मिन् काले सहकारिसमवहितम् । न च सहकारिसमवहितत्वं बाधादेव नाङ्गीक्रियते द्रव्यसमवधानस्यैव स्वीकारेण क्षणिकेऽपि सहकारिसमवधानासमवधानयोः कालभेदेन सत्त्वात् । अन्यस्मिन् काले बीजमेव नास्तीति चेत् । समवधानस्याप्यभावात् तस्मात्कालभेदेन न विरोध इति सिद्धम् ।

एवं च फलोपधानानुपधानयोर्विरोधेऽप्यसावेव समाधिरनुसरति । न चासौ समाधिः अतीतानागतनानाकालत्वावगाहमाना क्षणिकत्वे तु न किम्। अपि च कुर्वद्रूपत्वं जातिर्भवतोच्यते सा चेदेकव्यक्तिवृत्तिः कथं जातिः ? कथं वाऽननुगतानामनुगताङ्कुरजनकत्वमनेकव्यक्तिवृत्तित्वे शालित्वादिव्याप्यभिन्नभिन्नस्वीकारेऽङ्कुरजननं तु यवाद्यननुगम इति। शालिमाषादिवृत्तेरेकस्य स्वीकारे जातिसाङ्कर्यम्, शालित्वस्य कुसूलस्थे सत्त्वेन कुर्वद्रूपत्वाभावात् कुर्वद्रूपत्वस्य शालित्वपरिहारेण माषादौ सत्त्वात् क्षेत्रस्थे शालौ द्वितयसत्त्वात्। ननु जातिसाङ्कर्यस्य दूषणत्वे घटत्वं कथं जातिः घटत्वस्य सुवर्णघटे सत्त्वेन पृथिवीत्वस्य पटादौ तत्परिहारेण सत्त्वात् पार्थिवघटे द्वितयसत्त्वात्। सुवर्णे उपष्टम्भकभाग एव घटत्वं तेजोभागे तु गौणो व्यवहार इति चेत्। विना बाधं मुख्यार्थत्यागायोगात् पाषाणत्वघटत्वाभ्यां साङ्कर्यात्-परस्परपरिहारेण पाषाणमृद्धटयोः सत्त्वेन

पाषाणघटे द्वितयसत्त्वात् । घटत्वं संस्थानवृत्त्येव न द्रव्यवृत्तीति चेन्न । तत्राप्यन्यतरकर्मादिजन्यतावच्छेदकजातीनां साङ्कर्यात् महान् घट इति गुणसामानाधिकरण्येन प्रतीतेश्चेति चेन्न । पाषाणत्वादिव्याप्यनानाघटत्वस्वीकारात् अनुगतव्यवहारस्य संस्थानविशेषवत्त्वेनैवोपपत्तेः । वस्तुतस्तु घटत्वस्य संस्थानवृत्तित्वेऽन्यतरकर्मजन्यतावच्छेदकादिव्याप्य जातिद्वयमेवायाति द्रव्यवृत्तित्व तु पाषाणत्वकाष्ठत्वादिव्याप्यं नानेति द्रव्ये घटत्वव्यवहारः संस्थानविशेषवत्त्वेनैव । अत एव यस्मिन्नेव सुवर्णसंस्थानविशेषदशायां कर्तव्यव्यवहार तस्मिन्नेव तदभावे न तथा व्यवहार इति । महान् घट इत्यादिगुणादिसामाधिकरण्यानुभवोऽपि संस्थानविशेष एव । जातिविशेषश्च संस्थानेऽवश्यं स्वीकर्तव्यः । संयोगविशेषः कुम्बग्रीवेत्यादौ विशेषान्तरस्य वक्तुमशक्यत्वादित्यादिरन्यत्र विस्तरः ।

ननु कुर्वद्रूपत्वजातेरभावेऽयं कुर्वद्रूप इति व्यवहारः किञ्चिदिति चेत् । सकलसहकारिसान्निध्येनोपाधिनैव तदुपपत्तेः । एवं च सहकारिसान्निध्यासान्निध्यात्मके कुर्वद्रूपत्वाकुर्वद्रूपत्वे अपि कालभेदमादायाविरुद्धे । न च देशभेदेन सामर्थ्यासामर्थ्ये भवतोऽपि मते । एतद्देशे समर्थस्य देशान्तरेऽपि सामर्थ्ये तत्रापि करणप्रसङ्गः । एवञ्च कालभेदेनापि सामर्थ्यासामर्थ्ययोः को विरोधः । अपि च क्षणिकोऽपि भावः सत्त्वदशायामर्थक्रियायां समर्थश्चेत् किं न करोति समर्थस्य प्रतिक्षेपायोगात् । समर्थोऽपि असत्त्वान्न करोतीति चेत् । सत्त्वस्य सामर्थ्यरूपत्वेऽसत्त्वस्यासमर्थरूपत्वात् । एते च कालभेदेन सामर्थ्यासामर्थ्ये भवतो मते । ननु क्रमकारित्वाक्रमकारित्वयोर्भावस्य कस्य संभव इति चेत् । यत्र कार्ये क्रमिकाः सहकारिणः तत्र क्रमकारित्वमेव यथा घटेन क्रमिकजलाहरणादौ । अक्रमिकसहकारिसम्पत्तौ चाक्रम एव यथा घटरूपाद्युत्पत्तौ । एव च यत्र कार्ये तत्कालं सहकारिमिलनं तत्राक्षेपकारित्वमेव यथा घटस्य स्वरूपाद्युत्पत्तौ । यत्र तु विलम्बेन सहकारिणः सान्निध्यं तत्र क्षेपकारित्वमेव । क्षेपाक्षेपौ च विलम्बाविलम्बौ । न च नानास्वभावत्वे धर्मिभेदो, धर्म्यभेदादेकस्मिन् बीजे बीजत्वकुर्वद्रूपत्वयोः त्वयाप्यङ्गीकारात् । ननूक्तं सहकारिणो न जह्यादेव वा स्वरूपत्यागस्यानुचितत्वात् तत्र किमुत्तरमिति चेत् । सहकारिसमवधाने सति कारित्वस्य तदसमवधाने

सति चाकारित्वस्य धर्मात्मकत्वेन धर्मिस्वरूपात्मत्वाभावात् । एवं च विरुद्धधर्माध्यासाभावात् सिद्धं प्रत्यभिज्ञया याथार्थ्यमनुस च त्यां(?) स्थैर्यम। यत्र तु विरुद्धधर्मसंसर्गः तत्र सा न मान, यथा सैवषा प्रदीपशिखा इत्यादौ खर्वत्वादीना विरुद्धधर्माणां सत्त्वात् । एवं च लब्धमपि कारणत्वं न फलोपधानावच्छेदक सहकारिसमवधाने सति तत्त्वस्य गुणऽपि प्रामाणिकत्वात् । एव च यदि सामर्थ्यं स्यात् तदा कुर्यादित्यस्य यदि स्वरूपयोग्य स्यात् तदा फलोपहित स्यात् इत्यर्थकत्वे प्रयोजकत्वम् । यदि फलोपहितं स्यादित्यर्थकत्वे यदि कुर्वद्रूपं स्यादित्यर्थत्वे चाऽस्माकमापादकास्वीकारः। तस्मात् यद्बीजं कदाप्यङ्कुरकारणैः समवहितं भविष्यति तत्फलोपधाननियतं यस्य तु तत्समवधान विनैव नाशः तत्र स्वरूपयोग्यतामात्रं नित्ये तु स्वरूपयोग्यं फलोपधाननियतः सहकारिसमवधाननियमात् । किञ्च बीजत्वेन बीजस्य कस्याञ्चित् अर्थक्रियायामसामर्थ्ये तेन रूपेण असत्त्वापत्तिः तुरगत्वेनेव (?) यद्येन रूपेणासमर्थं तस्य तेनासत्त्वात् पटत्वेन घटे तथा दर्शनात् । सामर्थ्यं तु सा क्रिया नाङ्कुरं कुसूलस्थबीजमन्तानात् अङ्कुरानुत्पत्तेः, नापि बीजमङ्कुरजनकात् बीजानुत्पत्तेः तदनुज्ञानमेवार्थक्रिया भविष्यति । न चाज्ञातविनष्टे बीज कथ तत्, तत्सर्वज्ञज्ञानस्य ततोऽपि सम्भवात् । न च तज्ज्ञानस्य नित्यत्वात् कथं समर्थक्रियात्वमस्माभिः तस्यापि क्षणिकस्य स्वीकारादिति चेन्न । एवं हि सर्वस्य बीजस्य सर्वस्मिस्तादृशज्ञाने सामर्थ्ये एकबीजस्यान्यबीजोत्पत्तिज्ञानेऽपि जनकत्वापत्तिः। अस्य बीजस्य तज्ज्ञानजनकसहकारिसमवधानाभावान्न तज्ज्ञानजनकत्वमिति चेत् । एवं हि समर्थस्यापि किञ्चिज्ज्ञानजनकसहकारिसमवधानम किञ्चिज्ज्ञानजनकसहकार्यसमवधानञ्चेत्येकस्यैव समर्थस्य सहकारिसमवधानासमवधानयोः त्वयाप्यङ्गीकारात् । एवं कुर्वद्रूपत्वविशेषणाङ्कुराणां जनकत्व कुसूलस्थबीजेऽङ्कुरार्थिनः प्रवृत्त्यापत्तिः । इष्टप्रयोजकताज्ञानमेव प्रवर्तकमिति चेत् । कस्यचिद् बीजस्याङ्कुरादर्वागेव नाशेनेष्टप्रयोजकत्वस्य बीजे निर्णेतुमशक्यत्वात् । संशयसाधारणं ज्ञानमत्र प्रवर्तकमिति चेत् । क्षणिकताऽसिद्धिः । अत्र बीजे कुर्वद्रूपत्वे एव प्रमाणाभावादिति क्षणिकताभङ्गासञ्जकसङ्क्षेपः

चतुर्दशगुणान् प्रयुक्तान्गणयति तस्येति । तत्र बुद्ध्यादयः प्रत्यक्षसिद्धा अपि सूत्रादपि सिद्धा इत्याह आत्मलिङ्गेति । प्रमाणादिसूत्रे बुद्धिः कण्ठरवेण नोक्तेति चेत् । सूत्रेण विनाऽस्याभ्यूह्यत्वात् देवदत्तबुद्ध्या विष्णुमित्रस्येच्छाद्यदर्शनेनाऽऽत्मनीच्छादिकथनेन जनकतया-तत्समानाधिकरणबुद्धेः सूचितत्वात् । ननु धर्माधर्मयोः प्रमाणमेव नास्ति । न च श्रुतिरेव मानं विधिप्रत्ययस्याऽऽस्मिन्नर्थे इष्टसाधनत्वादावेव शक्तेरपूर्वस्याशक्यत्वात् । न च चिरकालविनष्टयागब्राह्मणद्वेषादीनां कालान्तरभाविस्वर्गनरकप्रसवासमर्थतया धर्माधर्मयोः सिद्धिः, व्यापारतया धर्माधर्मयोः सिद्धावप्यात्मनिष्ठत्वे प्रमाणाभावादित्यत आह—धर्माधर्माविति । अन्यगतौ धर्माधर्मौ नान्यत्र सुखदुःखजनकाविति सूत्रकाराभिप्रयात् सुखादिसमानाधिकरणधर्मादिसिद्धिरित्यर्थः । अयमभिप्रायः । व्यधिकरणयोर्धर्माधर्मयोः सुखादिजनकत्वे यागकर्तरीवान्यस्यापि तदुत्पत्त्यापत्तिर्वैयधिकरण्याविशेषात् । यत्कृत्या यौ धर्माधर्मौ जातौ तस्यैव तौ सुखादि जनयत इति चेन्न । ऋत्विजां स्वर्गभागित्वप्रसङ्गात् । ते दक्षिणार्थिन इति चेत् । न, तथापि तत्कृत्या धर्मस्य जनितत्वात् । तस्मात्समानाधिकरणयोरेव तयोः सुखदुःखादिजनकत्वम् । अत एव पितृयज्ञादावपि पित्रादिगतधर्मकल्पनेत्याचार्याः । विस्तरश्चास्य शब्दपरीक्षादौ ।

संस्कारोऽपि फलसमानाधिकरण एव कल्पनीयः व्यापारस्य फलसामाधिकरण्ये लाघवादित्याह संस्कार इति । चिरविनष्टस्यानुभवस्य फलजनकत्वान्यथानुपपत्त्या कल्पमानस्य संस्कारस्य स्मृतिवैयधिकरण्येऽन्येनानुभूतस्यान्येन स्मरणप्रसङ्गः इत्यर्थः । आत्मनः किमाकाशवदेकत्वं पृथिव्यादिवन्नानात्वं वेत्यत आह व्यवस्थेति । नानात्मानो व्यवस्थात इति सूत्रात् पृथिव्यादिसाम्यमित्यर्थः । व्यवस्था च कश्चिन्मुक्तः कश्चिद्बद्धः कश्चित् पण्डितः कश्चिन्मूर्खः कश्चित् सुखी कश्चित् दुःखीत्यादिः । न हि मुक्तिसंसारौ एकस्य युगपत् सम्भवतः समानाधिकरणदुःखासमानकालिनदुःखध्वंसस्य मुक्तित्वात् । न च तदात्मनः तदैव संसारित्व इदं सम्भवति संसारस्य दुःखत्वात् । न चैषा व्यवस्था मा भवतु । मूढत्वपण्डितत्वे सुखदुःखे एकस्य शरीरभेदेन किं न भवत इति चेत् । देवदत्तयज्ञदत्तयोरेक-

त्वे देवदत्तानुभूतस्य यज्ञदत्तेन स्मरणप्रसङ्गात् । यथा पूर्वजन्मानुभूतं शरीरभेदेन न स्मरति तथा प्रकृतेऽपीति चेत् । शरीरभेदस्य अस्मरणे प्रयोजकत्वात् तत्त्वे स्तनपाने प्रवृत्त्यापत्तेः । पूर्वजन्मानुभूतसर्वास्मरणस्य संस्कारलोपादिनोपपत्तेः । न च प्रकृते तथा सम्भवति देवदत्तस्याप्यस्मरणप्रसङ्गात् । न च जीवनान्यथानुपपत्त्या शरीरभेदेऽपि प्रकृतजन्मानुभूतस्मृतिः कल्प्यते । न च प्रकृते काचिदनुपपत्तिरस्तीति वाच्यम् । अनुपपत्तेः कल्पकत्वात् । स्मरणे संस्कारोद्बोधादेरेव तन्त्रत्वात् । तस्य च प्रकृते सुलभत्वात् । नन्वात्मन एकत्वपक्षेऽपि अविद्याभेदात् भेदः, तथा चान्याविद्यावच्छिन्नानुभूतं नान्याविद्यावच्छिन्नः स्मरति । मुक्तिसंसारावपि चैवमुपपद्येते यस्य अविद्याविलयस्तस्य मुक्तेः यस्य च न तस्य संसारित्वात् । ईश्वरानीश्वरव्यवस्थापीत्थं सुस्थैव मायोपाधेरीश्वरत्वात् अविद्योपाधेश्च जीवत्वादेकस्यैवाज्ञानस्य स्वाश्रयाव्यामोहकत्वेन मायात्वात् स्वाश्रयव्यामोहकत्वेनाविद्यात्वात् । तथा च न काप्यनुपपत्तिरित्युपनिषन्निणार(?)इति चेत् । अविद्यायां प्रमाणाभावात् । न च व्यावहारिककार्यानुरोधेन तदनुरूपकारणतया विद्यासिद्धिः, जगतः पारमार्थिकत्वात् । न चात्मनामनेकत्वे श्रुतिसिद्धान्तविरोधः, तस्य मुमुक्षुणाऽऽत्मतत्त्वे सर्वं विहायान्तःकरणं निवेशनीयमिति तात्पर्यकत्वात् तदर्थमस्य जगत आत्मनश्चासत्कल्पनोपन्यासात् । यथा स्वं मोक्षानुपयोगि तथा स्वभिन्नमन्यदपीति तात्पर्यात् । यद्यपि प्रतियोगितयाऽन्यस्यापि ज्ञानमुपयुज्यत एव, तथापि प्रधानतया स्वात्मज्ञानमेव मोक्षोपयोगीत्यावेदितत्वात् । संख्यासिद्ध्या संख्यानुरूप पृथक्त्वमपि सिद्ध्यतीत्याह पृथक्त्वमिति । एकसूत्रनिर्दिष्टमाकाशतुल्यपरिमाणतामाह तथाचेति । अणुत्वे सुखादीनामतीन्द्रियत्वापत्तिः मध्यमपरिमाणत्वे च जन्यतया वीतरागजन्मापत्तिरिति परममहत्त्वमित्यर्थः । सन्निकर्षेति । शरीरात्मसंयोगस्य निमित्तकारणत्वादात्मनःसंयोगस्यासमवायिकारणत्वादित्यर्थः । तद्विनाशकत्वादिति । आत्ममनसोर्नित्यतयाऽऽश्रयनाशाभावाद्विभाग एव विनाशक इत्यर्थः ।

(व्यो०) इदानीमात्मनो लक्षणपरीक्षार्थमात्मत्वाभिसम्बन्धाद्दि-

त्यादि प्रकरणम् । आत्मत्वेनाभिसम्बन्ध आत्मोपलक्षितः समवायो लक्षणमिति । तथा ह्यात्मेतरस्मात् भिद्यते आत्माभिसम्बन्धाद्य-स्त्वितरस्मादनात्मनो न भिद्यते न चासावात्मत्वेनाभिसम्बद्धो-यथा क्षित्यादिरिति । न च तथाऽऽत्मा तस्माद् भिद्यत इति । व्यव-हारो वा साध्यः । तथा शब्दार्थनिरूपणपरत्वेन पूर्ववद्वाक्यं योज-नीयम् । तथा लक्षणस्याक्षेपप्रतिसमाधानं पूर्ववद्वाच्यम् ।

ननु सर्वमेतदसम्बद्धम्, आत्मसद्भावे प्रमाणाभावात्,तथाहि न प्रत्यक्षेणोपलभ्यते रूपादिवत्स्वभावानवधारणात्,नाप्यनुमानमस्या-त्मप्रतिबद्धमित्याशङ्क्याह तस्य सौक्ष्म्यादप्रत्यक्षत्वे सति करणैः श-ब्दाद्युपलब्ध्यनुमितैः श्रोत्रादिभिः समधिगमः क्रियते इति । सौ-क्ष्म्यं रूपविशेषकार्थसमवेतमहत्त्वाद्यभावोऽभिप्रेतो नाणुपरिमा-णसम्बन्धित्वमत एव तस्याप्रत्यक्षत्वम् । ननु चायुक्तमेतत्, अहमिति प्रत्यये तस्य प्रतिभासनात् । तथाच सुख्यहं दुःख्यहमि-च्छावानहमिति प्रत्ययो दृष्टः । न चायमनुमापूर्वकः, लिङ्गलिङ्गिसम्ब-न्धानुस्मरणव्यापारस्यासम्वेदनात् । नापि शब्दः, तेन विनाऽप्यु-त्पद्यमानत्वात् । नापि विपर्ययज्ञानमेतत्, अबाध्यमानत्वात् । नापि संशयज्ञानं, तद्रूपस्यासंवेदनात् । अतः प्रमारूपत्वादवश्यं प्रमाणान्तर प्रतिषेधे प्रत्यक्षस्यैव व्यापारः न शरीरालम्बनमन्तःकरणव्यापार-णोत्पत्तेः । तथाहि-न शरीरमन्तःकरणपरिच्छेद्यं बाहिर्विषयत्वात् । नन्वेवं कृशोऽहं स्थूलोऽहमिति प्रत्ययस्तर्हि कथम् ? मुख्ये बाधकोपप त्तेरुपचारेण । तथाहि मदीयो भृत्य इति ज्ञानवन्मदीयं शरी रमिति भेदप्रत्ययदर्शनात् । भृत्यवदेव शरीरे ऽप्यहमिति ज्ञानस्यौपचारिकत्वमेव युक्तम् । उपचारस्तु निमित्तं विना न प्रवर्त-त इत्यात्मोपकारकत्वं निमित्तं कल्प्यते । आत्मनि तु मुख्यत्वम्, सुखीति ज्ञानेन समानाधिकरणत्वात् । तथाहि यत्र सुखीति ज्ञानं तत्रैवाहमिति ज्ञानस्योपलम्भः सुखादियोगश्च शरीरादिव्यति रेकेणात्मन्येवेति वक्ष्यामः । यच्चेदं रूपादिवत् स्वभावानवधारणा-दिति । तदसत् । अहमिति स्वभावस्य प्रतिभासनात् । नचार्था-न्तरस्यार्थान्तरस्वभावेनाप्रत्यक्षत्वं दोषः, सर्वपदार्थानामप्रत्यक्षता प्रसङ्गात् । नच परकीयेऽप्यात्मनि अहमिति प्रतिभासप्रसङ्गः स्यात्, तस्यात्मान्तरप्रत्यक्षत्वात् । प्रत्यक्षजं चेदं विज्ञानं न प्रमाणान्तर-

प्रभवमित्युक्तम् । न चात्मान्तरेणात्मान्तरस्याप्रत्यक्षतायां स्वात्मनोपि तथाभावप्रसङ्गः । स्वसंविदा बाध्यमानत्वात् । नापि रूपान्तरस्य संख्यादेः प्रत्यक्षताप्रसङ्गः । तस्य प्रतिभासाभावेनाप्रत्यक्षत्वात् । तथाहि—यत्र हि रूपविशेषस्य प्रत्यक्षत्वं तत्रैव संख्यादयः प्रत्यक्षा इत्युक्तम् पूर्वम् । अथात्मनः कर्तृत्वादेकस्मिन् काले कर्मत्वासम्भवेनाप्रत्यक्षत्वम् । तन्न । लक्षणभेदेन तदुपपत्तेः । तथाहि—ज्ञानचिकीर्षाधारत्वस्य कर्तृलक्षणस्योपपत्तेः कर्तृत्वम् , तदेव च क्रियया व्याप्यत्वोपलब्धेः कर्मत्वं चेति न दोषः, लक्षणतन्त्रत्वाद्वस्तुव्यवस्थायाः । न चानयोरेकस्मिन्धर्मिणिरेकस्मिंश्च काले कर्तृकरणयोरिवास्तु विरोधः । तथाहि स्वातन्त्र्य कर्तृत्वं पारतन्त्र्यञ्च करणत्वमिति त्वनयोर्विधिप्रतिषेधरूपत्वादभिन्ने धर्मिण्यसम्भवो युक्तः, न चैव कर्तृत्वकर्मत्वयोरिति । अत एव मदीय शरीरमित्यादिप्रत्ययेष्वात्मानुरागसद्भावेप्यात्मनोऽवच्छेदकत्वम् । श्रीहर्ष देवकुलमिति ज्ञाने श्रीहर्षस्येवोभयत्रापि बाधकसद्भावात् .यत्र ह्यनुरागसद्भावेपि विशेषणत्वे बाधकमस्ति तत्रावच्छेदत्वमेव कल्प्यत इति । अस्ति च श्रीहर्षस्य विद्यमानत्वमात्मनि कर्तृत्वकरणत्वयोरसम्भव इति बाधकम् । न चैकस्मिन्नेव धर्मिणि कर्त्रादिविभागस्योपलब्धेरवास्तवत्वमेव स्यात्स्यम् , लक्षणभेदस्य वास्तवत्वाद्येषां तु लक्षणभेदो नास्ति तेषामेष दोष इति । कल्पनाज्ञानञ्च पूर्वमेव निरस्तमिति न कल्पनासमानोपि नाकारणादिव्यवस्था(?) । तदेवं कर्त्रादिप्रविभागस्य भिन्ननिमित्तत्वादेकस्मिन्नेवात्मन्यनुमानेन प्रत्यक्षेण वा परिच्छिद्यमानेन तदेव कर्तृत्वं न दोषायेति । नन्वेवमात्मन्यहमितिप्रत्ययस्य प्रत्यक्षफलत्वात्तस्य सौक्ष्म्यादप्रत्यक्षत्वे सतीत्यसम्बद्धं वाक्यम् । न बाह्येन्द्रियविवक्षयास्यभिधानात् । तथाहि—कस्मादात्मा क्षित्यादिवत् बाह्येन्द्रियप्रत्यक्षो न भवतीत्युक्ते वाक्यं सम्बध्यते—तस्य सौक्ष्म्याद्रूपविशेषैकार्थसमवायस्य महत्त्वस्यानेकद्रव्यत्वसहचरितस्याभावान्न बाह्येन्द्रियप्रत्यक्षत्वम् । तत्र प्रत्यक्षेप्यप्रत्यक्षाभिधानाल्लभ्यते । *तस्मिंश्च सति करणैः श्रोत्रादिभिः समधिगमः क्रियते* । यदि वा करणैः श्रोत्रादिभिरित्युभयत्रापि योज्यम् । तथाहि—शब्दोपलब्धिः करणकार्या क्रियात्वात् छिदिक्रियावदेवं शेषेष्वपीति । तस्य सौक्ष्म्याद्यथोक्तात् करणैः श्रोत्रादिभिरप्रत्यक्षत्वे सति तैरेव लिङ्गभूत-

स्तस्याधिगमः क्रियते । श्रोत्रादीनामपि सद्भावेऽनुमानमाह-शब्दा-द्युपलब्ध्यनुमितैरिति । शब्दस्पर्शरूपरसगन्धोपलब्धिक्रियाभिरनु-मीयन्त इति तदनुमितानि तैरिति । तथाहि—शब्दोपलब्धिः करण-कार्या क्रियात्वाच्छिदादिक्रियावत्। एवं शेषेष्वपीति। व्याप्तिप्रतिपादना-र्थमाह—वास्यादीनामिव करणानां कर्तृप्रयोज्यत्वदर्शनादिति । यथा वास्यादीनि करणानि कर्तृप्रयोज्यानीति तद्वच्छोत्रादीन्यपि कर-णानि, तस्मात् कर्तृप्रयोज्यानि । तथाहि—श्रोत्रादीनि करणानि कर्तृप्रयोज्यानि करणत्वाद्वास्यादिवदिति । अथात्र सर्वगतात्मप्रयो-ज्यत्वे साध्ये साध्यविकलत्वम् , विपर्यये वा सिद्धसाधनमिति । न, सर्वानुमानेषु सामान्येनैव साध्यसाधनभावोपपत्तेर्विशेषणानुव्याप्त्य-भावे सर्वानुमानोच्छेदप्रसङ्गः । प्रमाणं चानुमानमिति वक्ष्यामस्तद-धिकारे । सिद्धे च कर्तृसद्भावे तस्य शरीरादिव्यतिरेकः परिशेषात् । तथा न परं करणैः शब्दादिषु प्रसिद्ध्या च प्रसाधकोऽनुमीयते । शब्दादिषु विषयेषु प्रसिद्धिर्विज्ञानं तया प्रसाधकः समवायिकारण-मात्मानुमीयते । तथाहि-शब्दादिज्ञानं क्वचिदाश्रितं गुणत्वात् , यो यो गुणः स स आश्रितो यथा रूपादि, तथाच गुणो ज्ञानं तस्मादाश्रितम् । समवायिकारणपूर्वकत्वं कार्यत्वाद्रूपादिवदेव । अथ शरीराद्याश्रितं भविष्यतीति सिद्धसाधनमित्याशङ्क्याह—न शरीरेन्द्रियमनसामिति। तथाहि—परे मन्यन्ते प्राणवच्छरीरे सति भावात् तदभावे चाभावा-च्छरीरधर्म एव चैतन्यमिति । एवमिन्द्रियादिष्वप्यूह्यम् । तन्निषेधार्थं न शरीरेन्द्रियमनसां चैतन्यमिति। व्यवहारे साध्ये न साध्याविशिष्टो हेतुरज्ञत्वादिति। यदि वा स्वसिद्धान्तोपदर्शनमेतत्। अस्मत्सिद्धान्ते नामीषां चैतन्यमिति । नन्वेवं यदि शरीरस्य चैतन्यं नास्ति तर्हि किमर्थं परैरुक्तः चैतन्यविशिष्ट कायः पुरुषः तथेन्द्रियभावव्यतिरे-कानुविधानादिन्द्रियाणां चेत्याशङ्क्याह—अज्ञत्वादिति । न हि विदु-षो बाधकमुपलभमानस्यैव वचांसि प्रवर्त्तन्त इति । तथा मन्यन्त एभिरिति मनांसि शरीरेन्द्रियाण्येव तेषां न चैतन्यं तत्कारणाना-मज्ञत्वादचेतनकारणारब्धत्वादित्यर्थः, इति केचित् ।

अथ कारणानामज्ञत्वं कुतः कार्यज्ञानात् । नन्वेवमितरेतराश्रय-त्वम्। घटादिकार्यस्याचेतनतयोभयवादिसम्प्रतिपत्तेः कारणानामज्ञत्वं सिद्धम । तज्जातीयाश्च परमाणवः शरीरस्यारम्भका इति अचेतनका-

रणारब्धत्वे तस्याप्यचेतनत्वम्। एवमिन्द्रियेष्वपि। यदि च परमाणुषु चैतन्यं स्यादेकस्मिन्नेव शरीरे पुरुषानन्त्यात् प्रतिसन्धानादिव्यवहारोच्छेदप्रसङ्गात्। शरीरेन्द्रियाणाञ्च चैतन्यस्योत्पत्तावन्वयव्यतिरेकौ कारणत्वादपि सम्भवतः कथं तदाधारत्वमिति। अथैवमदृष्टकल्पनादोष इति चेन्न। प्रमाणोपलम्भात्। तथाहि—प्रत्यक्षवदनुमेयस्यापि अर्थस्याप्यस्त्येव सद्भावः। तत्र शरीरस्य चैतन्यप्रतिषेधार्थमाह—न शरीरस्य चैतन्यमिति। अत्र तु चैतन्यस्य पक्षीकरणे भूतकार्यत्वमसिद्धं स्यादिति शरीरमेव पक्षीक्रियते। तथाहि—शरीरं परपरिकल्पितं चैतन्यशून्यं भूतत्वात् कार्यत्वाच्च। यत् भूतं यच्च कार्यं तच्चैतन्यशून्यं यथा घटः। तथा शरीरं तस्मादचेतनमिति। अन्ये त्वेक एव भूतकार्यत्वादिति हेतुर्विवक्षित इति मन्यन्ते। तच्चासद्। व्यभिचाराभावात्। अथ भूतकार्यत्वादित्युक्तेऽस्त्यात्मना व्यभिचार इति चेत्। न। तस्य साध्यत्वात्। सिद्धे च व्यभिचारो भवतीति। यस्य चात्मा प्रसिद्धस्तं प्रत्यनुमानोपन्यासो व्यर्थ एव। तथा कार्यत्वादित्युक्ते नास्ति व्यभिचार इति व्यर्थमेव स्यात् भूतपदम्। न च चेतनया व्यभिचारः, तस्याश्चैतन्यशून्यत्वेन सपक्षत्वादिति हेतुद्वितयमेव युक्तम्। अवयवव्यत्यये तूक्तमेव प्रतिसमाधानम्।

तथा मृते चासम्भवादिति। मृतावस्थायां चैतन्यस्य रूपादिवदनुपलब्धेर्न शरीरविशेषगुणत्वम्। तथाहि—चैतन्यं शरीरविशेषगुणो न भवति सति शरीरे निवर्तमानत्वात्। ये हि सति शरीरे *निवर्तन्ते ते तद्विशेषगुणा न भवन्ति—यथा संयोगादयः। ये तु शरीरविशेषगुणास्ते तस्मिन् सति न निवर्तन्ते, यथा रूपादय इति। न च विशेषगुणत्वप्रतिषेधेन सामान्यगुणवत्त्वप्राप्तिः। प्रतियोग्यपेक्षितत्वात्* पक्षादिव्यवस्थायाः। तथाहि—चैतन्यस्य परेण शरीरविशेषगुणत्वमेवेष्टम्, तस्यैव प्रतिषेधः क्रियते। न चात्र शरीरस्यैव पक्षीकरणम्। मृते चासम्भवाच्चैतन्यस्येति हेतोर्व्यधिकरणताप्रसङ्गात्। तथेन्द्रियाणां चैतन्यप्रतिषेधो—नेन्द्रियाणां चैतन्यं करणत्वाद्वास्यादिवत् भूतत्वात् कार्यत्वादित्यपि द्रष्टव्यम्। इतोऽपि नेन्द्रियाणां चैतन्यं तदुपघातेऽपि स्मृतिदर्शनात्। न च गुणिविनाशे गुणस्य सद्भावो दृष्टः। तथाहि—स्मरणमिन्द्रियगुणो न भवति यथा घटवि-

नाशेऽपि पटरूपादिरिति । तथाच स्मरणमिन्द्रियविनाशेपि भवति तस्मान्न तद्गुण इति। यदि चेन्द्रियाणां चैतन्यं स्यात् करणं विना क्रियायाश्चानुपलब्धेरिति करणान्तरैर्भवितव्यम् । तानि करणानीन्द्रियाणि विवादास्पदानि चात्मान इत्यकस्मिन्नेव शरीरे पुरुषबहुत्वमभ्युपगतं स्यात् । एवञ्च सति देवदत्तोपलब्धेऽर्थे यज्ञदत्तस्येवेन्द्रियान्तरोपलब्धेऽर्थे न स्यादिन्द्रियान्तरेण प्रतिसन्धानम् । तत्तु दृष्टमतो नेन्द्रियाणां चैतन्यम् । यदि चैकमिन्द्रियमशेषकरणाधिष्ठायकं चेतनमिष्येत । सञ्ज्ञाभेदमात्रमेव स्यात् । अथ विषयगुणश्चैतन्यं भविष्यतीति तन्निषेधार्थमाह--विषयासांनिध्ये चानुस्मृतिदर्शनात्। तथाहि—विषयासांनिध्ये तद्विनाशे वाऽनुस्मृतिर्दृष्टा न तत् गुणतद्विनाशे भवतीति । अथ मनोगुणो भविष्यतीति तत्प्रतिषेधार्थमाह-नापि मनसश्चैतन्यं गुणः करणत्वाद्धास्यादिवत् । यत्कर्तृ मनस्तदपि सुखाद्युपलब्धौ यदि करणान्तरमपेक्षेत सञ्ज्ञाभेदमात्रमेव स्यात् । तथाहि-यत्तत्सुखाद्युपलब्धेः करण तदेवान्तःकरणं यच्चेतनं मनः स एवात्मा स्यात् । अथ करणान्तरं नापेक्षते तर्हि करणान्तरानपेक्षित्वे युगपदालोचनस्मृतिप्रसङ्गः । तथाहि--मनसश्चैतन्ये युगपद्रूपरसस्पर्शशब्दज्ञानानि प्रसज्येरन् । चक्षुरादीनां मनःसम्बन्धे सति करणान्तरानपेक्षाणां स्वविषयैः सम्बन्धात् । तथाहि—स्मृतियौगपद्यञ्च करणानपेक्षित्वात् । न चैकस्य क्रमेण कार्यजनकत्वम्, पूर्वस्वरूपस्यापरिभ्रंशात्, नापि युगपदेव सर्वं कृत्वा पुनरकरणे हेत्वभावात् । प्रतिकार्यञ्च पूर्वस्वरूपव्यावृत्त्यभ्युपगमे क्षणिकताप्रसङ्गः । अथ करणस्यापि मनसश्चैतन्यम् । तन्न, स्वयं करणभावाच्चेति । तथाहि—चैतन्यं प्रधानक्रिया सा च कर्तरि कर्मणि वा समवैति । न करणे भवितुमर्हति, अनुपलम्भात् । न हि करणं प्रधानक्रियाश्रयो दृष्ट इति स्वकार्यापेक्षया तु सर्वस्य कर्तृत्वमेवेति । तदेवं परिशेषादात्मकार्यत्वाच्चैतन्यस्य, तेनात्मा समधिगम्यते । कः पुनरयं परिशेषः ? प्रसक्तेषु शरीरादिषु जात्यादिषु च विषयेषु चैतन्यप्रतिषेधे तथा तदाश्रयस्य व्यवस्थापनाज्ञानात्वाधिगमादाकाशादीनामेकत्वेनाप्रसक्तेः शिष्यते च द्रव्यान्तरमिति परिशेषः--केवलव्यतिरेक्यनुमानम् । तथाच ज्ञानं क्षितिजलज्योतिरनिलाकाशदिक्कालमनोव्यतिरिक्तद्रव्याश्रयम् तद्-

वृत्तौ बाधकप्रमाणसद्भावे सति गुणत्वात्, यस्तु तद्व्यतिरिक्ताश्रयो न भवति न चासौ तद्वृत्तिबाधकप्रमाणसद्भावे सति गुणो यथा रूपादिः। न च तथा ज्ञानं तस्माद् व्यतिरिक्ताश्रयमिति ।

ननु सर्वमेतदसम्बद्धं क्षणिकत्वेनाश्रयाश्रयिभावानुपपत्तेः। तथा च पदार्थानामर्थक्रियया सत्त्वं व्याप्तम्। सा च क्रमयौगपद्याभ्यामक्षणिकेषु न सम्भवति। क्रमेण जनकत्वमेकस्वरूपत्वात्, यदेव हि पूर्वकार्योत्पत्तौ स्वरूपम् तदेवोत्तरकार्येष्वपीति सर्वेषामेकताप्रसङ्गः, कारणवैलक्षण्यं विना कार्यवैलक्षण्यस्याशक्यसाधनत्वात् । अथ कार्यवैलक्षण्यादेव ज्ञायते—प्रतिकार्यं पूर्वस्वरूपनिवृत्तावन्यदेव स्वरूपं भावानां भवतीति। तर्हि स्वरूपस्यावस्थानाभ्युपगमात् तथा सत्त्वप्रसङ्गः। अथावस्थितस्यापि क्रमयौगपद्याभ्यां सहकारिप्राप्तौ तथैव जनकत्वमिति चेत्। न। तस्य तस्मिन् अतिशयाधायकत्वेनातिशयनिवर्तकत्वेन च तयोरव्यतिरेकादन्यत्वमेव । व्यतिरेकेपि तदभावेपि भावस्य कथं कार्यस्य जनकत्व दृष्टमिति। न ह्यर्थान्तरजन्मन्यर्थान्तरस्य क्रियाजनकत्वं दृष्टमिति। अनुपकारके वस्तुन्यपेक्षैव न स्यादिति सहकारित्वाभावः। अथ सहकारिणामपि सहकार्यन्तराधीनं सामर्थ्यम्, तदापि यदि सहकार्यन्तरादित्यनवस्थैव स्यात्। अथ सहकार्यन्तर विनैव सहकारिणां स्वत एव सामर्थ्यमिति चेत्। एतच्चान्यत्रापि समानमित्यलम्। तदेवमक्षणिकेभ्यो व्यावर्तमानार्थक्रिया स्वव्याप्तं सत्त्वं गृहीत्वा व्यावर्तते इत्यसन्तो क्षणिकाः। तदेव बाधकोपलम्भात् पक्षपक्ष एवाक्षणिकशङ्काव्यवच्छेदसिद्धौ सत्त्वमेव क्षणिकसाधनमिति। तथा निर्हेतुकत्वाद्विनाशस्योत्पत्त्यनन्तरमेवाभाव इति क्षणिकत्वम्। ननु मुद्गरादिव्यापारेण घटादिविनाशस्योत्पादोपलम्भादयुक्तमेव तत्। नात्मभागसङ्गतौ तद्व्यापारात्। यदि च हेतोरर्थान्तरभूतो विनाश उत्पाद्येत। तदा तदभावस्यानुपलम्भो न स्यात्, तत्स्वरूपस्यापरिभ्रंशात्। तथा भावस्यैव कारणजनकत्वाभ्युपगमे भावरूपत्वप्रसङ्गश्च। न चार्थान्तरत्वाविशेषात्तस्मिन्नुपजाते कस्यचिद्भावस्यानुपलम्भो न सर्वस्येति विशेषहेतुरस्ति। नापि कारणापेक्षितायामवश्यं भावः स्यात्। वस्त्रे रागस्येव सापेक्षित्वावश्यंभावित्वयोर्विरोधात्। तथाहि—वस्त्रे रागः सम्पद्यमानः कारणसद्भावाद्भवति अभावे न भवति एवं क्वचिद्वस्तुनो विनाशहेतुप्रतिबन्धादभावाद्वा

विनाशित्वमपि स्यात् । यदि चाविनश्वरस्वरूपाणां हेतुतो विनाशो, गगनादीनामपि नित्यतयाभ्युपगतानां विनाशः प्रसज्येत । अथ नश्वरभावस्य हेतुता । ततो विनाशवत् किं तत्कल्पनया । तत्स्वरूपत्वादेवावश्यं विनापि हेतुं विनाशो भवतीति । यदि करणकार्यत्वं च स्याद्विनाशस्य कृतकत्वात् तद्विनाशेऽवश्यंभावोन्मज्जनं स्यात् तस्मान्न तस्य किञ्चित् भवति, न भवत्येव केवलमिति भाव लक्षणास्थितधर्मानाश इति । न चाक्षणिकत्वे प्रत्यभिज्ञानं प्रमाणम् । तस्य कल्पनाज्ञानत्वात् । तदेतत्सर्वमविदितार्थम्, कल्पनाज्ञानस्य पूर्वमेव निरस्तत्वात् । अथ स एवायमिति ज्ञाने विरुद्धोल्लेखादेकत्वमयुक्तम् । तथाहि–स इत्यतीताकारं ज्ञानमयमिति च वर्तमानाकारम् । न च विरुद्धाकारयोरेकत्र सम्भवो दृष्ट इति ।

तदसत् । आकारवादप्रतिषेधे पूर्वानुभवजनितसंस्कारस्मरणसहकारीन्द्रियेण स एवायमित्युभयोल्लेखि ज्ञानं जन्यते । तस्य चार्थान्वयव्यतिरेकानुविधानात् निर्विषयत्वमयुक्तम् । अथास्तु प्रत्यभिज्ञानादवस्थायित्वमर्थानाम् अर्थक्रियाकारित्वं तु कथम् । सहकारिसांनिध्ये सतीति । तथाहि––क्रमेणसहकारिसद्भावे सति क्रमेण जनकत्वम्, युगपत् सद्भावे च युगपच्चेति । यच्चोक्तम्––किन्तस्य सहकारिणा क्रियते इति । नाकिञ्चित् । किन्तर्हि ? सद्भावे कार्यमेवान्यथासहकारित्वायोगात् । यदि वा तस्य सामर्थ्यं कारकसाकल्यमेव क्रियते तत्सद्भावे कार्यजननादसामर्थ्यन्तु वैकल्य निवर्तते । साकल्यवैकल्ययोः परस्परसद्भावस्थितिविरोधात् । न च तयोराविर्भावतिरोभावाभ्यामर्थस्य तथाभावप्रसङ्गः । तयोस्तद्व्यतिरेकात् । न च सहकारिणामर्थान्तरत्वाविशेषादविशेषेण सर्वभावसहकारित्वम् । नियतस्यैव सद्भावे भावव्यतिरेकाभ्यां कार्यजनकत्वदर्शनात् । नापि सहकारिणां सहकार्यन्तरात् सामर्थ्यम् । तन्निरपेक्षाणामपि परस्परसांनिध्ये तत्समुदायस्यैककार्यजनकत्वोपलब्धेः, इष्ट चक्षुरूपालोकमनस्काराणां परस्परसांनिध्ये सत्येककार्यजनकत्वम् । न चान्यतराधिपत्येनान्त्यावस्थायामतिशयः संपद्यत इति वाच्यम् । अव्यतिरेके तदभावात्, नहि स एव तस्यैवातिशयो भवतीति । तथातिशयरहितानामतिशयजनकत्वमिति कार्यान्तरेऽपि न बाधास्ति । अथाऽतिश-

यद्युक्तानामतिशयजनकत्वम्, एवं तर्हि तेषामप्यन्यस्मात्त्वतिशयः संपद्यत इत्यभ्युपगमेऽनवस्थायां विवक्षितकार्यानुत्पत्तिप्रसङ्गः । तस्मात्सहकारिणां परस्परसांनिध्यमेवातिशय इति युक्तमुत्पश्यामः । तदेवं कार्यवैलक्षण्यं सामग्रीवैलक्षण्यात् भवतीति न प्रतिकार्यमन्यत्वं भावानाम् । यश्चायमक्षणिकानां क्रमयौगपद्याभ्यामर्थक्रियाप्रतिषेधः स विशेषप्रतिषेधस्याऽवश्यं शेषाभ्यनुज्ञायां समर्थ इति प्रकारान्तरेणार्थक्रियाप्रसङ्गः । न च तदसत्त्वग्राहकं प्रमाणमस्तीति । तथा परस्पराधिपत्येन कार्यजनकत्वाभ्युपगमात् । रूपादीनामेकैकमनेकरूपादेर्युगपत् कारणमित्यभ्युपगमे यौगपद्यप्रतिषेधादेव तदन्तर्भूतः क्रमो निषिद्ध इति तस्य स्वशब्देन पुनर्वचनम् पुनरुक्तमेव स्यात् । तथाहि—यथा रूपं युगपद्रूपरसगन्धस्पर्शानारभते तथा रसादयोऽप्येकैकविवक्षायां तत्रैव क्रम इत्येकस्यैव प्रतिषेधो वाच्यः । न चैकमेकस्मादेवोत्पद्यते तदारभते चेति नियमः सम्भवति । न चान्यथैकस्य क्रमेणानेककार्यजनकत्व प्रतिक्षणमन्यत्वाभ्युपगमात्, तस्मात् सहकारिसद्भावे सति क्रमयौगपद्याभ्यामर्थक्रियाजननात् अक्षणिकानां नासत्त्वमिति । नापि नानात्वमिति, सत्त्वादिति हेतोरव्यतिरेकः । न च पक्ष एव तस्य व्यतिरेकः, तस्य रूपान्तरत्वात् । यच्चेदमक्षणिकत्वेन विरोधात् भावत्कपक्ष एव अक्षणिकशङ्काव्यवच्छेदसिद्धौ बाधकम् । इत्येतदसत् । विरोधिप्रतिपत्तिमन्तरेण विरोधप्रतिपत्तेरयोगात् । अथाक्षणिकस्तद्विरोधि प्रतीयते एव । स तर्हि प्रतिपत्तिरूपार्थक्रियाकारित्वादसन्न भवति इति कथमस्यास्माद् व्यतिरेकः । यदि चाक्षणिकशङ्काव्यवच्छेदो बाधकादेव प्रतीयेत सत्त्वादिति हेतोर्वैयर्थ्यं स्यात् । तस्याप्यतद्रूपव्यवच्छेदविषयत्वादिति । अथ मौलेन हेतुना क्षणित्वमेव साध्यते । तच्च यदि स्वलक्षणादिभिन्नं कथमनुमानपरिच्छेद्यं तस्य हि सामान्यविषयत्वादिति । न च सत्त्वादिति हेतोः सपक्षविपक्षाभ्यामन्वयव्यतिरेकाभ्यामन्तरेण गमकत्वं न्याय्यम् । असाधारणस्यापि गमकत्वप्रसङ्गात्, सर्वस्य च पक्षान्तर्भावात् सपक्षविपक्षाभाव एव । अथ कल्पनासमारोपितत्वात्पक्षादिव्यवस्थायाः कल्पनासमारोपिते सपक्षेऽन्वयस्तदारोपित एव व्यतिरेक इति गमकत्वम् । एवं तर्हि कल्पनासमारोपितपक्षादिव्यवस्थापेक्षं काल्पनिकमनुमानमित्यवा-

स्तवं क्षणिकत्वमेव स्यात् । अथ विनाशस्य निर्हेतुकत्वेन क्षणिकत्वम् । तन्न । निर्हेतुकत्वस्यापि कतिपयकालावस्थायित्वेन विनाशे विरोधाभावात् । न च निर्हेतुकत्वं युक्तम् । भाव इवाभावेऽप्यन्वयव्यतिरेकाभ्यां हेतोर्व्यापारोपलम्भात् । अथ मुद्गरादिव्यापारात् कपालसन्तानस्योत्पादो, न तस्य विरोध्युत्पन्नत्वात् । न च कपालसन्तानस्तस्यावरणमिति, प्रागिव तत्कालेऽप्युपलभ्येत । आवरणत्वेऽपि तद्विनाशे तस्योपलम्भः स्यात् । न च कपालसन्तानेन घटस्य विरोधः, तत्कारणत्वात् कपालानाम् । अर्थान्तरे विनाशे भावस्योपलम्भ इत्युक्तम् । तन्न । तयोः सहावस्थितिविरोधात् । तथाहि भावे तूत्पन्ने अभावस्याग्रहणम् । तत्काले तु भावस्येति दृष्टम् । नन्वेवं घटकाले तत्प्रागभावस्य विनाशे तस्याप्यन्यः प्रागभावः तस्याप्यन्यो विनाश इत्यनवस्था स्यात् । तद्भावेऽपि न दोषः । कार्यनिष्पत्तेर्दर्शनादिति केचित् ।

अन्ये त्वनवस्थायां किल कार्यस्य परिसमाप्तिर्न स्यादिति घटतत्प्रागभावविनाशयोः एक एव प्रागभाव इति मन्यन्ते ।

गुरवस्तु घटकाले तत्प्रागभावस्यानुपलब्धेः स एव तस्य प्रतिषेधः । प्रागभावस्तु घटस्येति तयोः सहावस्थितिविरोधादिति ब्रुवते ।

अथाभावस्यार्थान्तरत्वाविशेषात्तस्मिन्नुपजाते सर्वेषामनुपलम्भः स्यात् । न, तस्मिन्नुत्पन्ने कस्यचिदनुपलम्भेन तयोरेव विरोधसिद्धेः यथार्थान्तरत्वाविशेषेऽपि किञ्चिदेव कारणं कस्यचिदेव कार्यस्य हेतुर्न सर्वस्येति प्रतिनियमो दृष्टः तद्वदभावस्य नियतेनैव भावेन विरोधो दृष्ट इत्यदूषणमेतत् । यच्चेदं विनाशस्य कारणापेक्षितायामवश्यम्भावो न स्यात् , वस्त्रे रागस्येव सापेक्षित्वावश्यम्भावित्वयोर्विरोधादिति । तदसत् । एकत्र व्यभिचारेण सर्वत्र तथाभावस्यानुपलब्धेः । तथा सापेक्षित्वेऽपि सवितृग्रहनक्षत्रताराणां चोदयास्तमयोपलब्धेर्निरपेक्षत्वे चोदयानन्तरमेवास्तमयः स्यात् । समर्थस्योपेक्षायायोगादिति । अवश्यं चोदितस्य सवितुरस्तमयो भवतीति । अथोक्तम्—नङ्क्ष्युर्भावस्य विनाशाभ्युपगमे किं हेतुनेति । तत्र विनाशात्मकत्वासम्भवादवश्यं नङ्क्ष्युर्विनाशयोग्यस्यैव हेतौ विनाशो न गगनादेरिति । तथा स्वकारणादित्थंभूत एवोत्पन्नो

भावो येनास्यावश्यं विनाशहेतुना भवितव्यमिति । अथ तर्हि कारणादुत्पद्यमानत्वादभावस्य भावादविशेषप्रसङ्गः । तन्न । स्वरूपभेदस्योपपत्तेर्यथाहि कारणादुत्पद्यमानाः रूपादयः परस्परं स्वरूपभेदात् भिद्यन्ते । तथाऽभावोपि भावादिति । अस्ति च द्रव्यादिषट्कलक्षणालक्षितत्वं भावपरतन्त्रेण गृह्यमाणत्वमभावस्य रूपमिति । अथोत्पत्तिमत्वादभावस्य विनाशे भावोन्मज्जनप्रसङ्ग इत्युक्तम् । तदा सद्भाववत्कर्मविलक्षणत्वादभावधर्माणां यथा चानुत्पत्तिमतः प्रागभावस्य विनाशः तथोत्पत्तिधर्मिणोपि विनाशस्याविनाश इति । न च विनाशविनाशे भावोन्मज्जनम् तस्य तद्रूपत्वादतत्कारणत्वाच्च । तथाहि—घटविनाशविनाशो न घटरूपो, नापि तत्कारणमिति कथं तस्योन्मज्जनप्रसङ्गः। न च भावस्यासत्वं प्रत्यक्षादिप्रमाणैर्व्यवसीयमानत्वात् , तथाहि—इह भूतले घटो नास्तीति ज्ञानमिन्द्रियभावव्यतिरेकानुविधानादिन्द्रियजम् । न च निर्विषयो घटाभावविशिष्टभूतलालम्बनत्वात् । अथ घटविविक्तभूतलोपलम्भ एव घटानुपलम्भो नाभावादिति चेत् । अव्यतिरेके तु घटावष्टब्धेऽपि भूतले स्यान्नास्तीति ज्ञानम् । तस्मात् घटाभावोपलम्भ एव घटस्यानुपलम्भो नोपलम्भाभावमात्रमिति । न च विनाशानभ्युपगमे भावस्य प्रागिव पश्चादप्यवस्थानादनुपलम्भो घटते । अथ क्षणस्थायित्वमेव द्वितीयक्षणे तस्यानवस्थानम् । तर्हि स एव तस्याभावो यत्सद्भावे द्वितीयक्षणे तस्यानुपलम्भ इति । अन्यथा हि इन्द्रियादेस्तादवस्थ्याद्विनाशाभावे नित्यस्यानुपलम्भो न स्यात् । यच्चेदं—न तस्य किञ्चिद्भवति न भवत्येव केवलमिति—उन्मत्तभाषितमेतत् । अनुत्पन्नविनाशस्य पूर्वमप्युपलम्भो न स्याद्विनष्टत्वादेव । अभावेन चाविरोधे पश्चादप्यवस्थानमिति नित्यत्वं स्यात् । तथा क्षणिकत्वे सति—अनुभवितुर्विनष्टत्वादन्यस्य स्मरणं न स्यात् । न हि देवदत्तानुभूतेऽर्थे यज्ञदत्तस्य स्मरणमिति । अथ नानासन्तानेषु कार्यकारणभावस्याभावादस्मरणम् , एकस्मिंश्च सन्ताने बुद्धीनामस्ति कार्यकारणभाव इत्याहितसकलपूर्ववासनाकं कार्यज्ञानमुत्पद्यत इति कारकानुभूतेऽर्थे तस्य स्मरणं युक्तमेव । नैतदेवम् । कार्यकारणभावेपि नानात्वस्य तादवस्थ्याद्देवदत्तादिसन्तानेष्विव कथं स्यात् स्मरणम् । न च सन्तानसद्भावे प्रमाणमस्ति । बुद्धेर्बुध्यन्तरकार्यत्वे प्रमाणाभावात् । अथास्ति बोध-

काशीसंस्कृतसीरीज़-ग्रन्थमाला।

इयं काशी-संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति। एतस्यां प्राचीना नवीनाश्च दुर्लभा सुलभाश्च अत्युपयुक्ता संस्कृतग्रन्था: काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण समुद्रिता भवन्ति। अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते।

हितस्नानत्रिकण्डिकासूत्र—गदाधरभाष्यसहितश्राद्धनवकण्डिकासूत्रैः यमलजननशान्ति-पृष्ठोदिवि-शौच-भोजन—कामदेवकृतभाष्यसहितोत्सर्गपरिशिष्टसूत्रैः परिष्कृतं-टिप्पण्यादिभिः सहितं च। (कर्मकाण्डं २) रु० ३—०

१८ संक्षेपशारीरकम्। मधुसूदनीटीकासहितम् संपूर्ण (वेदान्तं४) रु० ८—०

१९ लघुजूटिका-अर्थात् अभिनवा परिभाषेन्दुशेखरपरिष्कृतिनिर्मितिः। (व्याकरणं २) रु० ०—८

२० कातीयेष्टिदीपकः । (दर्शपौर्णमासपद्धतिः) महामहोपाध्याय-पं० श्रीनित्यानन्दपन्तपर्वतीयविरचितः। (कर्मकाण्डं) रु० १—०

२१ सप्तपाठि श्रीशिवमहिम्नस्तोत्रम्। श्रीगन्धर्वराज पुष्पदन्ताचार्यविरचितम्। हरिहरपक्षीय-मधुसूदनीटीकया (संस्कृतटीका-संस्कृतपद्यानुवाद-भाषाटीका-भाषापद्यानुवाद-भाषाबिम्ब) पञ्चमुखीनाम्न्या टीकया-शक्तिमहिम्नस्तोत्रेण च समन्वितम्। (स्तोत्रवि० १) रु० १—०

२२ बौद्धाऽऽचार्यश्रीधर्मकीर्तिप्रणीतः सटीकन्यायबिन्दुः। भाषाटीकासहितः। (बौद्धन्याय वि० १) रु० १—८

२३ सपरिष्कृत-दर्पणसहितवैयाकरणभूषणसारः। (व्याकरणं ३)रु०४—०

२४ न्यायवार्त्तिकतात्पर्यटीका। श्रीवाचस्पतिमिश्रविरचिता। सम्पूर्ण (न्यायविभाग ३) रु० ६—०

२५ मीमांसान्यायप्रकाशः। (आपदेवीयः) श्रीचिन्नस्वामिशास्त्रिकृतया सारविवेचिन्या व्याख्यया सहितः । (मीमांसा १) रु० २—०

२६ पौरोहित्यकर्मसारः। (टिप्पणीसमलंकृतः) प्रथमो भाग श्रीरमाकान्तशर्मणा संगृहीतः। (कर्मकाण्डवि० ३) रु० ०—४

२७ लघुशब्देन्दुशेखरः। म० म० श्रीनागेशभट्टविरचितः अव्ययीभावान्तो भागः, म०म० पण्डित श्रीनित्यानन्दपन्त-पर्वतीयकृतशेखरदीपकाख्येन टिप्पणेन समुज्ज्वलितः। (व्या०४) रु० ४—८

२८ रघुवंशमहाकाव्यम्। महाकविश्रीकालिदासविरचितम् पञ्चसर्गात्मकम् । म० म० श्रीमल्लिनाथसूरिकृतसञ्जीविनीटीकया पं० श्रीकनकलालठक्कुरकृताऽर्थप्रकाशिकाटीकया च समलङ्कृतम्। (काव्यवि० ३) रु० ०—१२

२९ कामसूत्रम्। श्रीवात्स्यायनमुनिप्रणीतं बहुयत्नरासादितया पूर्णया जयमङ्गलरचितया टीकया समेतम्। बहुखण्डितपाठान् परिपूर्य,सूत्राङ्कांश्च संयोज्य, परिष्कृत्य संशोधितम्। (काम०२) रु० ८—०

३० न्यायकुसुमाञ्जलीः। न्यायाचार्यपदाङ्कितश्रीमदुदयनाचार्यविरचितः। म० म० रुचिदत्तकृतमकरन्दोद्भासित म० म० वर्द्धमानोपाध्यायप्रणीतप्रकाशसहितः। (न्यायं ४) रु० ६—०

३१ परिभाषेन्दुशेखरः। म० म० श्रीनागेशभट्टरचितः। म० म० भैरवमिश्रविरचितया भैरवीत्यपराख्यया परिभाषाविवृत्या-तत्त्वप्रकाशिकया टीकया च सहितः। (व्याकरणं ५) रु० ३—०

पत्रादिप्रेषणस्थानम्

जयकृष्णदास—हरिदासगुप्तः,
चौखम्बा संस्कृत सीरीज आफीस,
विद्याविलास प्रेस, गोपालमंदिर के उत्तर फाटक
बनारस सिटी।